CC0. In Public Domain, Digitizagtion by eGangotri

Gitagovinda

Commentary: Balabodhini by

Commentator: Caitanyadasa Pujari Gosvami

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

RECORD NO. 38	LANGUAGE: Sanskrit
ROLL NO. 3 / Date of Filming 29-11-95	
ACC NO. 137	SCRIPT: Devanagri
CAT No. 2643	
Bundle No.	
DEC NO /R. NO.	MATERIAL: Paper
DESCRITIVE CATALOGUE/TRIENNIAL CATALOGUE VOLUME: I	
AUTHOR: JAYADEVA	NO OF FOLIOS: 1-33 (Fol. No. 6 missing) = 32
TITLE: GĪTAGOVINDA	COMPLETE/INCOMPLETE
	DATE: V.S. 1916
WITH OR WITHOUT COMMENTARY: With commentary by Caitanyadāsa Pujārī Gosvāmī	REMARKS: comml. Bālabodhinī; scb. Nārāyaṇadāsa
SUBJECT: Laghukāvya	LOCATION: Vrindaban Research Institute
	VRINDABAN

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णचैतन्यचन्द्राय नमः॥ श्रीचैतन्यकृपासीधुकणोन्मत्तेन केनचित्॥ टीका संगृह्यते गीतगोविंदस्य समासतः॥ स्वयं बोद्धु
मभिप्रायं जयदेवमहामतेः॥ क्रमेणोपक्रमादेषा गृह्यते बालबोधिनी॥ अत्र व्याकरणादीनां ग्रन्थबाहुल्यभीतितः॥ विवृत्ति
र्न कृतास्मातु तत्तद्ग्रन्थान्तरे बुधैः॥ विज्ञेया बालबोधिन्यां शब्दार्थः शब्दवेदिभिः॥ भावार्थदीपिकायां च भावो भावार्थलोलु
पैः॥ अथ राधामाधवयोर्विजनकेलिवर्णनमयं श्रीगीतगोविंदाख्यं प्रबंधमाचिकीर्षन् तत्र चतयोः सर्वोत्तमतां निष्किंचना
श्रीमान् जयदेवनामा कविराजस्तमालवनतमःपुंजकुंजसदनाद्बहिःस्थितयोस्तयोस्तत्र प्रवेशाय गदितश्रीराधिकासखी
२९ वचनमनुस्मरन् तदेव मंगलमाचरति॥ तद्दर्शनमयत्वात् प्रबंधोयं मंगलरूप इति विज्ञापयति मेघैरिति॥ श्रीराधामाध
वयोः रहःकेलयः प्रत्यध्व इत्यादि वक्ष्यमाणा जयंति सर्वोत्कर्षेण वर्त्तते श्रीकृष्णस्य स्वयं भगवत्त्वेन सर्वावतारेभ्यः श्री
राधायाः सर्वलक्ष्मीमयत्वेनास्याः सर्वप्रेयसीभ्यः श्रेष्ठ्यात् यथोक्तं श्रीसूतेन एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्व
यमिति॥ यथा च बृहद्गौतमीये देवी कृष्णमयी प्रोक्ता राधिका परदेवता सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परा इति
तत्र चामुं ममोद्यमं विघ्नान् विधूय संपादयिष्यंतीत्यर्थः॥ भगवतः स्वरूपशक्तिवृत्तिविशेषत्वात् केलीनां जयनकर्तृ
त्वं युक्तमेव उत्कर्षप्रतिपत्तिरेव जयतेरर्थः सर्वोत्कर्षप्रतिपत्त्या वकर्मकः॥ यथा जयति रघुवंशतिलक इति॥ कुज
यन्ति यमुनाकूले किं लक्षीकृत्य प्रत्यध्वकुंजद्रुमं कुंजेनोपलक्षितो द्रुमः अध्वनः कुंजद्रुमोऽध्वकुंजद्रुमस्तं लक्षीकृत्य तत्र
त्यर्थः॥ कीदृशयोः॥ इत्थमनेन प्रकारेण॥ नंदयतीति नंदः नंदश्चासौ निदेशश्चेति नंदनिदेशः॥ मंजुतरकुंजतलकेलिसनेत्या
दि श्रीराधिकासखीवचनं तस्माच्चलितयोः निदेशमेवाह हे राधे यतोऽसौ नक्तं पूर्वरात्रौ त्वां विहायान्याभिः कृतनत्याद्यप
राधत्तया भीरुर्भीतस्त्वत्कृतबहुनायिकावल्लभतारोपणाशंकी तत्तस्मात् त्वमेवेमं श्रीकृष्णं गृहं मंजुतरेति वक्ष्यमाणकेलि
सदनं प्रापय॥ अथवा त्वमेवेमं गृहं प्रापय गृहस्थं कुरु त्वयैवायं गृहिणीवान् इति नर्मणा॥ सूचिता नगरहगृहमित्या
दुर्गेहरणी गृहमुच्यते॥ इत्युक्तेः॥ योत्स्नावत्यामस्यां कुलजया मया कथमसौ प्रवेशनीयस्तत्र समयानुकूल्यमाह मेघैरंबरमाका
शं मेदुरं स्निग्धं तमः प्रविष्टमालक्ष्य इत्यादिष्ठु कोऽपि चित्ततस्य प्रियाभिनेच्छोद्भूतमेघावृतश्चंद्र इत्यर्थः॥ वनभुवश्चतमालद्रुमैः ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्यामा निविडांधकारेरलक्षिता॥ अतोऽत्र न कापि शंकाइत्यर्थः॥ एतदनंतरं एतल्लीला वसरे सखी यं वक्ष्यति। अक्ष्णो र्निक्षिपदंजन
मित्यादिना। ततो विशन् वनं चंद्रयो त्स्ना यावद्भिभाव्यते। तमः प्रविष्टमालक्ष्यत तो निवृत्तुः श्रियः इति श्रुको क्तिवत् जयत्यर्थे नमस्का
रआक्षिप्यते। इतिकाव्य प्रकाशोन्नैर्नमस्क्रियाच सूचिता। श्रीराधामाधवयोः रहः केलयोऽत्र प्रतिपाद्याः अतो वस्तुनिर्देशोपि एवं पद्
त्रयं प्रति पादनैर्महाकाव्यमुख्यत्वमुक्तं। यथोक्तं काव्यदर्शे। स्वर्गबंधो महाकाव्यमुच्यते तस्य लक्षणं। आशीर्नमस्क्रियावस्तुनिर्देशोवा
पितन्मुखमिति। राधामाधवयोरित्यनेन तयोरन्योन्याव्यभिचारि विद्योतमानं सूचिता। यथोक्तं अरुकपरिशिष्टे राधया माधवो देवो माध
वेनैव राधिका। विभ्राजंते जनेष्विइति॥१॥ एवमाद्येकपद्यसूचितकेलिस्फुरणोपस्थापितानंदपूरप्लावितांतःकरणतयोत्का रुण्ये
नाधुनिकोभक्तजनानुग्रहपरवशः सन् कविरेतत्केलिव्यक्तिकरणाय प्रबंधमनुसंदधदात्मनस्तत्सामर्थ्यसमर्थयन् प्रतिजानीते वाग्दे

मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय। इत्थं नंदनिदेशतश्च
लितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः॥१॥ वाग्देवताचरितचित्रितचित्त
सद्मा पद्मावतीचरणचारणचक्रवर्त्ती॥ श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं॥२॥

वतेति। जयंस्वोत्कर्षं श्रीकृष्णं द्योतयति स्वभक्त्या प्रकाशयतीति जयदेवः। अतः स एक कविः तद्गुणवर्णनकर्त्ता एतं श्रीगीतगोविंद
स्यं प्रबंधं प्रकर्षेण बध्यते स्वाशक्तं क्रियते श्रोतॄणां हृदयमिति प्रबंधस्तं करोति प्रकाशयति। श्रोतॄन्हृदयं बंधनशक्तिरस्य कथं स्यादत आह श्री
रत्नान्यनायिकानंगीकारात् पूर्वोक्तराधा वसुदेवंशेन दीव्यतीति वसुदेवः श्रीनंदः द्रोणो वसूनां प्रवर इत्युक्तेस्तस्यापत्यं वासुदेवः माधवस्तयोर्
भिर्याोरतिकेलिकथास्ताभिः समेतं तल्लीलाविशेषवर्णनरूपमित्यर्थः। एवं चेत्कथमयं तत्कर्तृत्वं शक्नुयादत आह वाचां वक्तृत्वेनोप
स्थितानां तत्स्वकेलिमयीनां देवतासैव वक्ता प्रवर्त्तकश्च। श्रीकृष्णस्तच्चरित्रेण चित्ररूपेण लिखितं चित्तरूपं सद्म गृहं यस्य सः इंद्रियश
क्तिहिदेवताधीना निजेष्टदैवतं वाग्देवतात्वेन निरूपितमतएतेन तत्कर्तृत्वं तत्रैव पर्यवस्येत्। तथा चित्तस्यं फलकत्वेन चरित्रस्य चित्रविशेषत्वेनि
रूपणाद्यथा चित्रविशेषः फलकमधिष्ठाय स्वयमेव प्रकाशयति तथात्रापीत्यर्थः। एवं वाचो मनसो वृत्तेर्माधवपरतोक्ता एतावतापि
कथं तत्कृष्णैकवृत्तिवतः कायिकवृत्तिः श्रीराधिकापरत्वमाह पद्मं विद्यते करे यस्याः सा पद्मावती श्रीराधा शरावत्यादिना मित्या द्विग्रहणात्
दीर्घः ते स्याश्चरणयोर्निमित्तभूतयोरेवचारणचक्रवर्त्ती नर्त्तकश्रेष्ठः॥ नृत्यादिना सदा तदाराधनपर इत्यर्थः। अनेन तत्प्राधान्योपा
सनात्मनोदर्शिता॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० ।२।

एवमात्मनस्तद्योग्यतामापाद्य सिद्धेऽपि प्रतिज्ञातेर्थे अधिकारिजिज्ञासा भवतीति हृदयविनोदकत्वाभावात्कदाचिन्मंदजनाः श्रद्धां
नेदधुरित्यधिकारिणोऽपि निश्चिन्वन्नाह यदीति भो भक्तजन यदि हरिस्मरणे श्रीकृष्णानुचिंतने मनः सरसं। मुख्योज्ज्वलरसवासितं य
दि च विलासस्य रासकुंजादिलीलायाः कलासु वैदग्धी चारुचेष्टासु कुतूहलं कौतुकमस्ति तदा जयदेवकवेः सरस्वतीं वाणीं शृणु तत्तन्ना
स्ति चेन्न एकवचनेनाधिकारिवैरल्यं सूचितं एकवचनेन च केषांचित्सामान्यस्मरणमात्रं। केषांचित् विशिष्टरासकुंजादिलीलावक
लेनमित्युभयोरुपादानं। कीदृश्यसौ यस्या एवमधिकारिणोऽपि निश्चिनोतीत्याह। शृंगाररसप्राधान्यान्मधुरा झटित्यर्थावगतेः को
मला गेयत्वात् कांता कमनीया या पदावली पदश्रेणी यस्यां ताभिः पद्यैः संबंधाभिधेयप्रयोजनाधिकारिणोऽपि दर्शिताः॥ श्रीराधा
माधवयोः रहः केलयोऽभिधेयाः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः तत्केलीनामनुमोदनजनितानंदविशेषानुभवः॥ प्रयोजनं ए

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलं। मधुरकोमलकांतपदावलीं शृणु तदा जय
देवसरस्वतीं॥ ३॥ वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो
दुरूहद्रुते। शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कवि क्ष्मापतिः॥

तद्रसज्ञाविक्रांतः करणोऽधिकारी।३। अथैतदावेशेनैवान्यत्र प्राकृतवर्णनप्रायतामालोक्यात्मनः प्रौढिमाविष्कुर्वन्नाह वाच इति
उमापतेर्धरनामा कविर्वाचः पल्लवयति विस्तारयति मात्रेण काव्यगुणायुक्तां करोति पल्लवग्राहि दोषोऽस्य। शरणनामा कविर्दुरूहस्य
दुर्बोधस्य काव्यस्य द्रुते शीघ्ररचने श्लाघ्यः न तु प्रसादादिगुणयुक्ते। शृंगार एवोत्तरः श्रेष्ठो यत्र सत्प्रमेयस्य सामान्यनायकनायिकाप्राय
वर्णनस्य रचनैराचार्यगोवर्द्धनस्य स्पर्द्धी कोऽपि न न तु रसांतरवर्णनैः। धोयीनामा कविराजः श्रुतिधरः प्रसिद्धः श्रवणमात्रेण ग्रंथा
दिधारी न तु स्वयं कवितया। गिरां संदर्भः गुणालंकारग्रथनाविशेषः तस्य शुद्धिः शोधनप्रकारं जयदेव एव जानीते जानाति केवलम
गवर्द्धने वर्णनतया। तद्वाग्विसर्गो जनताघविप्लव इत्युक्तेः। अथवा काकादेन्योक्तिरियं। यथा गिरां संदर्भशुद्धिं किं जयदेव एव जा
नीते न जानीते एव यतः उमापतिधरः वाचः पल्लवयति नूतनयति शरणः दुरूहद्रुते श्लाघ्यः गोवर्द्धनाचार्यस्य तुल्यस्तु नास्ये
व। धोयी तु कवीनां राजा श्रुतिधरश्च यद्यपि स्वयं दैन्येनैवमुक्तं तथापि सरस्वती पूर्वार्थमेव प्रमाणयति। ॥४॥

।२।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तत्केलीनां सर्वोत्कर्षप्रतिपादनायादौ शृंगिनः शृंगाररस्यांगभूतविभत्सादिरसाधिष्ठातॄणां मत्स्याद्यवतारराणां चरितवर्णनैरुज्व्वलं
यदुज्वलरसस्याधिष्ठातुरवतारिणः श्रीकृष्णस्य अखिलनायकशिरोरत्नतां प्रतिपादयिष्यन् सर्वोत्कर्षाविर्भावनं प्रार्थयते प्रलयेत्या
दिना वसंते वासंती त्यंतेन। गीतस्यास्य मालवरागो रूपकतालइत्याह। मालवेति। एवमग्रेप्युह्यं। तल्लक्षणं यथा। नितंबिनीचुंबितवक्त्र
बिंबः शुकद्युतिः कुंडलवान् प्रमत्तः। संगीतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराजः। विरामांतद्रुतद्वंद्वं रूपकः स्यादिलक्षणं
इति केशवइति केशिदैत्यनिसूदन श्रीकृष्णजय सर्वोत्कर्षमाविष्कुरु। तदाविष्करणसामर्थ्ये हेतुः हे जगदीश जगतां शासितः नामीश
नशील तथाविधत्वेपि कारुण्यमाह। हरे हरति भक्तानामशेषक्लेशमिति हरिः हे तथाविधतत्क्लेशहरत्वं तदेकप्रयोजनमात्रावतार
त्वेन प्रतिपादयन् रसानां दशाधिष्ठातत्वमाह। तत्रादौ मीनरूपेणानौकारूपपदंधि व्याकर्षणेनाह प्रलयेति। धृतं खेदं यथा विस्कृतं तम
त्स्याकारं शरीरं येन हे तथाविध जय। जयजगदीश हरे इत्येव ध्रुवपदं प्रतिपदमनुवर्त्तमानत्वात्। यथोक्तं ध्रुवत्वाच्च ध्रुवः पश्चादामो

॥मालवगौडारागेण रूपकतालेन च गीयते॥ प्रलयपयोधिजले धृतवानसि वेदं। विहितवहित्रचरित्रमखेदं केश
व धृतमीनशरीर जय जगदीश हरे॥१॥ क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे। धरणिधरणकिणचक्रगरिष्ठे
केशव धृतकच्छपरूप जय जगदीश हरे॥२॥ वसति दशनशिखरे धरणी तव लग्ना। शशिनि कलंककलेव निम
ग्ना केशव धृतसूकररूप जय जगदीश हरे ३

गच्छांति मामत इति। मीनचरितमाह। तदाकर्षणप्रकारमाह प्रलयकालीना ये समुद्रास्तेषामेकीभूते जले निमग्नं वेदमखेदं यथास्या
त्तथा धृतवानसि। तत्प्रकारमाह। कृतं नौकायाश्चरित्रं यत्र तद्यथा स्यात् इति क्रियाविशेषणं वेदरक्षणपूर्वकं सत्यव्रतं प्रलयक्लेशादपादित
पं॥ अनेनैव मीनस्य विभत्सरसाधिष्ठातृत्वं विज्ञापितं १ नकेवलं तदाकर्षणमात्रेणापि तु तद्धारणस्थित्यापीत्याह क्षितिरिति सर्व
त्र पूर्ववन्मुखबंधयोजना हे धृतकच्छपरूप तव पृष्ठे क्षितिस्तिष्ठति तत्र पंचाशत्कोटीयोजनविस्तीर्णा कथं मम पृष्ठे स्थितेत्यत्राह अ
तिशयेन विपुलतरे पृथिव्यपेक्षयाप्यधिकविस्तीर्णे। पुनः कीदृशे धरण्या धरणेन यत्किणचक्रं शुष्कव्रणसमूहस्तेन कठिने अ
नेनैव कूर्मस्याद्भुतरसाधिष्ठातृत्वं विज्ञापितं २ न चैतावता तदुद्धरणपूर्वोद्गमनेनाप्याह हे धृतसूकररूप तव दंताग्रे धरणी लोकधा
रणाकर्षविलग्ना वसति। कुत्र केव शशिनि चंद्रे निमग्ना कलंकस्य कलेव। अत्र दशनस्य बालचंद्रेणोपमा धरिण्याः कलंकस्य क
लया। अत एव निमग्नशब्दोपादानं अनेनैव वराहस्य भयानकरसाधिष्ठातृत्वं ज्ञापितं ३ नात्मनः क्लेशसहनमात्रेणापरपीडया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे धृतनरहरिरूप तव करकमलवरे नखमस्ति। कीदृशं। आश्चर्यभूतम् अग्रभागो यस्य। अद्भुतत्वमेवाह विदारितो हिरण्यकस्य पो
दैत्यस्य तनुरूपो भृंगो येन। अन्यद्विकमलाग्रं भृंगेन दल्यते इदं तु भृंगस्य दाली दित्यद्भुतत्वं नखस्येत्यर्थः। अनेनैव नरसिंहस्य ब
त्सलरसाधिष्ठातृत्वं ज्ञापितं।४। अपि च कपटदैन्यादिनाप्याह हे धृतवामनरूप हे अद्भुतवामन। विक्रमणे पदाक्रमणनिमित्त
मुपादाय बलिं वंचयसि अद्भुतत्वमेवाह यदनखनीरेण जनितं जनानां पापविध्वंसेन हेतादृश जय। अनेनैव वामनस्य सख्यरसाधि
ष्ठातृत्वं ज्ञापितं।५। न सकृन्मात्रपरपीडया सकृत् तत्पीडयापीत्याह। हे धृतभृगुपतिरूप क्षत्रियाणां यद्रुधिरं तन्मये पयसि जलेन
लरूप कुरुक्षेत्रस्य तीर्थे जगत्प्राशीमात्रमपगतपापं यथास्यात्तथा स्नपयसि। कीदृशं तेन स्नपनेन समितः संसारतापो यस्य
तादृशं तत् स्यान्ने पापस्य यात् ज्ञानोत्पत्त्या भवतापशान्तिरित्यर्थः। अनेनैव परशुरामस्य रौद्ररसाधिष्ठातृत्वं ज्ञापितं ६ न चैता
तव करकमलवरे नखमद्भुतशृंगं दलितहिरण्यकशिपुतनुभृंगं। केशव धृतनरहरिरूप जय०।४। छलयसि वि
क्रमणे बलिमद्भुतवामन। पदनखनीरजनितजनपावन। केशव धृतवामनरूप जय०।५। क्षत्रियरुधिरमये ज
गदपगतपापं स्नपयसि पयसि शमितभवतापं केशव धृतभृगुपतिरूप जय०।६। वितरसि दिक्षु रणे दिक्पति
कमनीयं दशमुखमौलिबलिं रमणीयं केशव धृतरामशरीर जय०।७। वहसि वपुषि विशदे वसनं जलदाभं ह
लहतिभीतिमिलितयमुनाभं केशव धृतहलधररूप जय०।८। निंदसि यज्ञविधेरहह श्रुतिजातं सदयहृदय द
र्शितपशुघातं केशव धृतबुद्धशरीर जय जगदीश हरे।९।
वता प्रिया वियोगादि दुःखसहनेनाप्याह। हे धृतरघुपतिरूप संग्रामे दशसु दिक्षु रावणस्य ये मस्तकास्त एव उपहारस्तं ददासि किंभि
त्य चेतना सुदिक्षु बलिदानं। दिक्पतीनामिंद्रादीनाम् अभीष्टैरपि कथं तत्र बलिः कांक्षितेरमणीयं परो(?) रावणस्य मौलिबलिस्ते
षां रतिजनक एवेत्यर्थः। अनेनैव श्रीरामस्य करुणारसाधिष्ठातृत्वं ज्ञापितं ७। नैतावन्मात्रं स्वप्रेयसी भ्रमरूपमपि ...यमुनोद्धरणात्मभक्ति
यमुनाकर्षणादिनाप्याह हे धृतहलधररूप यत्त्वं शुभ्रे वपुषि जलदनीलं वसनं धारयसि हलेन हतिर्हननं ततो भीत्या मिलितायाय
मुनातद्वदाभा यस्य तत्। अनेनैव हलधरस्य हास्यरसाधिष्ठातृत्वं ज्ञापितं ८। किं च निजाज्ञारूपवेदविरुद्धवादप्रवर्तनेनाप्याह त्वं यज्ञ
विधेयज्ञविधायकवेदवाक्यसमूहं निंदसि इति अहह हेत्यद्भुतं स्वयं वेदानप्रकाश्य स्वयमेव निंदसीत्यद्भुतं तत्प्रकारमाह दर्शि
तपशूनां घातो यत्र तद्यथा स्यात्तथा तद्देवव्यनक्ति। कथं निंदसीत्याह पशुषु सदयहृदयं यस्य हे तादृश अकिंशापरमो धर्मं इत्या
दिदैत्यमोहनाय पशुसु दयासहितत्यर्थः। अहे पयःपोषद्रवं दैत्यानां यज्ञकरणमनुचितमिति तन्मोहनं युक्तमित्यर्थः। अनेनैव बुद्धस्य शा ।३।

Dr. Urmila Sharma Collection, Varanasi

युद्धधर्मं विना निर्दयतया प्राणिवधेनापीत्याह। हे धृतकल्किशरीर त्वं म्लेच्छनिवहस्य नाशनिमित्तं करवालं खड्गं कलिहल्पोः कामधेनुत्वात् कलयसि धारयसि। कीदृशं किमप्यनिर्वचनीयमतिशयमित्यर्थः। करालं भयंकरं। कमिव धूमकेतुस्तन्नामापऊत्पातिको ग्रहविशेषस्तमिव। अनेनैव कल्किनो विररसस्याधीशत्वं ज्ञापितं। एवमेवं प्रत्येकांगरसाधिष्ठात्पुरस्कारेणैव निवेद्य समुदितांगिरसाधिष्ठात्पुरस्कारेण निवेदयति हे धृतदशविधिरूप श्रीकृष्ण जय। श्रीजयदेवकवेर्मम इदमुदितं शृणु। कीदृशं शुभदं जगन्मंगलप्रदं यतो भवस्य जन्मनस्त्वदवताराणां सारं आविर्भावरहस्यं यत्र तत्। अत एवोदारं परमं महत्। ततः सुखदं परमानंदप्रदं। जन्मगुह्यमिदमिति श्रीशुकोक्तेः। ११। अथ वर्तमानशतृप्रत्ययैरवताराणां तत्तल्लीलानां च नित्यत्व प्रतिपादनेन श्रीकृष्णस्य नित्य

म्लेच्छनिवहनिधने कलयसि करवालं। धूमकेतुमिव किमपि करालं। केशव धृतकल्किशरीर जय जगदीश हरे १०
श्रीजयदेवकवेरिदमुदितमुदारं। शृणु सुखदं शुभदं भवसारं। केशव धृतदशविधिरूप जय जगदीश हरे ११।
वेदानुद्धरते जगन्ति वहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते। पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः। ५। गुर्जरीरागेण निःसारतालाभ्यां॥

तत्तदवतारलीलत्वं वक्तुमुक्तगीतार्थमेकश्लोकेन बध्नन्नाह। दशावतारान् कुर्वते श्रीकृष्णाय सर्वाकर्षकानंदाय तुभ्यं नमोऽस्तु दशाकृतिकृतेत्वं प्रकटयन्नाह। मीनरूपेण वेदोद्धारं कुर्वते कूर्मरूपेण भुवनानि वहते। वराहरूपेण पृथिवीमंडलमूर्द्ध्वं नयते। नृसिंहरूपेण हिरण्यकसिपुं विदारयते वामनरूपेण बलिं छलेनात्मसात् कुर्वते परशुरामरूपेण दुष्टक्षत्रियाणां नाशं कुर्वते। श्रीरामरूपेण रावणं जयते बलभद्ररूपेण दुष्टदमनाय हलं धारयते बुद्धरूपेण कारुण्यं विस्तारयते। कल्किरूपेण म्लेच्छान्नाशयते। एतेषामवतारित्वेन श्रीकृष्ण सर्वरसाश्रयत्वं सिद्धं मल्लानामशनिर्नृणां मित्युक्तेः। अत एवैकादशभिः पदैः समाप्तिः बुद्धो नारायणोपेंद्रो नृसिंहो नंदनंदनः बलः कूर्मस्तथा कल्की राघवो भार्गवः किरिः। मीन इत्येषु कथिताः क्रमाद्वादश देवता। इति भक्तिरसामृतसिंधोः रसाधिष्ठातारः ५।

गी० ॥४॥ ॥अथैतेनैव श्रीकृष्णस्य सर्वनायकशिरोरत्नत्वप्रतिपादनाय धीरोदात्तादिचतुर्विधनायकगुणसमन्वयेन सर्वोत्कर्षाविर्भावनं प्रार्थ
यते श्रितकमलेत्यादिभिः गीतस्यास्य गुर्जरी रागः निःसारुताल: तल्लक्षणं यथा ॥ श्यामा सुकेशी मलयद्रुमाणां मृदुल्लसत्पल्ल
वतल्पयाता श्रुतेः स्वराणां दधती विभागं तंत्रीमुखाद्दक्षिणगुर्जरीयं ॥ द्रुतद्वयाल्लघु द्वंद्वं निःसारुः स्यादिति तत्र परमव्योमनायकत्वेन धी
रललितत्वमाह ॥ श्रितकमलेति श्रितमाश्रितं लक्ष्म्याः कुचमंडलं येन हे तादृश अनेन विदग्धत्वपरिहासविशारदत्वे सूचिते अत
एव धृते कुंडले येन हे तादृश धृता सुंदरी वनमाला येन हे तादृश ॥ अनेन विशेषणद्वयेन नवतारुण्यत्वं निश्चिंतत्वं तेनैव वेशवि
न्याशासिद्धेः हे देव हे हरे जय उत्कर्षमाविष्कुरु इति सर्वत्र योजना ॥ वीप्सात्यावेशेन ॥ जय जय देव हरे ॥ इति ध्रुवपदं ॥ विदग्धो
नवतारुण्यः परिहासविशारदः निश्चिंतो धीरललितः स्यात्प्रायः प्रेयसीवशः इत्यपि तत्रैव धीरललितलक्षणं ॥१॥ अथ सू

श्रितकमलाकुचमंडल धृतकुंडल ॥ कलितललितवनमाल ॥ जय जय देव हरे ॥१॥ दिनमणिमंडलमंडन भ जनरंजन २
वखंडन ॥ मुनिजनमानसहंस ॥ जय० ॥२॥ कालियविषधरगंजन ॥ यदुकुलनलिनदिनेश ॥ जय० ॥३॥ मधुमु
रनरकविनाशन गरुडासन ॥ सुरकुलकेलिनिदान ॥ जय जय देव हरे ॥४॥

र्यमंडलांतर्ध्येयत्वेन धीरशांततामाह ॥ सूर्यमंडलं पूज्यत्वोत्पादनेन भूषयतीति हे तथाविध जय इति क्लेशसहनत्वं ॥ विनया
दिगुणोपेतत्वं च अत एव मननशीलानां मानसहंस मानसे सरसि हंस इव सदा तच्चित्ते स्थित इत्यर्थः अनेन समप्रकृतिकत्वविन
यादिगुणोपेतत्वे अतस्तत्संसारं नाशयतीति हे तादृश इति विवेचकत्वं ॥ धीरशांतलक्षणं तत्रैव समप्रकृतिकः क्लेशसहनश्च विवेच
कः विनयादिगुणोपेतो धीरशांत उदीर्यते इति निजोपास्यत्वेपि ध्येयविशेषणत्वेन धीरोद्धतत्वमाह द्वाभ्यां ॥ कालियनामा विषध
रः सर्पस्तस्य गंजनेन जनान् विनाभक्तान् रंजयतीति वत् व्रजजनान् रंजयतीति हे जनरंजन जय किमि[illegible]तान् रंजयामित्याह यदुकु
लमेव नलिनं तस्य दिनेश सूर्य यादवानां हितार्थी यद्वा तेषां विशेषयाऽत्यादिवचनाज्ञोपारव या[illegible]त गोपकुलप्रकाशक
इत्यर्थः कालियेति मात्सर्यवत्त्वं जनरंजनेति यदुकुलेति चाहंकारित्वं अहं तयैव ममत याजनरंजन[illegible]सङ्गः धीरोद्धतलक्षणं
च मात्सर्यवानहंकारी मायावीरोषणश्चलः विकत्थनश्च विद्वद्भिर्धीरोद्धत उदाहृत इति ३ तस्यैव द्वारकाधिपास्यत्वेनाप्याह म
धुमुरनरकान् विनाशयतीति हे तथाविध जय गरुडः पक्षिराजस्तदासनं यस्य सुरकुलकेलीनां निदाने आदिकारण एतेन मायावी ॥४॥

CC0. In Public Domain, Digitizagtion by eGangotri

किमूचे इत्यपेक्षायामाह ललितेत्यादिना गीतस्यास्य वसंतरागो यतितालः तद्यथा शिखंडिबर्होच्चयबद्धचूडः पुलन् पिकं चूतन
वांकुरेण कामन्मुदा राममनंगमूर्तिर्मतो मतं सोत्र वसंतरागः लघुद्वंद्वाद्द्रुतद्वंद्वं यतिसन्निपुटांतरेति हे सखि इह हरे सावनविपिने रसः शृंगाररसेन
सह वर्त्तमानस्तदुरीयके वसंतसमये हरिर्विहरति केन प्रकारेण युवतिजनेन समं नृत्यति अत्र युवतिजनाप्राधान्योक्त्वा स्वार्थोपि
मप्राधान्यमेवमज्यते। कीदृशे। विरहिजनस्य दुरंते। दुःखेन स्यान्तुं गमयितुं च शक्ये इत्युभयो विशेषणं हरिर्मनोहरणशीलः अतो
स्य विरहो दुःसहः सरसोपि वसंतोयं विरहीणां दुःखदत्वाद्दुरंत इत्यर्थः श्रीकृष्णमपि प्राप्याज्ञानात्तस्याभावी व्याधिकनिवारणार्थमि
दमुक्तं ध्रु। कथं दुरंतेति वासंतिकधर्म्मानाह ललितायाः लवंगलतायाः परिशीलनेन स्वयंग्राहलिंगनेन कोमलो मलयाचलसं
बंधी समीरो यत्र तस्मिन् लतानारीसंस्पर्शात् कोमलत्वेन मांद्यं पुष्पसंबंधात्सौगंध्यं यमुनावनसंबंधाच्छैत्यं अचेतनापिल

वसंतरागयतितालाभ्यां ॥ ललितलवंगलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरंबित
कोकिलकूजितकुंजकुटीरे १ विहरति हरिरिह सरसवसंते नृत्यति युवतिजनेन समं सखि विरहिजनस्य
दुरंते ध्रु। उन्मदमदनमनोरथपथिकवधूजनजनितविलापे अलिकुलसंकुलकुसुमसमूहनिराकुल
बकुलकलापे २ मृगमदसौरभरभसवशंवदनवदलमालतमाले युवजनहृदयविदारणमनसिजनखरु
चि किंशुकजाले ॥३॥

ताकांतमंतरेण चेतस्यातुं न शक्नोति तर्हि चेतनानां का कथा इत्यर्थः न केवलमिदमन्यदपि मधुकराणां समूहे
न करंबितानां मिश्रितानां कोकिलानां कूजितं यत्र स कुंजकुटीरो यत्र तस्मिन् प्रति पिपासा मिलिता याराधिकोत्कंठा या वसंतवि
क्रोषणहारावुद्धार्थमित्युक्तिः १ विरहिनो दुरंतश्चेत् प्रोषितभर्तृकानां का वार्तेत्याह उन्मदो मदो यस्य तेन मदनेन मनोरथो येषां
तेषां पथिकवधूजनानां जनितो विलापो येन तस्मिन् न च राता वतापि विरमति अलिकुलेन संकुलेन व्याप्तेन कुसुमसमूहेन निः
शेषेणाकुलो व्याकुलो बकुलकलापो यत्र तस्मिन् २ अपास्तां स्त्रीणां वार्तां पुनामपि कस्तुरिकायाः सुगंधस्य यो रभसः अति
शयस्तस्मायत्ता नवदलानां श्रेणी येषु ते तमाला यत्र तस्मिन् तथा युवजनानां हृदयविदारणाय मनसिजस्य चेतदृष्टान्तेन
खास्तद्वद्रुचिर्येषां पलाशकुसुमानां तेषां समूहो यत्र स्त्रीपुं किंचित्सहृदयोपि युवक्षतीव निर्दय इति भावः ३

Dr. Urmila Sharma Collection, Varanasi

गी०
॥६॥

तस्य कथमीदृशाम घटनघटनास्साम र्थ्यं मदनमहीपतेः सुवर्णकुम्भस्येव रुचिर्यस्य नागकेशरकुसुमस्य विकाशो यत्र तस्मि
न्केवलं छत्रं किंच मिलिताः शि लीमुखाः भ्रमराः यस्मिन् तेन पाटली पुष्पसमूहेन कृतं कामस्य तूणविलासो यत्र तस्मि
न् ॥ अनेन तत्सामर्थ्यं व्यंजितं ४ तदाश्चर्यं कृत्यमेवाह विगलितं गतं पुनः संस्त्रियमाणमप्यस्थिरं लज्जितं लज्जा यस्य तस्य
जगतः प्राप्तिमात्रस्यावलोकेन तरुणाकरुणो नविनकरुणा हसैः पुष्पव्याजेन कृतो हासो यत्र अत्र हासस्य शुभ्रत्वात
पुष्पविकाशसाम्यं उक्तं च श्वेतो हासः प्रकीर्तित इति यूनामेव कामाभिज्ञत्तया हासस्योपयुक्तेः क्लिष्टापीयस्य तरुणाशब्दस्यो
पादानं। किंच विरहिनां निकृंतनाय छेदनाय कुंतस्य कुंतविशेषस्य मुखमिवाकृतिर्यासां ताभिः केतकिभिर्दन्तुरिता उन्न

मदनमहीपतिकनकदंडरुचिकेशरकुसुमविकाशे। मिलितशिलीमुखपाटलपटलकृतस्मरतूण
विलासे ॥४॥ विगलितलज्जितजगदवलोकनतरुणाकरुणकृतहासे। विरहिनिकृन्तनकुंतमुखा
कृतिकेतकिदंतुरिताशे ॥५॥ माधविकापरिमलललितेनवमालिकयातिसुगंधौ। मुनिमनसामपि
मोहनकारिणितरुणाकारणबंधौ ॥६॥ स्फुरदतिमुक्तलतापरिरंभणपुलकितमुकुलितचू
ते। वृंदावनविपिनेपरिसरपरिगतयमुनाजलपूते ॥७॥

तदंता आशा दिशो यत्र ॥ अनेनाति नि
परोद्दीपकत्वमाह। माधविकायाः सौरभेण ललिते तथा नवमालिकायुष्पैरति सौरभे। मुनिमनसामपि मोहजनके कामीनां
दीयता सूचिता ॥५॥ तद्गुणोपि
कावार्तैत्यर्थः। समाधियुक्तमुनीनां मनस्युद्दीपकः स कथं चिरं तिष्ठति तरुणानां मानिनीमनहेतुतया निरुपाधिकभित्रे तदाशीर्वा
देन तिष्ठतीत्यर्थः ६ एवं सामान्यतो वसंतं निरूपणेन राधाप्रति नवयाकस्यकृत वसंतक्रीडादर्शनमात्रेण मानकार्यः किंतु
विचार्यं वेति सूचयित्वा विशेषतो वृंदावनरमणीयत्वमाह स्फुरंत्या माधवीलतायाः परिरंभणेन पुलकित इव मुकुलितैर
सालतरुर्यत्र यथा कश्चित्तवरांगना लिंगितः पुलकितो भवतीत्यभिप्रायः तथा वृंदावनविपिने समीपवर्त्यातयमुनाजलेन पूते पवित्रे शो
भितइत्यर्थः ॥ अतो अत्र प्रियाभिसारणमेवोचितं न मान इति ध्वनिः ॥७॥ ॥६॥
ना१

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वतापसमनपूर्वकसर्वाभीष्टप्रदत्वादिवसाहायकरूपेण धीरोदात्ततामाह द्वाभ्यां निर्मलकमलदलेदृवतापशमके लोचने यस्य हे तादृश जय इति
तादृशलोचनोपलक्षितगंभीरत्वं कथं तापशमकोत्वमत आह भवं संसारं मोचयतीति हे तादृश इत्थं करुणात्वं तदपि कुतः त्रिभुवनभवनं ये घातेषां
प्राणिनां निधानं निधिवत्परमप्रियेत्यर्थः । त्रिभुवनानां भवस्योद्भवनस्य निधानो निधिरिव कारणं जनकमित्यर्थः इति विनयित्वं धी
रोदात्तलक्षणं यथा गंभीरो विनयी क्षांतो करुणः सुदृढव्रतः । अकत्थनो गूढगर्वो धीरोदात्तः सुसत्वभृदिति । ४ जनकसुतया कृतं भूषणं
यस्य हे तादृश जय इति सुदृढव्रतत्वं जितो दूषणः तन्नामा राक्षसो येन इत्यकत्थनत्वं संग्रामे शमितो रावणो येन इति च त्रित्वगूढगर्वत्वसु
सत्वभृत्वाकत्थनत्वानि । ६ अस्मिन् धीरललितमुख्यता प्रतिपादनाय अजितरूपत्वेन सेवितमिव स्तमेवाह हे नवीनघनवत्सुंदर
जय धृतो मंदरस्तन्नामा गिरिर्येन हे तादृश क्षिराब्धिमंथन इत्यधिगंतव्यं आभ्यां नवतारूपत्वं तदधिगमः कुतः श्रियस्समद्भमथ

अमलकमलदललोचन भवमोचन त्रिभुवनभवननिधान जय० ४ जनकसुताकृतभूषण जितदूषण
समरसमितदशकंठ ६ अभिनवजलधरसुंदर धृतमंदर श्रीमुखचंद्रचकोर जय० ७ तव चरणे प्रणता
वयमिति भावय कुरु कुशलं प्रणतेषु जय० ८ श्रीजयदेवकवेरिदं कुरुते मुदं मंगलमुज्ज्वलगीति जय०
॥ ९ ॥ पद्मापयोधरतटीपरिरंभलग्न काश्मीरमुद्रितमुरो मधुसूदनस्य । व्यक्तानुरागमिव खेलदनंगखेदस्वेदांबुपूरमनु

ना विर्भूतायामुखचंद्रचकोरइच सलालसइति प्रेयसीवसत्वं एते शुके चित् गुणा अंशेन श्री कृष्णे सर्वएव पूर्णतया विराजंत इति सर्वोत्क
र्षत्वं अतो अत्रापि नवदैःसमाप्तिः । ७ । अथ स्वसहिते चेतत् श्रोतृवक्तृषु प्रसादं प्रार्थयते हे श्रीकृष्ण तव चरणे वयं प्रणता इति भावय जानी
हि ज्ञात्वा किं कर्तव्यं प्रणतेषु अस्मान् कुशलं तल्लीलानुभवसामर्थ्यं कुरु देहि । त्वल्लीलानुभवस्य त्वत्प्रसादं विनानुपपत्तेः परमानंदरूपत्वा
दित्यर्थः । ८ तत्र स्वानुभवं प्रमाणयति इदं जयदेवकवेर्मम मुदं करोति इदमिति किं मंगलं मंगलाचरणमात्रं कीदृशं उज्ज्वलस्य रसस्य गीति
र्गीतं यत्र एवं चेत् किमुत केलीनामित्यर्थः । ९ । एवं उभयप्राधान्येनाद्य मंगलमाचार्य्यास्वस्य राधिकैकाश्रयतया तत्सौभाग्यवर्णनेन मध्ये
पि मंगलमाचरति एवं प्रार्थ्य श्रीकृष्णसामान्यनायकगुणानुक्त्वा पिनायकविशेषगुणान् कथयन्नेव श्रोतॄन् आश्याशिषमातनोति पद्मेति
मधुसूदनस्य वक्षस्मा रणात्पाश्रीकृष्णस्य उरः वो युष्माकं वांछितमनु निरंतरं पूरयतु कीदृशं पद्माश्रीराधा तस्याः पयोधरप्रांतभाग परिरं
भाल्लग्न कुंकुमेणांकितां मुद्रां प्रापितमित्यर्थः अत्रान्यामाप्त विष्णुत्वइत्यभिप्रायेणैवेति भावः अतएव खेलता नंगेन यः स्वेदस्तेदांबुनां पूरः प्रवा
हो यत्र तत् अत्रोत्प्रेक्षते व्यक्तः प्रकटी कृतोनुरागो यत्र तदिव अतरुद्धलितं प्रियानुरागोभ्यांतरेसमावेशाभावाद्बहिः काश्मीररूपेणोरस्या
विर्भूतमित्यर्थः । ९ ।

Dr. Urmila Sharma Collection, Varanasi

गी० तदेवं केलिवर्णनोपयुक्तनायकगुणप्रतिपादनपुरःसर्वमंगलसंगमनेनैवमाधवोत्कर्षमाविस्कृत्य उपक्रमोक्तश्रीराधामाधवरहःकेलि
॥५॥ वर्णनोत्कलिकोद्गलितचित्तः कविः दक्षिणधृष्टशठनायकगुणसमनुनयेन श्रीराधायां श्रीकृष्णस्यानुकूलनायकतापादनाय सूचीकटा
हन्यायेन श्रीकृष्णकर्तृसाधारणेनान्याभिस्तद्विहरणं समापयितुंकामस्तेनैव श्रीराधायाः सर्वोत्कर्षमाविस्कर्तुं तत्र तस्या अष्टनायिका
वस्थाः वर्णयन् संभोगपोषकविप्रलंभशृंगारवर्णनाय प्रथमं विरहोत्कंठितावस्थामाह। उत्कंठितालक्षणं यथा उद्दाममन्मथम
हाज्वरवेपमानां रोमांचकंचुकितमंगमलं वहंती समोहवेपथुघनोत्पुलकाकुलांगीमुत्कंठितां वदति तामरतः कवीन्द्र इति। वसंतसमये स
हचरति। नक्तापि काप्यर्चि हीयते इति। सहचर्यत्यंतविश्वासभूमिः। श्रीराधिकां प्रति सरसं स्वाभ्यासहेतुभूतमप्युत्कंठातिरेकजनक
गूढाभिप्रायमिदमूचे श्रीकृष्णाभिप्रायं ज्ञापयितुमितिज्ञेयं। कीदृशीं माधवीपुष्पतोपि कोमलैरंगैरुपलक्षितापि विरहतापसहनाश
क्ताः यत्र यत्र नीयते किंचित्साहश्यदर्शनात्तत्र तत्र दुर्गमेव मिनिभ्रमंती। ननु कांतारे तैरपि कथं भ्रमंति क्वचिदपि स्थातुमशक्नुवत्याव

वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ॥
अमंदं कंदर्पज्वरजनितचिन्ताकुलतया वलद्बाधां राधां सरसमिदमूचे सहचरी ॥७॥

कुप्रकारं कृतं कृष्णान्वेषणं यया तां। कृष्णान्वेषणायेत्यर्थः। तदपि कथं करोति। अमंदं यथा स्यात्तथा कंदर्पेण तत्प्राप्त्यभिलाषेणायो
ज्वरस्तेन जनिता या चिंता नानोपायविचारः तयाकुलतया वलवत्ती पीडा यस्यास्तां। अत्र तां विहायान्याभिः सह तस्य श्रीकृष्णस्य रास
विरुद्धविहरणो नेदं गम्यते शारदीयएकारात्रौ प्रेमरासमहोत्सवे श्रीराधिकायाः असमानोर्द्धरूपगुणविलासानननुभूय तस्यां सर्व
विजयिस्वानुरागं सफलं मन्यमानस्य कुत्रचित् कदाचित् कथंचित् तत्साहश्यं भवेन्नवेति स्फुरणानिखननन्यायेन तद्विवित्सायोचि
रमत्यद्भुतायां दिनकतिपयानंतरं लीलेयमिति। अथवा तथा तद्विवित्सायामद्भुतायां तदिच्छानुसारिण्या योगमायया पश्चात् केशानुज्ञाता
कूरागमेनेहृते तदर्थमेवानेकनागरीशंकुलां श्रीमथुरां स गतवान् गत्वा चैतत्र नागरीप्रभृतीषु कुब्जसुंदरीष्वामपि रूपगुणादि
काभासमननुभूय श्रीद्वारवतीं तदप्राप्य जगाम। तत्र नरेंद्रकन्याविवाहास्थापि ततो नरकासुरहृतगंधर्वयक्षनागनरकन्यानां श
ताधिकषोडशसहस्राणि विवाह्य तासु तास्वपि तासामपि साहश्यं न लब्धं। ततो दंतवक्रवधानंतरं पुनर्व्रजागमने जाते सत्येव लीले
यमिति केशिमथनमिति हरिः कुवलयापीडेन सार्द्धमित्यादिवक्ष्यमाणात्। शेषि द्वर्तिकानंगीकाराच्च ॥७॥ ५

CC0. In Public Domain, Digitizagtion by eGangotri

अथ प्रकृतो पयोगि तांवदन्येह्रावत्प्रवृत्त्यर्थं स्वभणितेरुत्कर्षमाह। श्रीजयदेवस्येदं भणितमुदयति विराजते। कुतः हरिचरणयोः स्मरणेन सारं सर्वतः श्रेष्ठम्। तत्रापि रसश्रृंगारस्तत्पोषक वसंतसमयसंबंधिनो वनस्य वर्णनं यत्र तत्। अत एव सन्निधानवर्ती यः शंवत्यास्तस्या मदनविकारो यत्र तत्। आद्यो स्वभणितेरुत्कर्षः। द्वितीये वसंतातिशायिता। तृतीये प्रकृतो प्रयोगः॥२॥ पुनरुद्दीपनाद्यप्रयोक्त्वातिलस्य संतापकत्वं विशेषतो वर्णयति दरेति। इह वसंतसमये वायुश्चेतो दहति। विरहिणामित्यर्थाद्धिगंतव्यं ननु किमपराधमेतेनास्य देवांश्चेतो दहति तत्राह। प्रविदिशं संचरतः कामस्य प्राणतुल्यः कामसुखद इति यावत्। कामोत्पन्नत्वेन निरूपितस्तत्सखा वायुस्तत्कृतापालनं। विरहिघ्नाली च्यतश्चेतो दहतीत्यर्थः। किं कुर्वन् ईषद्विकशितायाम स्निकालतायाः सकाशात् उद्गच्छत्पुष्पपरागैरेव

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं सरसवसंतसमयवनवर्णनमनुगतमदनविकारं॥ दरविदलितमल्लीवल्लीचंचत्परागप्रकटितपटवासैर्वासयन् काननानि। इह हि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः॥ अद्योत्संगवसद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्लवनेच्छयानुसरति श्रीखंडशैलानिलः॥ किंच स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः॥

कटितपटवासैः सुगंधचूर्णैः काननानि सुरभीणि कुर्वन् तत्रापि हेतुः केतकीपुष्पगंधस्य सहचारी केतकीमालिंग्य मल्लीमुपसर्पन् तत्परागपदाहति संतप्तान्यचेतो हरतीत्यर्थः॥२॥ पुनरतिशयेनोत्प्रेक्ष्यते॥ अद्येति। मलयाचलसंबंधी वायुरद्य महेशाचलं हिमाचंदनतरुक्रोडस्थाहिकवलसंतप्तः हिमस्नानेच्छया हिमालयं यातीत्यर्थः। न केवलं वायुरेव दुःसहमन्यदपीत्याह। किंचेति। स्निग्धाम्रवृक्षाणामग्रभागे मुकुलान्यालोक्य हर्षोदयात् कुहूः कुहूरिति पिकानां गिरः उज्जृंभंति कीदृश्यः मधुरास्फुटध्वनिनेदृढाः॥२॥ विरहिणामत्र दिवसनिर्यापणमतिदुर्घटमित्याह। उन्मिलदिति प्रियाविरहितैरमी वसंतसंबंधिनो वासराः प्रतिकष्टेन निर्वाह्यंते तत्र हेतुः उन्मीलंतिया निमधूनि गंधाश्च तेषु लुब्धैर्मधुपैः कंपितेष्वाम्रमुकुलेषु क्रीडतां कोकिलानां सूक्ष्मकले

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लासैरुद्भूतकलिज्वरायेषुते कैर्नीयंते ध्याने प्राणसमायाश्चिंतनेयः अवधानस्तेन हरणं प्राप्ताया: प्राणसमायाः समागमावसाउत्पन्ना
येउल्लासास्तेः॥१०॥ एवं वसंतमंदमारुतानां दुरतिक्रमत्वात् पादनेन कृस्नमिलनातिरिक्तो पायो निवर्त्यतां विरहव्यथाया इति निरूप्यतत्कृ
तवसंतक्रीडाया अतथाभिप्राययुक्तत्वात्। स्वस्मिन् स्थीयमानप्रेमे शंकाभावं दृढयितुं यदिमां न विश्वससित र्हि त्वमेवात्त र्हि। तालोकये
त्या। अनेकेति। असौमिचो रित्याद्युक्तैर्वाक्यास्तैराधिकां पुनराह। किं कुर्वती तां समीपमानीय मुररिं प्रत्यक्षं उपाधिकं दर्शयंती
कथमनभीष्टमन्यांगनारमणं दर्शयति तत्राह. अनेकनारीणां परिरंभसंभ्रमेण स्फुरत्सु मनोहारि मुरारिविलासे प्रलालसौ
सकां पश्यतं एतद्विलासस्य प्रत्यक्षत्वान्नस्या विलासस्यैव स्फुरणं युक्तमित्यर्थः॥११॥ श्लोकोक्तमर्थं गीतेन वर्णन्नाह चंदनेत्या

नीयंते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥१०॥ अने
कनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं। मुरारिमारादुपदर्शयंत्यसौ सखी समक्षं पुनराहरा
धिकं॥११॥ रामकिरीरागेण यतितालेन च॥ चंदनचर्चितनीलकलेवरपीतवसनवनमाली॥ केलिच
लन्मणिकुंडलमंडितगंडयुगस्मितशाली॥१॥ हरिरिह मुग्धवधूनिकरे। विलासिनि विलसति केलिप
रे॥ध्रु॥ पीनपयोधरभारभरेण हरिं परिरभ्य सरागं। गोपवधूरनुगायति काचिदुदंचितपंचमरागं॥२॥

दिना गीतस्यास्य रामकेरी रागः यतितालः यथा। स्वर्णप्रभाभास्वरभूषणाच्च नीलं च चोलं वपुषा वहंती। कांतेप दोपांतमधिष्ठि
तेषि मानोन्नता रामकेरी प्रतिष्ठा इति हे विलासिनि कृस्नमनोनुरंजकास्समाना इह विलासशीले इह वृंदावने मुग्धे स्वाभिप्रायानभिज्ञ
वधूसमूहे हरिर्विलसति। त्वद्विलाससादृश्याभासं कामयते स्वस्यागमनं च कथं विदग्धास्तास्तन्नजनंति केलिपरे कृस्नस्य राक्षि
ण्यचेष्टा विष्टतया तदनुसंधातुमशक्ते॥ ध्रु॥ कृस्नस्य तच्चित्तत्तामेव व्यनक्ति। चंदनेनानुलिप्तेन नीलकलेवरे पीतं वसनं यस्य वनमाला
च विद्यते यस्य सच समर्पितानेकोपकरणानेकवर्णवधूनिकरे त्वहृत्त चंदनवनमालात्वद्वर्णवसनमंडितेन गंडयुगेन स्मितेन च शोभ
मानः॥१॥ तन्मोग्ध्यमेव व्यनक्ति समुचितविचारानभिज्ञा काचित् गोपवधूनि विडस्तनभाराति शयेन त्वदुत्कर्षं विनोदार्थिनं हरिं परि
रभ्य तमनुगायति। कीदृशं तं उन्नीतत्वन्नाममुद्रांकितपंचमस्वरोपवृत्तं रागं तमनुगायति कीदृशं सरागं। त्वदनुरागेण महवर्तमानं॥२॥

Dr. Urmila Sharma Collection, Varanasi

कापि मुग्धवधूस्तस्य हृक् चेष्टाः न भिन्ना मधुसूदनवदनसरोजमधिकं यथा स्यात्तथा ध्यायति भ्रमरवद्रसविशेषान्वेषणपर इति श्लि
ष्टमधुसूदनपदोपन्यासः। कीदृशं। विलासेन चंचलयोः विलोचनयोः खेलनेन जनितस्तासां मनोजो येन तत् तद्विलासस्फूर्त्त्योल्लसितमि
त्यर्थः ३ कापि नितंबवती किंचित्कथनव्याजेन श्रुतिमूले मिलिता सती कपोलतले दयितं चारु यथा स्यात्तथा चुचुंब कीदृशे पुलकैरनुकू
ले गतं ४ रासरसे सहनृत्यपरा युवतिः हरिणा प्रशंसे। त्वदीयकिंचित्साहृश्याभासमालोक्यस्तुतेत्यर्थः। कीदृशे। करतलतालैस्तरलवल

कापि विलासविलोलविलोचनखेलनजनितमनोजं॥ ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं॥३॥ का
पि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले॥ चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले॥४॥ केलिकला
कुतुकेन च काचिदमुं यमुनाजलकूले॥ मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले॥५॥ करतलतालतरल
वलयावलिकलितकलस्वनवंशे॥ रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे॥६॥ श्लिष्यति कामपि चुंबति का
मपि कामपि रमयति रामां॥ पश्यति सस्मितचारुपरामपरामनुगच्छति वामां॥७॥ श्रीजयदेवभणितमिदमद्भुतके
शवकेलिरहस्यं॥ विपिनविनोदकलाचलितं वितनोतु शुभानि यशस्यं॥८॥ विश्वेषामनुरंजनेन जनयन्नानंदमिं
दीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं॥ स्वच्छंदं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारः स
खिमूर्त्तिमानिव मधौ मुग्धो हरिः क्रीडति॥१२॥

यावलीभिस्तत्स्वनै मिलितः कलस्वनवंशो यत्र तस्मिन् करतलतालवलयध्वनिमुरलीनादसं
कुल इत्यर्थः ६ श्लिष्यत्यादिभिः क्रीडायां नात्याशक्तिर्ध्वनिरेकस्यां सर्वांगारंभाभावात् श्रीकृष्णः स्मितचारु यथा स्यात्तथापरां
पश्यति अपरां वामां त्वन्नामग्रहणाल्लापकोपचलितामनुनयेन प्रसादयति ७ श्रीजयदेवकवेरिदं गीतं शुभानि विस्तारयतु की
दृशं। अद्भुतकेशवस्य केलीरहस्यं वैदग्धीविशेषेण श्रीराधाविलासपरीहारारूपं यत्र तत् तथा वनविहारसौष्ठवयुक्तं यशः प्रदं
च ८ पुनरुद्दीपनाय तन्निमित्तत द्विलासव्यापारेषु यित्व द्विलासा वि[illegible]एवायमित्याह हे सखि मधौ मुग्धस्तदवधाने
कर्त्तव्याकर्त्तव्ये विचारशून्यो हरिः क्रीडति। कथं वहुनायकारमणस्येदृक् त्वं किं कुर्वन्। विश्वेषां सर्वगोपांगनाजनानामनु

CC0. In Public Domain, Digitizagtion by eGangotri

२३

स्वस्य सर्वानुरंजकदाक्षिण्यस्वभावेनतेषांस्वंस्ववांछातिरिक्तरसदानात्प्रीणनेनानंदंजनयन्दाक्षिण्यमेवविस्तारयति। पुनःकिंकुर्वन्गूढं
गैरनंगोत्सवंप्राधिक्येनप्रापयन्। कीदृशैः नीलकमलश्रेणीतोपिश्यामलकोमलैः इंदीवरशब्देनशीतलत्वंश्रेणीशब्देननवनवायमान
त्वंश्यामलशब्देनसुंदरत्वंकोमलशब्देनसुकुमारत्वंचसूचितानत्रुटिकोटिस्थैर्यरसःअनैयिकोनुरागेसत्यपिनायिकानुरागमंतरेणाव
प्यतदुदयः तत्राह। व्रजसुंदरीभिरालिंगितः। स्वस्वप्रेमानुरूपंप्रालिंगनाद्यनुरंजनेनानुरंजितः। अनुरागंप्रापितइत्यर्थः। एतेनान्योन्यानु
रंजनमात्रतात्पर्यकयाप्रेमपरिपाकोद्भूतपूर्णरसाविर्भावेनप्राकृतरसस्तिरस्कृतइतिसूचितं। तर्हिसंकोचापत्तिःस्यात्नैवंवाच्यं
स्वच्छंदयथास्यात्तथाकालदेशक्रियाणामशंकोचमित्यर्थः। तथापिप्रगानोद्दिड्मात्रतास्यात्नप्रत्यंगंरएकैकांगस्यपद्योचित
क्रियेत्यर्थः नन्वेवंकेनानेकासांसमाधानंकथंस्यात्तत्राह। शृंगाररसोमूर्त्तिमानित्यहमुत्प्रेक्षे। यतःसोप्येकएवविश्वमनुरंजयन्ना
नंदयति।।२२।। अथकविरपिवसंतरासमनुवर्णयन्शारदीयरासकृतराधश्रीकृष्णविलासमनुस्मरंस्तद्दर्शनरूपमाशिषंप्रा

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया। साधुत्वद्व
दनंसुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः।।२३।। इतिश्रीगीतगो
विंदेमहाकाव्येसामोददामोदरोनामप्रथमःसर्गः।।१।। ॐ ।। विहरतिवनेराधासाधारणप्रणयेहरौविगलि
तनिजोत्कर्षादीर्ष्यावशेनगतान्यतः।। क्वचिदपिलताकुंजेगुंजन्मधुव्रतमंडलीमुखरशिखरेलीनादीनाप्यु

पुंजे रासेति हरिर्वोयुष्मान्रक्षतुकीदृशः आभीरवामभ्रुवांगोपसुंदरीणांसमीपेश्रीराधयाउद्भटंयथास्यात्तथाउरःपरिरभ्यचुंबि
तःलज्जाशीलायास्तत्रतत्सिद्धिःकथं। प्रेमांधयाप्रेमावेशविगलितलज्जया किंकृत्वा। तत्रापिवैदग्धीव्यनक्ति। त्वद्वदनंसाधुरम
णीयंसुधामयमितिनिगद्यगीतस्तुतिव्याजंविधाय अतस्तद्धैर्यव्यवलोकात्। स्मितेनतस्यामनोहरणशीलः। कीदृशीनां। रासो
ल्लासभरेणविभ्रमभृतां।२३। एतदेवसर्गोयं श्रीराधाविलासानुभवेनआसम्यक्मोदेनसहवर्त्तमानोदामोदरोयत्रसइतिबालबो
धन्यांश्रीगीतगोविंदटीकायांप्रथमसर्गः।।१।। अथसखीवचनंनिशम्यस्वयमनुभूयश्रीकृष्णस्यस्वाभाविकप्रेमतारतम्येनचासा
धारणविहरणंविलोक्यहर्षोदयात्तद्दर्शनमप्यसहमानायाअवस्थांतरमपितदुपयोगित्वमाह। विहरतीति क्वचिदपिलताकुंजे
लीनाश्रीराधातत्कृष्णमेवदर्शनेनदीनासतीसखींप्रतिरहोत्यंतगोप्यमपिस्वानुभूतमुवाच। कीदृशी ईर्ष्यावशेनपूर्वानुभूतंविस्मृत्या
परापविवेकशून्यान्यत्रगतेत्यर्थः ईर्ष्यापिकुतः। सास्वपिसर्वासमानःप्रणयोयस्यतथाभूतेहरौविहरतिसति। विगलितोगतोनिजोत्क
र्षःअहमेवासाधारणीप्रियेत्येवंरूपोयस्यास्तस्मात्प्रणयतारतम्यात्विरम्यसःमयाव्यवहरणात्। श्रीकृष्णस्वभावान्यथात्वदर्शनात्सम ।।२८।।

Dr. Urmila Sharma Collection, Varanasi

गी० ३२

अथ हृद्रोगमाश्वपहिनोत्यचिरेणधीरः इति शुको कृपामाराप्पादेत तत् श्रवणकीर्तनस्मरणानुमोदनप्रभावमाह हे माध्वीक इहलोके यावत् जयदेवं वचांसि विविधवक्तर्वतः शृंगारसारस्वतभावं ददति तावद्भवतः चिंता साध्वी न भवति मधुरत्वेपि मादकत्वादीत्यर्थः हे शर्करे त्वं कर्करासि मादकत्वाभावेपि कठिनत्वात् हे द्राक्षे के त्वां द्रक्ष्यंति कोमलत्वेपि निंद्यदेशोद्भूतत्वात् हे अमृत त्वं मृतमसि मरणानंतरं प्राप्यत्वात् । हे क्षीर ते रसो नीरवत् आवर्त्तनाद्यपेक्षत्वात् हे आम्र त्वं क्रंद त्वग्रह्यादिहेयांशत्वात् हे कांताधर त्वं पाल मसुरालयं याहि अयोदात्तनामत्वात् तवात्र स्थितिर्न युक्तेत्यर्थः श्रीजयदेवभणितमधुरव्यभक्तिरसास्वादने निमग्ना जनास्तेषु पुंभवे वकरिष्यंतीत्यर्थः २५ अतः स। गोयं समुद्भिन्नमदाख्यसंभोगरसानंदितः पीतांबरः प्रियाप्रेमाविष्टतया तद्दर्शनरसाश्रयः श्रीकृष्णोपत्रसद्दृति ॥ ॥ अथ पितृमातृस्मरणपूर्वकं पराशरादिमतज्ञातार एवास्याधिकारिणः इति तान् प्रत्याश्वासयति भोजदेव नामास्य पिता तस्मात् प्रभवो यस्य रमादे

साध्वी माध्वीक चिंता न भवति भवतः शर्करे कर्कशासि द्राक्षे द्रक्ष्यंति के त्वाममृत मृतमसि क्षीर नीरं रसस्ते माकंद क्रंद कांताधर धरणितलं गच्छ यच्छंति यावद्भावं शृंगारसारस्वतमिह जयदेवस्य विष्वग्वचांसि २५ इति श्रीजयदेवकृतौ गीतगोविंदे महाकाव्ये सुप्रीतपीतांबरो नाम द्वादशः सर्गः १२ ॥ ॥ श्रीभोजदेवप्रभवस्य रामादेवीसुत श्रीजयदेवकस्य पराशरादिप्रियवंधुकंठे श्रीगीतगोविंदकवित्वमस्तु समाप्तश्चायं गीतगोविंद ॥

वीनाम्न्यस्य जननी तस्याः सुतस्य जयदेवस्य गीतगोविंदाख्यकवित्वं पराशरादीनां ये प्रियास्तेन ज्ञानेन प्रियत्वं प्राप्तास्तेषां प्रियेबंधवस्तन्मतसारराधामधवरहःकेलिज्ञानेन बंधुत्वं प्राप्तास्तेषामेव कंठे लग्नलग्नभूषणवत् सदास्तु अनेनास्य सर्वपुराणेतिहासादिवल्लक्षणांस। मत्या सर्वसारत्वं नित्यत्वं दुरूहत्वं बोधितं अत्रोपक्रमः आदौ श्रीकृष्णस्य श्रेष्ठ्यापादानं प्रलयपयोधिजले इत्यादिना वृतेत्ते वासेति कुसुमेत्यनेन ततः श्रीराधिकायाः कंसारिरपीत्यनेन तत्रैव साधारणीलीलां तस्या उत्कंठावर्णनं च ततः श्रीकृष्णस्याप्युत्कंठा यमुनातीरेत्यनेन ततः श्रीकृष्णस्यैव राधिकोत्कंठाकथनं पूर्वयत्रेत्यनेन ततोऽस्या अभिसारिकावस्थावर्णनं अथ तामित्यनेन ततो वासकसज्जा अत्रांतरेत्यनेन ततश्च द्वेध्ये पुनरुत्कंठा अथागतामित्यनेन ततो विप्रलब्धा अथ कथमपीत्यनेन ततः खंडिता अथेत्यंतेन ततः कलहांतरिता अत्रांतरे मसृणरोषेत्यनेन ततो मानिनीवर्णनं सुचिरेत्यनेन ततः सखीप्रार्थना सा साध्वसेत्यनेन ततोऽन्योन्यावलोकनवर्णनं गतवतीत्यनेन ततः श्रीकृष्णप्रार्थनाप्रत्यूहेत्यनेन ततो रहःकेलयः इति मनसेत्यनेन ततः स्वाधीनभर्तृका यज्ञांधर्वकलेत्यनेन इति यद्वत्स्वबालमुग्धोक्तैः पित्रा प्रीतिरवाप्यते तद्वत् श्रीकृष्णचैतन्यः प्रीयतामत्र जल्पिते श्रीगोविंदपादसेवा प्रभावाद्दुदिता स्वयं चैतन्यदासेन बालबोधनी स्फातसतामुदे ॥

इति श्रीगीतगोविंदस्य बालबोधनीटीका समाप्ता: मितिफाल्गुण शुक्लपक्षे पूर्णमास्यां संवत् १९ २६ लिखितं नित्यानंददासेन स्वपठनार्थं ॥

३२

CC0. In Public Domain, Digitizagtion by eGangotri

গীত গোবিন্দ ([illegible])

৫৭ (ক)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

গীত গোবিন্দ ([illegible])

৫৭ (ক)

Blank page

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० तथोपसंघारेपिस्वाधीनकृष्णोपसनयाःसर्वोत्तमतानिश्चयावेशेनकारुण्योदयात् तत्रतत्रसंदिहानभक्तिरसिकान् प्रत्याह भोःसुधियः श्रीकृष्णभ
३२ क्तिरसवासितचित्ताः पंडासदसद्विवेचिकाबुद्धिस्तयान्विताःकविःसत्काव्यकर्त्ता तथाभूतस्यजयदेवस्यपंडितकवेः श्रीगीतगोविंदतस्तत्सर्वं दु
ग्धेभलाभानंदेनसहिताःसंतःपरिसर्वतोभावेनशोधयंतु शंकापंकामुद्धूयनिश्चिन्वंतु तत्किंपत्तगांधर्वकलासुसंगीतशास्त्रोक्तस्वररागता
लगीतादिषुयन्नैपुण्यंपतदेतत्त्रिवंधानुसारेणतन्निश्चिन्वंतुइत्यर्थः नकेवलमिदं अपितुयद्वैस्यवंसर्वव्यापनशीलस्यविष्णोःसर्वाव
तारिणोऽचिंत्यानंतशक्तेःस्वयंभगवतःश्रीकृष्णस्यभजनविषयंयदनुध्यानंस्वाभिरूपाचिंत्यतल्लीलाविचारसमाधानादनुक्षणचिंत
नंतदप्येतत्दृष्ट्वैवनिश्चिन्वंतु नित्यत्वसर्वोत्तमत्वनिश्चयेनदृढीकुर्वंत्वित्यर्थः तत्रापिदुरूहगतेःशृंगारस्यमहाप्रेमरसविचारस्यय
तत्वंदुरूहगतिदुरूह व्रजसुंदरीलीलागतं तदप्येतदनुसारेणमहाभावपर्यंतंनिश्चिन्वंतु काव्येषुशब्दार्थानुप्रासंगादिषुयल्लीला
यित्तंयथाकाव्यानिलीलावदाचरति तथावर्णनप्रकारं तत्रहेतुः कृष्णएकतानएकांतोऽनन्यवृत्तिरात्मामनोयस्य श्रीकृष्णैकांतभा

यद्गांधर्वकलासुकौशलमनुध्यानंचयद्वैस्यवंयच्छृंगारविवेकतत्त्वमपियत्काव्येषुलीलायितं तत्सर्वंजयदेवपंडितकवेः
कृष्णैकतानात्मनःसानंदाःपरिशोधयंतुसुधियः श्रीगीतगोविंदतः ११ पर्यंकीकृतनागनायकफणाश्रेणीमणीनां
गणेसंक्रांतप्रतिविंवसंवलनयाविभ्रद्वपुर्विक्रियां पादांभोरुहधारिवारिधिसुतामक्ष्णांदिदृक्षुःशतैःकायव्यूहमिवा
चरन्नुपचितीभूतोहरिःपातुवः १२ त्वामप्राप्यमयिस्वयंवरपरांक्षीरोदतीरोदरे शंकेसुंदरिकालकूटमपिवन्मूढोमृडानि
पतिः इत्थंपूर्वकथाभिरन्यमनसोविक्षिप्यवक्षोंचलंराधायाःस्तनकोरकोपरिमिलन्नेत्रोहरिःपातुवः १३ ॥

क्तविशेषस्यैवतदुक्तेस्तावत्पर्यंतारोहणविज्ञानसामर्थ्यात् ११ अथश्रीराधिकाप्रत्यंगदर्शनात्उत्कंठावगुंठितः श्रीकृष्णेनेत्र
वाहुल्यमन्विच्छन् श्रीशेषशायिनोलक्ष्मीदर्शनोत्कंठामुत्प्रेक्षितवान् सकौतुकमाशिषंप्रयुंक्ते हेप्रियेहरिः शेषशायीवोयुष्मान्सस
खीःपातुः कीदृशः कायव्यूहमाचरन्निवोपचितीभूतोवृद्धिंप्राप्तइतिस्वरूपेक्षते कथमेवमत्सुत्प्रेक्षे पादांभोरुहधारिवारिधिसुतां श्री।
लक्ष्मीमक्ष्णांशतैर्दिदृक्षुमिच्छुः तत्प्रकारमाह तल्पीकृतस्यफणाश्रेण्यांयेमणयस्तेषांगणेमिलितानांप्रतिविंवानांप्रसरणेनविभ्र
र्द्वपुर्विक्रियांविभ्रत् १२ ततोऽत्युच्छलितोत्कलिकयातद्वक्षोऽवलोकायतस्यांवेचित्त्यापत्त्येपुनर्नारायणाचरितवर्णनेनकौतुकमातनोदिति
स्मरन्कविराशि[illegible]ति हरिःश्रीकृष्णःपातुवः कीदृशः राधायावक्षोंचलमपसार्यस्तनकोरकोपरिमिलन्नेत्रः कथंतन्नेत्रमीलनंसंभा
व्यते हेसुंदरि क्षीरसमुद्रस्यतीरमध्येमयिस्वयंवरां त्वामप्राप्यशिवोमूढःसन्कालकूटविसमपिवत् इत्यहंशंके नारायणस्मरणेनतदा
वेशादित्यनेनप्रकारेणपूर्वकथाभिःपुराणप्रसिद्धाभिःतदस्कृतपूर्वाभिर्विस्मितचित्तायाः कांचित्कंचित्तल्लीलानुकरणेनकौतुककरणा
रूपीत्यमुक्तं १३ ॥ ३२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथानंतरं मम मुखे अलकं संस्कुरु तत्र हेतुः पूर्वाचरितसूचकतया सखीपरिहासजनकं यतः सन्मुखे सुचिरं कालं व्याप्य मुखकमलस्यो
परि इतस्ततः प्रसरणेन भ्रमरचयं रचयंतं अत एव रुचिरं कीदृशे त्वत्कृतपानेन मध्वाधारतया जितकमले भावोल्लासप्रसन्नतया वि
मले मुखस्य क[illegible]लेनालकस्यापि भ्रमरत्वं ५ ततश्च हे स्मित विकसितानन मुख ललाटचंद्रे मृगमदरसवलितं तिलकं ललितं यथा।
स्यात्तथा कुरु कीदृशे विहिताकलंकस्य कलाशेषोयेन ललाटस्य वालचंद्रत्वेन मृगमदतिलके कलंककलंत्वेन निरूपितं कीदृशे वि
श्रमिता अपनिता अंबुकणा यत्र तस्मिन् तान्‌पनीयतिलकं कुर्वित्यर्थः ५ हे मत प्रार्थनाकृति कुशल मम केशे कुसुमानि कुरु कीदृशे सं।
भोगवेगलिते उत्कीर्णे तत्कालिनत्वकुं[illegible]न मनोहरे तथा मनसिजस्य यो ध्वजस्तस्य चामरे किंच मयूरपुच्छस्येव डामरः आटोपो यस्य ६ त

लला-मलिकं गोऽलं रूढं हृत्म्यामि त्यमरः

भ्रमरचयं रचयंतमुपरि रुचिरं सुचिरं मम सन्मुखे जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ५ मृगम
दरसवलितं ललितं कुरु तिलकमलिकरजनीकरे विहितकलंककलंकं मलानन विश्रमितश्रमशीकरे ५ मम
रुचिरे चिकुरे कुरु मानद मनसिजध्वजचामरे रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे ६ सरसघ
ने जघने मम संवरदारणवारणकंदरे मणिरसनावसनाभरणानि शुभाशय वासय सुंदरे ७ श्रीजयदेववचसि
जयदे सदयं हृदयं कुरु मंडने हरिचरणस्मरणामृतकृतकलिकलुषज्वरखंडने ८ रचय कुचयोः पत्रं चित्रं कुरु
ष्व कपोलयोर्घटय जघने कांचीमंच स्रजा कवरीभरं कलय वलयश्रेणीं पाणौ पदे कुरु नूपुराविति निगदितः प्री
तश्च हे शुभाशय त्वत्करस्पर्शेनोत्तुंगे मम नः पीतांबरोपि तथाकरोत् १० जघने मणिरसनावसनानि परिधापय कीदृशे रसः
शृंगारस्तत्सहितेत घोर्यं घनं निविडं च यत् तस्मिन् अपि संवरदारण एव वारणः कंदर्पहस्ती तस्य कंदरे यतः सुंदरे ७ श्रीजयदेववच
सि सदयं यथा स्यात्तथा कुरु हृदयं स्निग्धीतकरणस्येव एतत् श्रवणयोग्यत्वात् ततो जयं श्रीकृष्णं ददाति जयदं तस्मिन् तत्र हेतुः
हरिचरणस्मरणमेवामृतं तेन कृतं कलिकलुषज्वरखंडनं येन अत एव मंडने भूषणरूपे ८ अत्यावेशेन तया पुनरपि त्वत्प्रत्युक्तवचन
श्रवणानंदितः श्रीकृष्णस्तथैवाकरोदित्याह हे श्रीकृष्ण कस्तूरिकापत्रं कुचयोः रचय कपोलयोश्चित्रं कुरुष्व जघने कांचीमर्पय
मालया कवरीभरं प्रापय वलयश्रेणीं पाणौ कलय पादे नूपुरौ कुरु इत्यनेन प्रकारेण तया यथा ज्ञप्तः पीतांबरो बहुधा [illegible]लाभात्।
प्रीतस्तथा तथैवाकरोत् अपिशब्देन सुरतांतः वसनव्यत्ययाभावेपि तदाज्ञानुवर्त्तनात् तस्या निशांतदधी
नत्वं हृदीकृतं १० ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

एवंप्रियदर्शनानंतरोन्मत्ता प्रियंजगादेतितस्याःस्वाधीनभर्तृकावस्थांवर्णयिष्यन्नाह इतीति तल्लक्षणंयथा स्वायत्तासन्नदयिता
भवेत्स्वाधीनभर्तृकाइति स्ववसीकृतप्रियतमचित्ता श्रीराधारतिश्रांतमपिगोविंदं तदीहावलोकनात्सादरंयथास्यात्तथा इदंत
त्स्पर्शलोभेनवक्ष्यमाणंजगाद कीदृशंइत्युक्तप्रकारंमतंसा निगदितं कीदृशी सुरतांतेनितांतखिन्नांगी ८ रामकिरीरागयति
ताले यज्जगादतदेवाह यदुनंदने क्रीडति सति सा श्रीराधा निजगाद तंप्रतीतिप्रकटरणान्वयं क्रीडतीति सुरतांतेपिचित्रक्री
डियोरयादखंडलीलात्वमुक्तं स्वेच्छामात्रेणाकर्षंक्रीडनंसेत्स्यति तस्याहृदयमानंदयति स्वचापल्येनपुनःक्रीडनायोन्मुखकरोति
यस्तस्मिन्क्रीडति जगादेति क्रीडनसमयेपि प्रियप्रेरणान्तस्यानिरंतरस्वाधीनभर्तृकात्वंप्राधान्यंद्योतितं

इतिमनसानिगदंतंसुरतांतेखिन्नांगी। राधाजगादसादरमिदमानंदेनगोविंदं ध्रु किंनिजगाद हेय
यिमंडनकांक्षया जगादमाधवंराधामुग्धास्वाधीनभर्तृका ८ रामकिरीरागेरागीयते कुरुयदुनंद
नचंदनशिशिरतरेणकरेणपयोधरे मृगमदपत्रकमत्रमनोभवमंगलकलशसहोदरे १ निजगाद
सायदुनंदने क्रीडतिहृदयानंदने ध्रु अलिकुलगंजनसंजनकंरतिनायकसायकमोचने त्वदध
रचुंवनलंवितकज्जलमुज्ज्वलयप्रियलोचने २ नयनकुरंगतरंगविकासनिवासकरश्रुतिमंडले म
नसिजपाशविलासधरेशुभवेशनिवेशयकुंडले ३

दुनंदनेत्युक्तरीत्यामहाकुलोद्भवत्वेन सर्वातिशायिनायकगुणख्यायनायसंबोधनं यद्विपुनर्मनोभवमखारंभःसंभवति तथा
ममपयोधरेकस्तूरिकायत्रभंगंकरपल्लवेनकुरु कथंतत्रतत्करणीयमतआह कामस्ययोमंगलकलसस्तत्सदृशे मंगलमख
कलसोपिचंदनचित्रितः पल्लवेनाछाद्यस्यापतेग्रतस्त्वमपितथाकुर्वित्यर्थः कीदृशेनचंदनादपिशीतलेनशीतलत्वेनाव्यग्रतयाक
रस्यतत्करणयोग्यतासूचिता १ ततश्चतदुपकरणान्यापादयेत्याह हेप्रियतमलोचनेत्वदधरचुंवनेनलंविकज्जलं उज्ज्वलयप्रद
काशय कीदृशं अलिकुलगंजनेसंजनयतीति तादृशं कीदृशे रतिपतिशायकान् कटाक्षरूपान्मोचयतीतिमोचनेतस्मिन् कज्ज
लादिकमपितत्रापेक्षितस्तीतिभावः २ ततः हेशुभवेशममश्रुतिमंडलेकुंडलेअर्पय कीदृशे नयनमेवकुरंगस्तस्यतरंगोगतिभंगीस्फु
रणंतस्ययःप्रकासतस्यनिवासकरंयत् शुभवेशममश्रुतिमंडलंतस्मिन् मनसिजस्यपाशोमृगबंधनरज्जुस्तस्यविलासधरे तस्या
शभयात् अग्रेणयातीत्यर्थः ३

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२ सा
ततस्तस्याः क्षेसावेशावसरे प्रियोऽधरं पीतवान् इत्याह मीलदिति धन्यमात्मानं मन्यमानः श्रीकृष्णः श्रीराधायाः आननं पिब
ति कीदृश्याः हर्षोत्कर्षस्य विमुक्ताः प्रसक्त्यानिः सहा धर्तुमशक्यास्तनुर्यस्याः कीदृशः कस्तूरिकया श्यामयोरुच्चयोः पयोधर
योरुपरि परिष्वंगो विद्यते यस्य आननपाने हेतुगर्भविशेषणानाह मीलन्मिलत्कपोले पुलकं तथा च शीत्कारस्य या धारा अनव
छिन्नता तस्या वशाद् अव्यक्ताकुला या केलिभुकाकुस्तया विलसद्भिर्दन्तांशुभिर्धौतोऽनुरंजितोऽधरो यत्र एतैः रसावेशः सूचितः
५ अथ सुरतांतचिन्हशोभितवपुर्दर्शनेन द्विगुणिताभिलाषः कृष्णोमूर्छित्याह तस्या उरः पाटलपुष्पवदरुणेन नखेनांकितं
दृशौ निद्रया लोहिते अधरशोणिमा चुंबनादिना क्षालितः केशा विलुलिताः स्रस्ताः स्रजश्च ये भ्यस्ता दृशाः वंधशैथिल्यादि

मीलद्दृष्टि मिलत्कपोलपुलकं शीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरं श्यामो
त्तुंगपयोधरोपरि परिष्वंगी कुरंगीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननं ५ तस्याः पाटलपा
णिजांकितमुरो निद्राकषाये दृशौ निर्धौताधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः कांचीदामदरश्ल
थांचलमिति प्रातर्निखातैर्दृशोरेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं ६ व्यालोलः केशपाश
स्तरलितमलकैः स्वेदलोलौ कपोलौ दष्टा बिंबाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः कांचीकांचि
द्गताशां स्तनजघनपदं पाणिना छाद्य सद्यः पश्यन्ती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति ७

नस्ततः प्रस्तुता इत्यर्थः कांचीदामेषत् श्लथप्रांतभाग एभिर्मनो वैवश्यापादकत्वात् कामशरैः प्रातः समये पत्युर्दृशोर्निखातैर्लग्नैर्मनो
विद्धमिति तदद्भुतमभूत् अन्यतोर्पितशरैरन्यच्छिद्धमित्याश्चर्यमित्यर्थः ततः प्रत्यंगं पुनः पुनः पश्यन्नतृप्तिं जगामेत्यर्थः ६ तन्म
नः किलितं तस्या एव भावनया द्योतयति इयं श्रीराधा विमर्दितमालाधरापि मां प्रीणयति न केवलमीदृशी अपितु स्तनजघन
पदं सद्यः पाणिना छाद्य सत्रपं यथा स्यात्तथा मां पश्यती वसनादिच्युतिरिक्त सहजप्रत्यंगशोभादर्शनात्प्रीणनं तत्कालीनतत्
शोभां व्यनक्ति केशपाशो व्यालोलः विक्षिप्त इति अलकैस्तरलितं धान्येन धर्ममिव तदभेदेत्तृतीया कपोलौ स्वेदेन लोलौ व्या
प्तावित्यर्थः बिंबाधरश्रीः क्षता कुचकलशयोः रुचा स्पर्द्धयैव हारयष्टिः हारिता हरितांगमिता कांची काचिद्दिशंगता रसावेश
शैथिल्येनिजांगेक्षणात् आत्मनः क्रीडाविशेषावकलनात् सत्रपत्वमित्यर्थः ७

Dr. Urmila Sharma Collection, Varanasi

गी० इदं श्रीजयदेवभणितं कर्तृ रसिकजनेषु भक्तिरसविशेषवत्तेषु श्रीकृष्णभक्तिरसविशेषु श्रीकृष्णस्य मनोरमरतिरसेयोभावस्तदास्वादरू
३० पयस्तेन यो विनोदः सुखं तं जनयतु यतः प्रतिपदं निगदितो मधोरिपोर्मोदो यत्र तत् ८ एवं कौतुकपरस्य मिथः श्रीनिकृष्णोपक्रमोत्तर-
ह:केल्यारंभमाह प्रत्यूह इत्यादिना यस्मिन्सुरतारंभे प्रत्यूहो विघ्नोपि अहमहमिकापरीतचेतसोस्तयोः प्रियंभावुकः प्रीतिजनकोऽभू
त् सविविधसंभ्रमावस्थामादकसुरतारंभः उद्भूतो बभूव अन्यत्रारंभे मध्येवा प्रत्यूहो दोषजनको दृष्टः इह तादौ मध्येपि प्रत्यूहउत्त रो
त्तरः क्रीडारंभकः एवंत्वारंभस्याद्भुतत्वं सूचितं कुत्र केन प्रत्यूह इत्याह निबिडाश्लेषे कर्तव्ये पुलकांकुरेण क्रीडाकूतविलोकने नि
मिषेण अधरसुधापाने कथाभिर्नर्मभिः आनन्दाधिगमेन मन्मथकलायुद्धे आनन्दाधिगमेनेत्यर्थः इति अनेन एतत्केली

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदं ८
प्रत्यूहः पुलकांकुरेण निबिडाश्लेषे निमेषेण च क्रीडाकूतविलोकनेऽधरसुधापाने कथानर्मभिः आनन्दाधि
गमेन मन्मथकलायुद्धेपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः २ दोर्भ्यां संयमितः पयोधरभ
रेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः हस्तेनानमितः कचेऽधरसु
धापानेन संमोहितः कांतः कामपि तृप्तिमापत्तदहो कामस्य वामा गतिः ३ मारांके रतिकेलिसंकुलरणारंभे त
या साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमात् निस्पंदा जघनस्थली शिथिलता दोर्वल्लिरुत्कंपि
तं वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिद्ध्यति ४ प्रत्यूह एवं बंधनादिक
नांपरमप्रेमविलासत्वं दर्शितं २ नकेवलं
मपि प्रीतिजनको बभूवेत्याह मध्यमावस्थामाह राधा विविधविलासपूर्णा निपुणाः कांतः श्रीकृष्णः कांतया संयमनादि
भिः परिभूतोपि तृप्तिं प्रति क्षणविलक्षणविलक्षणां सुखसंततिं प्राप तदहो कामस्य वामा लोकरीतिः इति रागतिरित्याश्चर्यं
एतदेवोपपादयति दोर्भ्यां बद्धः पयोधरभारेणापीडितः नखैराविद्धः दंतैः क्षतोधरपुटो यस्य तादृशः कृतः श्रोणीतटेनाहतः हस्ते
न केशं धृत्वानमितः अधरसुधापानेन विवशीकृत इति ३ अथो यांत्यावस्था सूचयन्नंत्यावस्थामाह रतिकेलिरेव संकुल ३०
रणः परस्पराहतसंग्रामस्तस्यारंभे तया प्रकटिता नितिप्रोढिजनितभ्रमातिप्रायया श्रीराधया कांतजयाय उपरि कांतस्योपरि साह
साहसप्रायं व्यस्तसमस्तोचितकृत्यं यत् किंचित्प्रारंभितं तत्संभ्रमात् संभ्रमजनितायासात् संभ्रमजनितायासमेवाह जघनस्थली जा
ड्यानिस्पंदा जाता दोर्वल्ली शिथिलिता च वक्ष उच्चैः कंपितं अक्षि मीलितं जातमेकत्वं एतदेवार्थांतरन्यासेन द्रढयति सर्वावस्थास्व ३०
पि अतिभीरुतया प्रसिद्धानां स्त्रीणां पौरुषरसः कुतः सिद्ध्यति कीदृशे रणारंभे मारांके केलिपक्षे मारः कामः रणपक्षे मारणं उभय

CC0. In Public Domain, Digitizagtion by eGangotri

अनुगतत्वं प्रकटयन्नाह अहं त्वत्स्पर्शानुकूले निजकरकमलेन तव चरणयोरहं संवाहनादिरूपां पूजां करोति यतस्त्वं विदूरमागमितासि आनितासि दूरगतपूजायुक्तैवेत्यर्थः तदर्थं क्षणं शयनोपरि नूपुरमिव मामंगीकुरु उभयं विशिनष्टि अनुगतो निपुणः अनुगतस्य पादलग्नस्य उपकाराचरणयुक्तमेवेत्यर्थः १ पूज्यानुज्ञां विना पूजा न संभावहेत्यनुज्ञां प्रार्थयते वदनेति अमृतमिव वचनं वदनमधरव देत्यर्थः कुतोऽमृतत्वमाह यतो वदनेन्दोर्गलितं अतो नुकूलं मत्साध्वसापहारि किमेतावता नवेष्सितं सेत्स्यति दुकूलमपसारयामि कुतः पयोधररोधकं कमिव विरहमिव यथा विरहेणापयोधरदर्शनं विच्छिद्यते तथानेनापीत्यर्थः २ ततो वक्रमवलोकयंतीं प्रतिहि मंदुरसि कुचकलसं स्थापय उरस्येवार्पणे हेतुमाह अतिदुर्लभं दुरापस्य हृद्येव धारणीयोऽर्पयत्वादित्यर्थः तर्हि कथं तत्प्राप्तिस्तवा तत्राह प्रियस्य मम परिरंभणाय यो रभस उत्साहस्तेनोच्छलितमिवोत्प्रेक्षे उत्प्रेक्षापि कुतः पुलकितं यथा न्तर्गतं वलोकात्करणस्तदार्त्तिशमनाय पुलकितो

करकमलेन करोमि चरणमहमागमितासि विदूरं क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं २ वद
नसुधानिधिगलितममृतमिव रचय वचनमनुकूलं विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं ३ प्रि
यपरिरंभणरभसवलितमिव पुलकितमतिदुरापं मदुरसि कुचकलसं विनिवेशय शोषय मनसिजतापं
४ अधरसुधारसमुपनय भाविनि जीवय मृतमिव दासं त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासं २
५ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादं श्रुतियुगले पिकरुतविकले शमय चिरादवसा
६ दं मममति विफलरुषा विकलीकृतमवलोकितुमधुनेदं मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदं ७
ममर

भेष्यति तद्रहस्यमपीत्यर्थः किमर्थं तं विनिवेशयामि कामतापं स्वेद्य रसायनकलसार्पणात्तापोपशांतिः स्यादेवेत्यर्थः ४ अन्यथा मद्दशा मीदृशी वस्यात् हे भाविनि वक्रदृष्ट्यावलोकनाद्भामिनीत्युक्तं अधरसुधारसं देहि किमर्थं मृतमिव दासं जीवय अमृतं दत्वा मृतमिव मां जीवयेत्यर्थः तत्रात्मनोऽनन्यगतित्वं आह त्वय्येवार्पितं मनो येन तं ननु तव कामपीडानलः क्वास्ते तत्कथं तथाभूतमात्मानं कथयसि इत्यत आह विरहानलेन दग्धं वपुर्यस्य तं तदपि कुतः अविलासं विलासाभावादित्यर्थः ५ मौनेन तत्स्मृतिमालक्ष्य लोभादन्यपि प्रार्थयते हे शशिमुखि मणिरसनागुणं मुखरीकुरु कीदृशः अनुगुणः सदृशः कंठनिनादो मणितादिकं यस्य प्रार्थनविशेषोऽयं तेन किं स्यात् अत आह मदमश्रुतियुगले चिरकालीनमवसादं दुःखं शमय तदावसादएव कुतः पिकरुतैर्विकले बधिरीकृते ६ मध्यकारणको येतव नयनमेव प्रमाणमिति निगद्य प्रार्थयते इदं तव नयनमधुना मामवलोकितुं लज्जितमिव मीलति किमिति लज्जितं प्रत्यकारणकोपेन विकलीकृतं यः कश्चित् निरपराधं कुपिताकुलीकरोति सोपि तन्मुखावलोकने लज्जितो भवतीत्यर्थं तदर्थं मधुना किं कर्त्तव्यं तदुपदिशे त्य

वि

Dr. Urmila Sharma Collection, Varanasi

Dr. Urmila Sharma Collection, Varanasi

गी०
।२।

एवमात्मनस्तद्योग्यतामापाद्य सिद्धेपि प्रतिज्ञातेर्थे अधिकारि जिज्ञासा भवतीति हृदयविनोदकत्वाभावात् कदाचिन्मंदजनाः अत्र
न द्दधुरित्यधिकारिणोपि निश्चिन्वन्नाह यदीति भो भक्तजन यदि हरिस्मरणे श्रीकृष्णानुचिंतने मनः सरसं शृंगारोज्वलरसवासितं य
दि च विलासस्य रासकुंजादिलीलायाः कलासु वैदग्धीचारुचेष्टासु कुतूहलं कौतुकमस्ति तदा जयदेवकवेः सरस्वतीं वाणीं शृणु तत्तन्ना
स्ति चेन्न एकवचनेनाधिकारिवैरल्यं सूचितं एकवचने च केषांचित् सामान्यस्मरणमात्रं केषांचित् विशिष्टरासकुंजादिलीलावक
लेनमित्युभयोरुपादानं कीदृश्यसौ यस्मादेवमधिकारिणोपि निश्चिनोपि दुत्याह शृंगाररसप्राधान्यात् मधुरा झटित्यर्थावगतेः को
मला गेयत्वात् कांता क्रमश्री याय पदावली पदश्रेणीयस्यां ताम् एभिः पदैः संबंधाभिधेयप्रयोजनाधिकारिणोपि दर्शिता ॥ श्रीराधा
माधवयोः रहः केलयोऽत्राभिधेयाः प्रतिपाद्यप्रतिपादकभावः सम्बंधः तत्केलीनामनुमोदनजनितानंदविशेषानुभवः प्रयोजनं ए

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलं मधुरकोमलकांतपदावलीं शृणु तदा जय
देवसरस्वतीं ॥ ३ ॥ वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो
दुरूहद्रुते शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोयीकवि

तद्रसज्ञाविताः तः करणोऽधिकारी ॥ ३ ॥ अथैतद्वावेशेनैवान्यत्र प्राकृतवर्णनप्रायतामालोक्यात्मनः प्रौढिमा विस्कुर्वन्नाह वाच इति
उमापतिधरनामाकविर्वाचः पल्लवयति विस्तारयति मात्रेनकाव्यगुणयुक्ताः करोति पल्लवग्राहि दोषोऽस्य शरणनामाकविर्दुरूहस्य
दुर्बोधस्यकाव्यस्यद्रुते शीघ्ररचने श्लाघ्यः नतु प्रसादादिगुणयुक्ते शृंगार एवोत्तरः श्रेष्ठो यत्र सत्प्रमेयस्य सामान्यनायकनायिकाप्राय
वर्णनस्य रचनैराचार्यगोवर्द्धनस्य स्पर्द्धी कोपि न नतु रसांतरवर्णनैः धोयीनामा कविराजः श्रुतिधरः प्रसिद्धः श्रवणमात्रेणान्यथा
दिधारी न तु स्वयं कवितया गिरां संदर्भः गुणालंकाररचनाविशेषः तस्य शुद्धिं शोधनप्रकारं जयदेव एव जानीते जानाति केवलम
गवद्गुणवर्णनतया तद्वाग्विसर्गो जनताघविप्लव इत्युक्तेः अथवा काकादेन्योक्तिरियं यथा गिरां संदर्भशुद्धिं किं जयदेव एव जा
नीते न जानीते एव यतः उमापतिधरः वाचः पल्लवयति नूतनयति शरणः दुरूहद्रुते श्लाघ्यः गोवर्द्धनाचार्यस्य तुल्यस्तु नास्त्ये
व धोयी तु कवीनां राजा श्रुतिधरश्च यद्यपि स्वयं दैन्येनैवमुक्तं तथापि सरस्वती पूर्वार्थमेव प्रमाणयति ॥ ४ ॥ ।२।

CC0. In Public Domain, Digitizagtion by eGangotri

श्यामा निविडांधकारैरलक्षिता॥ अतोऽत्रन कापि शंकाइत्यर्थः॥ एतदनंतर एतल्लीलावसरे सखीयं वक्ष्यति। अद्दृणोर्निक्षिपदंजन
मित्यादिना। ततो विशन्वनं चंद्रज्योत्स्नायावधिभाव्यते। तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः इति श्रुकोक्तिवत् जयत्यर्थे नमस्का
र आक्षिप्यते। इति काव्यप्रकाशोक्तेर्नमस्क्रियाचसूचिता। श्रीराधामाधवयोः रहः केलयोऽत्र प्रतिपाद्याः। अतो वस्तुनिर्देशोपि। एवंपद्य
त्रयं प्रतिपादनेन महाकाव्यमुख्यत्वमुक्तं यथोक्तं काव्यदर्शे। स्वर्गबंधो महाकाव्यमुच्यते तस्य लक्षणं। आशीर्नमस्क्रियावस्तुनिर्देशोवा
पि तन्मुखमिति। राधामाधवयोरित्यनेन तयोरन्योन्याव्यभिचारि विद्योतमानसूचिता यथोक्तं ऋक्परिशिष्टे राधया माधवो देवो माध
वेनैव राधिका। विभ्राजंते जनेष्विति॥ १॥ एवमाद्येकपद्यसूचितकेलिस्फुरणोपस्थापितानंदपूराप्लावितांतःकरणतयोद्योत्कारुण्यो
नाधुनिकभक्तजनानुग्रहपरवशः सन् कविरेतत्केलिव्यक्तिकरणाय प्रबंधमनुसंदधदात्मनस्तत्सामर्थ्यसमर्थयन् प्रतिजानिते वाग्दे

मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तंभीरुरयं त्वमेव तदिमं राधे गृहं प्रापय। इत्थं नंदनिदेशतश्च
लितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः॥ १ वाग्देवताचरितचित्रितचित्त
सद्मा पद्मावतीचरणचारणचक्रवर्ती॥ श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं २॥

वतेति। जयं सर्वोत्कृष्टं श्रीकृष्णं द्योतयति स्वभक्त्या प्रकाशयतीति जयदेवः। अतः स एककविः तद्गुणवर्णन कृती एतं श्रीगीतगोविंदा
ख्यं प्रबंधं प्रकर्षेण बध्यते स्वाशक्तं क्रियते श्रोतॄणां हृदयमिति प्रबंधस्तं करोति प्रकाशयति। श्रोतृहृदयंबंधनशक्तिरस्य कथं स्यादत्राह श्री
रत्नोन्यनायिकानंगीकारात् पूर्वोक्तराधा वसुस्वंशेन दीव्यतीति वसुदेवः श्रीनंदः द्रोणो वसूनां प्रवर इत्युक्तेस्तस्यापत्यं वासुदेवः माधवस्तयोर्या
मिथोरतिकेलिकथास्ताभिः समेतं तल्लीलाविशेषवर्णनरूपमित्यर्थः। एवं चेत्कथमयं तत्कर्तृत्वं शक्नुयादत आह वाचां वक्तृत्वेनोप
स्थितानां तत्स्वकेलिमयीनां देवतासेवकाप्रवर्त्तकस्य। श्रीकृष्णस्तच्चरित्रेण चित्ररूपेणालिखितं चित्तरूपं सद्मगृहं यस्य सः। इंद्रियश
क्तिं हि देवताधीनानि जेष्टदेवतं वाग्देवतात्वेन निरूपितमत एतत्कर्तृत्वं तत्रैव पर्यवस्येत्। तथा चित्तस्य फलकत्वेन चरित्रस्य चित्रविशेषविनि
रूपस्माद्यथा चित्रविशेषः फलकमधिष्ठाय स्वयमेव प्रकाशयतीति तत्पात्रापीत्यर्थः। एवं वाचां मनसो वृत्तेर्माधवपरतोक्ता एतावतापि
कथं तच्छक्तिवत्तः कायिकवृत्तेः श्रीराधिकापरत्वमाह पद्मं विद्युत्ते करे यस्याः सा पद्मावती श्रीराधा शरावत्यादिनामित्यादिव्यहरणात्
दीर्घः ते स्यापरस्यो निमित्तभूतयोरेव चारणचक्रवर्ती नर्त्तकश्रेष्ठः॥ नत्यादिना सपत्नं दाराधनपर इत्यर्थः। अनेन तत्प्राधान्योपा
सनात्मनोदर्शिता। २।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० ।३।

हे धृतनरहरिरूप तवकरकमलवरे नखमस्ति। कीदृशं। आश्चर्यभूतमग्रभागो यस्य। अद्भुतत्वमेवाह विदारितो हिरण्यकशिपो
र्दैत्यस्य तनुरूपो भृंगो येन अन्य द्विकमलाग्रं भृंगेन दल्यते इदं तु भृंगस्य दालीत्यद्भुतत्वेन नखस्येत्यर्थः। अनेनैव नृसिंहस्य व
त्सलरसाधिष्ठातृत्वं ज्ञापितं।४। अपि च कपटदैन्यादिनाप्याह हे धृतवामनरूप हे अद्भुतवामन। विक्रमणेन पदक्रमणेनापि मित्रे
णापादय बलिं वंचयसि अद्भुतत्वमेवाह यदनखनीरेण जनितं जनानां पावित्र्यं येन हे तादृश जय। अनेनैव वामनस्य सख्यरसाधि
ष्ठातृत्वं ज्ञापितं।५। न सकृन्मात्रपरपीड्याः सकृत् तत्पीड्यापीत्याह। हे धृतभृगुपतिरूप क्षत्रियाणां यद्रुधिरं तन्मये पयसि जलेन
लरूप कुरुक्षेत्रस्थ तीर्थे जगत्प्रशमितमपगतपापं यथा स्यात्तथा स्नपयसि। कीदृशं तेन स्नपनेन समितः संसारतापो यस्य
तादृशं तत् स्यानेपापसृयात् ज्ञानोत्पत्त्या भवतापशांतिरित्यर्थः। अनेनैव परशुरामस्य रौद्ररसाधिष्ठातृत्वं ज्ञापितं ६ न चैता

तवकरकमलवरे नखमद्भुतशृंगं। दलितहिरण्यकशिपुतनुभृंगं। केशव धृतनरहरिरूप जय०४ छलयसि वि
क्रमणे बलिमद्भुतवामन। पदनखनीरजनितजनपावन। केशव धृतवामनरूप जय०५। क्षत्रियरुधिरमये ज
गदपगतपापं। स्नपयसि पयसि शमितभवतापं केशव धृतभृगुपतिरूप जय०६। वितरसि दिक्षु रणे दिक्पति
कमनीयं। दशमुखमौलिबलिं रमणीयं। केशव धृतरामशरीर जय०७। वहसि वपुषि विशदे वसनं जलदाभं ह
लहतिभीतिमिलितयमुनाभं। केशव धृतहलधररूप जय०८। निंदसि यज्ञविधेरहह श्रुतिजातं सदयहृदयद
र्शितपशुघातं। केशव धृतबुद्धशरीर जय जगदीश हरे।९।

वताप्रियावियोगादिदुःखसहनेनाप्याह। हे धृतरघुपतिरूप संग्रामे दशसु दिशासु रावणस्य ये मस्तकास्ते एव उपहारस्तं ददासि किमि
त्यचेतना सुदिक्षु बलिदानं। दिशां पतीनामिंद्रादीनां भीषु तैरपि कथं तत्बलिः कांक्ष्यते रमणीयं परोद्वेजकस्य रावणस्य मौलिबलिस्ते
षां रतिजनक एवेत्यर्थः। अनेनैव श्रीरामस्य करुणारसाधिष्ठातृत्वं ज्ञापितं ७। नैतावन्मात्रं स्वप्रेयसी प्रेमरूपक्लेशायनोदनया त्वमक्त
यमुनाकर्षणादिनाप्याह। हे धृतहलधररूप त्वं शुभ्रे वपुषि जलदवन्नीलं वसनं धारयसि हलेन हतिर्हननं तद्भीत्या मिलिताया य
मुनातद्वदाभा यस्य तत्। अनेनैव हलधरस्य हास्यरसाधिष्ठातृत्वं ज्ञापितं ८। किं च निजाज्ञारूपवेदविरुद्धवादप्रवर्तनेनाप्याह त्वं यज्ञ
विधेयज्ञविधायकवेदवाक्यसमूहं निंदसि इति अहह इत्यद्भुतं स्वयं वेदानां प्रकाशस्त्वं स्वयमेव निंदसीत्यद्भुतं तत्प्रकारमाह दर्शि
तपशूनां घातो यत्र तद्यथा स्यात्तथा तदेव व्यनक्ति। कथं निंदसीत्याह पशुषु सदयं हृदयं यस्य हे तादृश अहिंसा परमो धर्म इत्या
दिरैत्यमोहनाय पशुसदयासहितत्यर्थः। अहे पयः पोषद्रव दैत्यानां यज्ञकरणमनुचितमिति तन्मोहनं युक्तमित्यर्थः। अनेनैव बुद्धस्य शा

गीतगोविन्द टीका ।३।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तत्केलीनां सर्वोत्कर्षप्रतिपादनायादौ शृंगिनः शृंगाररसांगभूतविभत्सादिरसाधिष्ठातॄणां मत्स्याद्यवताराणां चरितवर्णनैर्मुख्यो
ग्युज्ज्वलरसस्याधिष्ठातुरवतारिणः श्रीकृष्णस्य अखिलनायकशिरोरत्नतां प्रतिपादयिष्यन् सर्वोत्कर्षं विभावनं प्रार्थयते प्रलयेत्या
दिना वसंते वासंतीत्यंतेन। गीतस्यास्य मालवरागो रूपकतालइत्याह। मालवेति। एवमग्रेप्युह्यं तल्लक्षणं यथा। नितंबिनी चुंबितवक्त्र
बिंबः शुकद्युतिः कुंडलवान् प्रमत्तः। संगीतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराजः। विरामांतद्रुतद्वंद्वं रूपकः स्यादिलक्षण।
इति केशवइति केशिदैत्यनिसूदन श्रीकृष्ण जय सर्वोत्कर्षमाविष्कुरु। तदाविष्करणसामर्थ्यहेतुः हे जगदीश जगतां प्राकृतानामीश
नशील। तथाविधत्वेपि कारुण्यमाह। हरे हरति भक्तानामशेषक्लेशमिति हरिः हितत्वाविधतत्क्लेशहर त्वं तदेकप्रयोजनमात्रावतार
त्वेन प्रतिपादयन् रसानां दशाधिष्ठातॄन्नाह। तत्रादौ मीनरूपेणानौकारूपपट्टविध्याकर्षणेनाह प्रलयेति। धृतेत्यादि च यथा विस्फुरितम
त्स्याकारं शरीरं येन हे तथाविध जय जय जगदीश हरे इत्येव ध्रुवपदं प्रतिपदमनुवर्तमानत्वात्। यथोक्तं ध्रुवत्वाच्च ध्रुवः।

॥मालवगौडारागे रूपकतालेन च गीयते॥ प्रलयपयोधिजले धृतवानसि वेदं। विहितवहित्रचरित्रमखेदं केशव धृतमीनशरीर जय जगदीश हरे॥१॥ क्षितिरति विपुलतरे तव तिष्ठति पृष्ठे। धरणिधरणकिणचक्रगरिष्ठे केशव धृतकच्छपरूप जय जगदीश हरे॥२॥ वसति दशनशिखरे धरणी तव लग्ना। शशिनि कलंककलेव निमग्ना केशव धृतसूकररूप जय जगदीश हरे॥३॥

गश्चांति मामत इति। मीनचरितमाह। तदाकर्षणप्रकारमाह प्रलयकालीनायेसमुद्रास्तेषामेकीभूते जले निमग्नं वेदमखेदं यथास्या
त्तथा धृतवानसि। तत्प्रकारमाह। कृतं नौकायां अरित्रं यत्र तद्वित्यपि क्रियाविशेषणं वेदरक्षणपूर्वकं सत्यव्रतं प्रलयक्लेशाद्यावित्य
र्थः। अनेनैव मीनस्य विभत्सरसाधिष्ठातृत्वं विज्ञापितं १ न केवलं तदाकर्षणमात्रेणापि तु तद्धारणस्थित्यपीत्याह क्षितिरिति सर्व
त्र पूर्ववन्मुखवंधयोजना हे धृतकच्छपरूप तव पृष्ठे क्षितिस्तिष्ठति न तु पंचाशत् कोटीयोजनविस्तीर्णा कथं मम पृष्ठे स्थितेत्यत्राह अ
ति शयेन विपुलतरे पृथिव्यपेक्षयाप्यधिकविस्तीर्णे पुनः कीदृशे धरण्या धरणेन यत्किणचक्रं शुष्कव्रणसमूहस्तेन कठिने अ
नेनैव कूर्मस्याद्भुतरसाधिष्ठातृत्वं विज्ञापितं २ न चैतावतातद्वहनपूर्वां भ्रमनेनाप्याह हे धृतसूकररूप तव दंताग्रे धरणी लोकधा
रणाकर्ष्यविलग्ना वसति। कुत्र केव शशिनि चंद्रे निमग्ना कलंकस्य केव। अत्र दशनस्य बालचंद्रेणोपमा धरित्र्याः कलंकस्य क
लया। एतएव निमग्नशब्दोपादानं अनेनैव वराहस्य भयानकरसाधिष्ठातृत्वं ज्ञापितं ३ नात्मनः क्लेशसहनमात्रेण परपीडया

Dr. Urmila Sharma Collection, Varanasi

गी०

॥४॥

प्रथते नैव श्रीकृष्णस्य सर्वनायकशिरोरत्नत्वप्रतिपादनाय धीरोदात्तादिचतुर्विधनायकगुणसमन्वयेन सर्वोत्कर्षाविर्भावनं प्रार्थ
यते श्रितकमलेत्यादिभिः गीतस्यास्य गुर्जरी रागः निःसारुतालः तल्लक्षणं यथा। यथा मासुकेशीमलयकुमारणांमदुलसत्यल्ल
वतल्लयाताश्रुतेः स्वरांशाग्रहधतीविभागतं वीरुरवाद्दक्षिणगुर्जरीयं। द्रुतद्वन्द्वालघद्वंद्वं निःसारुः स्यादिति तत्र परमव्योमनायत्वेन धी
रललितत्वमाह। श्रितकमलेति श्रितमाश्रितं लक्ष्म्याः कुचमंडलं येन हे तादृश अनेन विदग्धत्वपरिहासविशारदत्वे सूचिते अत
एव धृते कुंडले येन हे तादृश धृता सुंदरी वनमाला येन हे तादृश अनेन विशेषणद्वयेन नवतारुण्यत्वं निश्चिंतत्वं तेनैव वेशवि
न्यासिद्धिः हे देव हे हरे जयोत्कर्षमाविष्कुरु इति सर्वत्र योजना। वीप्सात्वावेशेन। जयजयदेव हरे। इति ध्रुवपदं विराधो
नवतारुण्यः परिहासविशारदः निश्चिंतो धीरललितः स्यात्प्रायप्रेयसीवशः इत्यपि तत्रैव धीरललितलक्षणं १ अथ सू जनरंजन

श्रितकमलाकुचमंडल धृतकुंडल। कलितललितवनमाल। जयजयदेव हरे। १। दिनमणिमंडलमंडन भ
वखंडन। मुनिजनमानसहंस। जय०। २। कालियविषधरगंजन। जनरंजन। यदुकुलनलिनदिनेश। जय०। ३। मधुमु
रनरकविनाशन गरुडासन। सुरकुलकेलिनिदान। जयजयदेव हरे ॥४॥

र्यमंडलांतर्ध्येयत्वेन धीरशांततामाह। सूर्यमंडलं पूज्यत्वोत्पादनेन भूषयतीति हे तथाविध जय इति क्लेशसहनत्वं विनया
दिगुणोपेतत्वं च अत एव मननशीलानां मानसहंस मानसे सरसि हंस इव सदा तच्चित्ते स्थित इत्यर्थः अनेन समप्रकृतिकत्व विन
यादिगुणोदितत्वे अतस्तत्संसारं नाशयतीति हे तादृश इति विवेचकत्वं धीरशांतलक्षणं तत्रैव समप्रकृतिकः क्लेशसहनश्च विवेच
कः विनयादिगुणोपेतो धीरशांत उदीर्यते इति निजोपास्यत्वेपि ध्येयविशेषणत्वेन धीरोद्धतत्वमाह द्वाभ्यां। कालियनामा विषध
रः सर्पस्तस्य गंजने नंजनान् विनाम त्वेदनंजेना इतिवत् ब्रजजनान् रंजयतीति हे जनरंजन जय किमि[illegible]तान् रंजयामित्याह यदुकु
लमेव नलिनं तस्य दिनेश सूर्य्य यादवानां हितार्थी यथा तोषि रविशोभया इत्यादि वचनात् गोपा एव पा[illegible] गोपकुलप्रकाशने
इत्यर्थः कालियेति मात्सर्य्यवत्वं जनरंजनेति यदुकुलेति चाहंकारित्वं अहं तथैव ममतया जनं रंजने[illegible]सिद्धिः धीरोद्धतलक्षणं
च मात्सर्य्यवानहंकारी मायावी रोषणश्चलः विकत्थनश्च विद्वद्भिर्धीरोद्धत उदाहृत इति ३ तस्यैव दारकोद्धतपास्यत्वेनाप्याह म
धुमुरनरकान् विनाशयतीति हे तथाविध जय गरुडः पक्षिराजस्तमासनं यस्य सुरकुलकेलीनां निदान आदिकारण एतैर्मायावी ।४।

CC0. In Public Domain, Digitizagtion by eGangotri

युद्धधर्मं विना निर्दयतया प्राणिवधेनापीत्याह। हे धृतकल्किशरीर त्वं म्लेच्छनिवहस्य नाशनिमित्तं करवालं खड्गं कलिहल्योः कामधे
नुत्वात् कलयसि धारयसि। कीदृशं किमप्यनिर्वचनीयमतिशयमित्यर्थः। करालं भयंकरं। कमिव धूमकेतुं तन्नामापकेत्वपातिको
ग्रहविशेषस्तमिव अनेनैव कल्किनो विररसस्याधीष्ठात्त्वं ज्ञापितं। १०। एवं प्रत्येकांगरसाधिष्ठात्पुरस्कारेणैव निवेद्य समुदितांगि
रसाधिष्ठात्पुरस्कारेणानिवेदयति हे धृतदशविधिरूप श्रीकृष्ण जय। श्रीजयदेवकवेर्मम इदमुदितं शृणु। कीदृशं शुभदं जगन्मंग
लप्रदं यतो भवस्य जन्मनस्तव दवतारणांसारं आविर्भावरहस्यं यत्र तत्। अत एवोदारं परमं महत्। ततः सुखदं परमानंदप्रदं। ज
न्मगुह्यमिदमिति श्रीशुकोक्तेः। ११। अथ वर्तमानशतृप्रत्ययैरवताराणां तत्तल्लीलानां च नित्यत्व प्रतिपादनेन श्रीकृष्णस्य नित्य

म्लेच्छनिवहनिधने कलयसि करवालं। धूमकेतुमिव किमपि करालं। केशव धृत कल्किशरीर जय जगदीश हरे १०
श्रीजयदेवकवेरिदमुदितमुदारं। शृणु सुखदं शुभदं भवसारं। केशव धृतदशविधिरूप जय जगदीश हरे। ११।
वेदानुद्धरते जगंति वहते भूगोलमुद्बिभ्रते दैत्यं दारयते वलिं छलयते क्षत्रक्षयं कुर्वते। पौलस्त्यं जयते हलं कलय
ते कारुण्यमातन्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः। ५। गुर्जरीरागेणानिःसारुत्तालाभ्यां।

तत्तदवतारलीलत्वं वक्तुमुक्तगीतार्थमेकश्लोकेन वध्नन्नाह। दशावतारान् कुर्वते श्रीकृष्णाय सर्वाकर्षकानंदाय तुभ्यं नमोऽस्तु द
शाकृतिकृतत्वं प्रकटयन्नाह मीनरूपेण वेदोद्धारं कुर्वते कूर्मरूपेण भुवनानि वहते। वराहरूपेण पृथिवीमंडलमूर्द्ध्वं नयते। नरसिं
हरूपेण हिरण्यकशिपुं विदारयते वामनरूपेण वलिं छलेनात्मसात्कुर्वते परशुरामरूपेण दुष्टक्षत्रियाणां नाशं कुर्वते। श्रीरा
मरूपेण रावणं जयते वलभद्ररूपेण दुष्टदमनाय हलं धारयते बुद्धरूपेण कारुण्यं विस्तारयते। कल्किरूपेण म्लेच्छान्नाश
यते। एतेषामवतारित्वेन श्रीकृष्णस्य सर्वरसाश्रयत्वं सिद्धं मल्लानामशनिर्नृणामित्युक्तेः। अत एवैकादशभिः पद्यैः समाप्तिः
बुद्धो नारायणो यज्ञो न सिंहो नंदनंदनः वलः कूर्मस्तथा कल्की राघवो भार्गवः किरिः। मीन इत्येषु कथिताः क्रमाद्द्वादश
देवताः इति भक्तिरसामृतसिंधोरसाधिष्ठातारः। ५।

Dr. Urmila Sharma Collection, Varanasi

गी०

॥५॥

तदेवं केलिवर्णनोपयुक्तनायकगुण प्रतिपादनपुरःसर्वमंगलसंगमनेनैव माधवोत्कर्षमाविष्कृत्य उपक्रमोक्तश्रीराधामाधवरहःकेलि
वर्णनोत्कलिकोच्छलितचित्तः कविः दक्षिणधृष्टशठनायकगुणासमतनयेन श्रीराधायां श्रीकृष्णस्यानुकूलनायकतापादनाय सूचीकटा
हन्यायेन श्रीमुकवत्साधारणेनान्याभिः सह विहरणं समापयितुं कामस्तेनैव श्रीराधायाः सर्वोत्कर्षमाविष्कर्तुं तत्र तस्याः प्रोषितनायिका
वस्थाः वर्णयन् संभोगपोषकविप्रलंभशृंगारवर्णनाय प्रथमं विरहोत्कंठितावस्थामाह। उत्कंठितालक्षणं यथा उद्दाममन्मथम
हाज्वरवेपमाना रोमांचकंचुकितमंगमलं वहंती समोहवेपथुघनोत्पुलकाकुलांगी मुत्कंठितां वदति तां भरतः कवींद्र इति। वसंतसमये स
हचरति। न क्वापि कार्यार्थे हीयते इति। सहचर्यत्यंतविश्वासभूमिः। श्रीराधिकां प्रतिसरसंभाष्यासहेतुभूतमप्युत्कंठातिरेकजनक
गूढाभिप्रायमिदमूचे श्रीकृष्णाभिप्रायं ज्ञापयितुमिति ज्ञेयं। कीदृशी माधवीपुष्पतोपि कोमलैरंगैरुत्पलच्छितापि विरहतापसहनाश
क्तापत्र पत्रनीयते किंचित्साहश्यदर्शनात्तत्र तत्र दुर्गमेव मिनिभ्रमंती। ननु कांतारे तैरपि कथं भ्रमंति कांचरपिस्यातुमशक्नुवत्याव

वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कान्तारे बहुविहितकृष्णानुसरणां ।
अमंदं कंदर्पज्वरजनितचिन्ताकुलतया वलद्बाधां राधां सरसमिदमूचे सहचरी ॥७॥

उपकारं कृतं कृष्णान्वेषणाय यातां कृष्णान्वेषणायेत्यर्थः। तदपि कथं करोति अमंदं यथा स्यात्तथा कंदर्पेण तत्राभिलाषेणायो
ज्वरस्तेन जनिता या चिंता नानोपायविचारः तयाकुलतया वलवती पीडा यस्यास्तां। अत्र तां विहायान्याभिः सह तस्य श्रीकृष्णस्य
विरुद्धविहरणेनेदं गम्यते शारदीयएकारात्रौ प्रेमरासमहोत्सवे श्रीराधिकायाः असमानोर्द्ध्वरूपगुणविलासाननुभूयतस्मांसर्व
रमत्यद्भुतायां द्विनकतिपयानंतरं लीलायमिति अथवा तथा तद्विविलासायोचि
तानुरागेणैवेतत्तदर्थमेवानेकनागरीशंकुलां श्रीमथुरामसौ गतवान् गत्वा च तत्र नागरीप्रभृतीषु कुब्जसुंदरीणामपि रूपगुणादि
काभासमननुभूय श्रीद्वारवतीं तदपि प्राजगाम तत्र नरेंद्रकन्याविवाहास्यापि ततो नरकासुरहृतगंधर्वयक्षनागनरकन्यानां श
ताधिकषोडशसहस्राणि विवाह्य तासु तास्व पिता सामपि साहश्यं न लब्धं ततो दंतवक्रवधानंतरं पुनर्व्रजागमने जाते सत्येव लीलि
यमिति केशिमथनमिति हरिः कुवलयापीडेन सार्द्धमित्यादिवत्स्मारणात्। श्रीपिउर्तिकानंगीकाराच्च ॥७॥ ५

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वतापसमनपूर्वकसर्वाभीष्टप्रदत्वादिवसाहायकरूपेणाधीरोदात्ततामाह द्वाभ्यां निर्मलकमलदलेइवतापशामके लोचने यस्य हे ताहृश जय इति ताहृशलोचनोपलक्षितगंभीरत्वं कथं तापशमकाचमत आह भवं संसारं मोचयतीति हे ताहृश इत्निकरुणत्वं तदपि कुतः त्रिभुवनभवनंयेषां तेषां प्राणिनां निधानं निधिवत्परमप्रियेत्यर्थः। त्रिभुवनानां भवस्योद्भवनस्य निधानो निधिरिव कारणं जनकमित्यर्थः इति विनयित्वं धीरोदात्तलक्षणं यथा गंभीरो विनयी क्षांतो करुणः सुदृढव्रतः। अकत्थनो गूढगर्वो धीरोदात्तः सुसत्वभृदिति। ५ जनकसुतया कृतं भूषणं यस्य हे ताहृश जय इति सुदृढव्रतत्वं जितो दूषणस्तन्नामा राक्षसो येन इत्यकत्थनत्वं संग्रामे शमितो रावणो येन इति च त्रित्वगूढगर्वत्व सुसत्वभृत्वाकत्थनत्वानि। ६ अस्मिन् धीरललितमुख्यता प्रतिपादनाय अजितरूपत्वेन संपूजितमिवस्तमेवाह हे नवीनघनवत्सुंदर जय धृतो मंदरस्तन्नामा गिरिर्येन हे ताहृश क्षिराब्धिमंथन इत्यधिगंतव्यं। आम्यांनवतारेरूपत्वं तदधिगमः कुतः अमियसमद्रमथ

अमलकमलदललोचन भवमोचन। त्रिभुवनभवननिधान जय०॥४॥ जनकसुताकृतभूषण जितदूषण। समरशमितदशकंठ॥६॥ अभिनवजलधरसुंदर धृतमंदर श्रीमुखचंद्रचकोर जय०॥७॥ तव चरणे प्रणता वयमिति भावय कुरु कुशलं प्रणतेषु जय०॥८॥ श्रीजयदेवकवेरिदं कुरुते मुदं मंगलमुज्ज्वलगीति जय०॥९॥ पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य। व्यक्तानुरागमिव खेलदनंगखेदस्वेदांबुपूरमनु०

नाविर्भूतायामुखचंद्रचकोर इच सलालस इति प्रेयसीवसत्वं एते सुके चितगुणा अंशेन श्रीकृष्णे सर्व एव पूर्णतया विराजंत इति सर्वोत्कर्षत्वं अतो अत्रापि नवदैः समाप्तिः। ७ अथ स्वसहिते वितनश्रोतृवक्तृप्रसादं प्रार्थयते हे श्रीकृष्ण तव चरणे वयं प्रणता इति भावय जानीहि त्वा किं कर्तव्यं प्रणतेषु अस्मासु कुशलं तल्लीलानुभवसामर्थ्यं कुरु देहि त्वल्लीलानुभवस्य त्वत्प्रसादं विनानुपपत्तेः परमानंदरूपत्वादित्यर्थः। ८ तत्र स्वानुभवं प्रमाणयति इदं जयदेवकवेर्मम मुदं करोति इदमिति किं मंगलं मंगलाचरणमात्रं कीदृशं उज्ज्वलस्य रसस्य गीतिर्यत्र एवं चेत् किमुत केलीनामित्यर्थः। ९ एवं उभयप्राधान्येनाद्य मंगलमाचार्य्य स्वस्य राधिकैकाश्रयतया तत्सौभाग्यवर्णनेन मध्ये पि मंगलमाचरति एवं प्रार्थ्य श्रीकृष्णे सामान्यनायकगुणानुक्त्वा यनायकविशेषगुणान् कथयन्नेव श्रोतृन्प्रत्याशिषमातनोति पद्मेति मधुसूदनस्य वक्षः मानसं रीत्या श्रीकृष्णस्य उरः वो युष्माकं वांछितमनुनिरंतरं पूरयतु कीदृशं पद्मा श्रीराधा तस्याः पयोधरप्रांतभागपरिरंभाल्लग्नकुंकुमेनांकितां मुद्रां प्रापितमित्यर्थः अत्रान्यामात्र विप्रानुद्दृत्य मिप्राये सावेति भावः अतएव खेलता नंगेन यः स्वेदस्तेषां बुनां पूरः प्रवाहो यत्र तत् अतो स्फुरते व्यक्तः प्रकटीकृतोनुरागो यत्र तदिव अंतरुच्छलितं प्रियानुरागोभ्यांतरे समावेशाभावाद्बहिः काश्मीररूपेणोरस्याविर्भूतमित्यर्थः। १०।

Dr. Urmila Sharma Collection, Varanasi

तस्य कथमीदृशम घटनघटनासामर्थ्यं मदनमहीपतेः सुवर्णकुंभस्येव रुचिर्यस्य नागकेशरकुसुमस्य विकाशो यत्र तस्मि
न्केवलं छ्रत्रं किंच मिलिताः शिलीमुखाः भ्रमरा यस्मिन् तेन पाटली पुष्पसमूहेन कृत कामस्य तूणविलासो यत्र तस्मि
न् । एतेन तत्सामर्थ्यं व्यंजितं ४ तदाश्चर्यं कृत्यमेवाह । विगलितं गतं पुनः सं ध्रियमाणमप्यस्थिरं लज्जितं लज्जा यस्य तस्य
जगतः । प्राणिमात्रस्यावलोकेन नतरुणाकरुणे । नविनकरुणाहासैः पुष्पव्याजेन कृतो हासो यत्र । अत्र हासस्य प्रभत्वात
पुष्पविकाशसाम्यं उक्तं च श्वेतो हासः प्रकीर्तितः इति यूनामेव कामाभिज्ञतया हासस्योपयुक्तेः । श्लिष्टापीयं तरुणशब्दस्यो
पादानं । किंच विरहिनां निकृंतनाय छेदनाय कुंतस्याहि विशेषस्य मुखमिवाकृतिर्यासां ताभिः केतकीभिर्दंतुरिता उन्न

मदनमहीपतिकनकदंडरुचिकेशरकुसुमविकाशे । मिलितशिलीमुखपाटलकृतस्मरतूण
विलासे ॥४॥ विगलितलज्जितजगदवलोकनतरुणाकरुणकृतहासे । विरहिनिकृन्तनकुंतमुखा
कृतिकेतकिदंतुरिताशे ॥५॥ माधविकापरिमललितेनवमालिकयातिसुगंधौ । मुनिमनसाम
पिमोहनकारिणि तरुणाकारणबंधौ ॥६॥ स्फुरदतिमुक्तलतापरिरंभणपुलकितमुकलितचू
ते वृंदावनविपिनेपरिसरपरिगतयमुनाजलपूते ॥७॥

तदंता आशा दिशो यत्र । अनेनातिनि
परोद्दीपकत्वमित्याह । माधविकायाः सौरभेण ललिते तथा नवमालिकायुष्येरतिसौरभे । मुनिमनसामपि मोहजनके कामीनां
दयितास्मृचिंता । ५ तद्धुरोपि
कावार्तेत्यर्थः । समाधियुक्तमुनीनां मनस्युद्दीपकः स कथं चिरं तिष्ठति तरुणानां मानिनीमानहेतुतया निरुपाधिकमित्रे तदाशीर्वा
देन तिष्ठतीत्यर्थः ॥६॥ एवं सामान्यतो वसंत निरूपणो नराधीप्रति न तयाकस्मकृतवसंतक्रीडा दर्शनमात्रेणमानकार्य्यः किंतु
विचार्य्येवेति । सूचयित्वा । विशेषतो वृंदावनरमणीयत्वमाह स्फुरंत्या माधवीलतायाः परिरंभणेन पुलकित इव मुकुलितो र
सालतरुर्यत्र । यथा कश्चित्वरांगनालिंगितः पुलकितो भवतीत्यभिप्रायः तथा वृंदावनविपिने समीपवर्त्या यमुनाजलेन पूते पवित्रे शो
भितइत्यर्थः अतो ऽत्र प्रियाभिसारणमेवोचितं नमानइतिध्वनिः ॥७॥ ६

किमूचे इत्यपेक्षायामाह ललितेत्यादिना गीतस्यास्य वसंतरागो यतितालः तद्यथा शिखंडिबर्होच्चयबद्धचूडः पुष्णन् पिकं चूतनवांकुरेण । भ्राम्यन् मुदा रागमनंगमूर्त्तिर्मतो मतं सोऽत्र वसंतरागः ॥ लघुद्वंद्वा द्रुतद्वंद्वं यतिसन्निपुटान्तरेति हे सखि इह वृंदावनविपिने रसः शृंगाररसस्तेन सह वर्त्तमानस्तद्विधे वसंतसमये हरिर्विहरति केन प्रकारेण युवतिजनेन समं नृत्यति अत्र युवतिजनप्राधान्योक्त्यास्वार्थोपगमप्राधान्यमेव व्यज्यते । कीदृशे । विरहिजनस्य दुरंते दुःखेन स्यातुं गमयितुं च शक्ये इत्युभयो विशेषणं हरिर्मनोहरणशीलः अतो स्य विरहो दुःसहः सरसो पि वसंतो यं विरहीणां दुःखदत्वाद्दुरंत इत्यर्थः श्रीकृष्णाभिप्रायाज्ञानात्तस्याभावी व्याधि कनिवारणार्थमिदमुक्तं । ध्रु । कथं दुरंतेति वासंतिकधर्मानाह ललितायाः लवंगलतायाः परिशीलनेन स्वयं ग्राहलिंगनेन कोमलो मलयाचलसंबंधी समीरो यत्र तस्मिन् लतानारीसंस्पर्शात् कोमलत्वेन मांद्य पुष्पसंबंधात्सौगंध्यं यमुनावनसंबंधा शैत्यं अचेतना पि

॥ वसंतरागयतितालाभ्यां ॥ ललितलवंगलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरंबितकोकिलकूजितकुंजकुटीरे ॥१॥ विहरति हरिरिह सरसवसंते नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरंते ॥ध्रु॥ उन्मदमदनमनोरथपथिकवधूजनजनितविलापे अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥२॥ मृगमदसौरभरभसवसंवदनवदलमालतमाले । युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥३॥

ताकांतमंतरेण चेतस्यातुं न शक्नोति तर्हि चेतना— नां का कथा इत्यर्थः नकेवलमिदमन्यदपि मधुकराणां समूहेन करंबितानां मिश्रितानां कोकिलानां कूजितं यत्र स कुंजकुटीरो यत्र तस्मिन् प्रति पिपासाभिविता याराधिको कंठाया वसंतविशेषणा हारा वुद्ध्यर्थमित्युक्तिः ॥१॥ विरहिनां दुरंत अत प्रोषितभर्तृकानां का वार्त्तेत्याह । उऊ तो मदो यस्य तेन मदनेन मनोरथो येषां ते ये पथिकवधूजनानां जनितो विलापो येन तस्मिन् । न च एतावतापि विरमति अलिकुलेन संकुलेन व्याप्तेन कुसुमसमूहेन निःशेषेणाकुलो व्याकुलो बकुलकलापो यत्र तस्मिन् ॥२॥ आस्तां स्त्रीणां वार्त्तां पुनामपि कस्तुरिकायाः सुगंधस्य यो रभसः अतिशयस्तस्या यत्ता नवदलानां श्रेणी येषु ते तमाला यत्र तस्मिन् तथा युवजनानां हृदयविदारणाय मनसिजस्य चेतद्रूक्षा नखास्तद्रुचिर्येषां पलाशकुसुमानां तेषां समूहो यत्र स्त्रीषु किंचित् सदयोपि युवक्षतीव निर्दय इति भावः ॥३॥

CC0. In Public Domain, Digitizagtion by eGangotri

लासैरुद्भुतकर्णज्वरायेभुते कैर्नीयंते ध्याने प्राणसमायाश्चिंतनेयः अवधानस्तेन क्षणं प्राप्ताया प्राणसमायाः समागमावसरोत्पन्ना ये उल्लासास्तैः॥२०॥ एवं वसंतमंदमारुतानां दुरतिक्रमत्वात् पादतेनकुसुमिलनातिरिक्तो पायो निवर्त्यतां विरहव्यथामाद्यतिनिरूप्यततह नवसंतक्रीडायाः अतथाभिप्राययुक्तत्वात् । स्वस्मिन् स्थीयमानप्रेमे शंकाभावं दृढयितुं यदि मां न विश्वससि तर्हि त्वमेवात्र हि । तालोकये त्या । अनेकेति । असौ सखी रित्याद्युक्तवाक्यास रैराधिकां पुनराह । किं कुर्वती तां समीपमानीय मुरारिं प्रत्यक्षं उपाधिकं दर्शयंती कथमनभीष्टमन्यांगनारमणं दर्शयति तत्राह । अनेकनारीणां परिरंभसंभ्रमेण स्फुरत् मनोहारि मुराधा विलासे मुल्लालसो लसकं पश्यतं एतद्विलासस्य प्रत्यक्षत्वात्तस्या विलासस्यैव स्फुरणं युक्तमित्यर्थः॥२१॥ श्लोकोक्तमर्थं गीतेन वर्णन्नाह । चंदनेत्या

नीयंते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥२०॥ अने कनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं। मुरारिमारादुपदर्शयंत्यसौ सखी समक्षं पुनराह रा धिकां॥२१॥ रामकिरीरागेण यतितालेन च॥ चंदनचर्चितनीलकलेवरपीतवसनवनमाली। केलिच लन्मणिकुंडलमंडितगंडयुगस्मितशाली॥१॥ हरिरिह मुग्धवधूनिकरे। विलासिनि विलसति केलिप रे॥ ध्रु०॥ पीनपयोधरभारभरेण हरिं परिरभ्य सरागं। गोपवधूरनुगायति काचिदुदंचितपंचमरागं॥२॥

दिनागीतस्यास्य रामकेरी रागः यतितालः यथा । स्वर्णप्रभाभास्वरभूषणा च नीलं चोलं वपुषा वहंती । कांतं पदे पांतमधिश्रि ते पि मानोन्नता रामकेरी प्रति छाइति । हे विलासिनि कुसुममनोरंजकाः समानोद्दे विलासशीले इह वृंदावने मुग्धे स्वाभिप्रायानभिज्ञ वधूसमूहे हरिर्विलसति । त्वद्विलाससाहश्याभासं कामयते स्वदागमनं च कथं विदग्धास्तास्तन्न जानंति केलिपरे कुसुमस्मराक्षि ण्यचेष्टा विहृतयातदनुसंधातुमशक्ते । ध्रु० कुसुमस्मतच्चित्ततामेव व्यनक्ति । चंदनेनानुलिप्तेन नीलकलेवरे पीतं वसनं यस्य वनमाला च विद्यते यस्य स च । समर्पितानेकोपकरणानेकवर्णावधूनिकरे त्वद्दत्तचंदनवनमालात्वद्वर्णवसनमंडितेन गंडयुगेन स्मितेन च शोभ मानः॥१॥ तन्मोग्ध्यमेव व्यनक्ति समुचितविचारानभिज्ञा काचित् गोपवधूर्नि विडस्तनभारातिशयेन त्वदुत्कर्षविनोदार्थिनं हरिं परि रभ्य तमनुगायति । कीदृशं तं उन्नीतत्वन्नामसमुद्रांकितपंचमस्वरोपरक्तं रागं तमनुगायति । कीदृशं सरागं त्वदनुरागेणामहं वर्तमानं॥२॥ ॥७॥

गा०द्व्रं१ यति०कुंडल२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथप्रकृतोपयोगितांवदन्नेप्रस्तावत्प्रवृत्त्यर्थस्वभणितेरुत्कर्षमाह॥ श्रीजयदेवस्येदंभणितमुदयति विराजते। कुतः हरिचरणयोःस्म
रणेनसारंसर्वतःश्रेष्ठम्। तत्रापिरसःशृंगारस्तत्पोषकवसंतसमयसंबंधिनोवनस्यवर्णनंयत्रतत्। अतएवसन्निधानवर्त्तीश्रसर्वत्यास्त।
स्यामदनविकारोयत्रतत्। आद्येस्वभणितेरुत्कर्षः। द्वितीयेवसंतातिशायिता। तृतीयेप्रकृतोप्रयोगः॥८॥ पुनरुद्दीपनायाद्यमद्योक्ता। निल
स्यसंतापकत्वंविशेषतोवर्णयति। दरेति। इहवसंतसमयेवायुश्चेत्तोदहति। विरहिणामित्यर्थाद्धिगंतव्यं ननुकिमपराधमेतेस्तस्मय
देवंचेत्तोदहतितत्राह। प्रतिदिशंसंचरतः कामस्यप्राणतुल्यः कामसुखइतियावत्। कामोत्रजन्यत्वेननिरूपितस्तस्यसखावायुसख्युरा
शापालनं। विरहिघ्नालोच्यतच्चेत्तोदहतीत्यर्थः। किंकुर्वन् ईषद्धिकंपितायामल्लिकालतायाः सकाशात उद्गच्छद्भिपुष्पपरागैरेवप्र

श्रीजयदेवभणितमिदमुदयतिहरिचरणस्मृतिसारं। सरसवसंतसमयवनवर्णनमनुगतमदनविकारं॥८॥ दरवि
दलितमल्लीवल्लीचंचत्परागप्रकटितपटवासैर्वासयन् काननानि। इहहिदहतिचेतः केतकीगंधबंधुः प्रसरदस
मबाणप्राणवद्गंधवाहः॥८॥ अद्योत्संगवसद्भुजंगकवलक्लेशादिवेशाचलंप्रालेयप्लवनेच्छयानुसरतिश्रीखंड
शैलानिलः॥ किंचस्निग्धरसालमौलिमुकुलान्यालोक्यहर्षोदयादुन्मीलन्तिकुहुःकुहुरितिकलोत्तालाः पिका
नांगिरः॥९॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः॥

कटितपटवासैःसुगंधचूर्णैः काननानिसुरभीणिकुर्वन् तत्रापिहेतुः केतकीपुष्पगंधस्यसहचारीकेतकीमालिंग्यमल्लीमुपसर्पन्।
तत्परागपदाहतिसंतप्तान्यचेतोदहतीत्यर्थः॥८॥ पुनरतिशयेनोत्प्रेक्ष्यते॥ अद्येति। मलयाचलसंबंधीवायुरद्यमहेशाचलंहिमा
लयमनुसरति। किमर्थं। हिमावगाहनेच्छया। कुतस्तदिच्छातत्राह। मलयस्यक्रोडेवसतांसर्पाणांकवलेनयःक्लेशस्तस्मादिवेत्युत्सा
चंदनतरुकोटरस्थाहिकेवलसंतप्तः हिमस्नानेच्छयाहिमालयंयातीत्यर्थः। नकेवलंवायुरेवदुःसहमन्यदपीत्याह। किंचेति। स्नि
ग्धाम्रवृक्षाणामग्रभागमुकुलान्यालोक्यहर्षोदयात् कुहुःकुहुरिति पिकानांगिरः उज्जृंभन्ति कीदृश्यः मधुरास्फुटध्वनिनोद्
टाः॥९॥ विरहिणामत्रदिवसनिर्यापणमतिदुर्घटमित्याह। उन्मीलदिति। प्रियाविरहितैरमीवसंतसंबंधिनोवासराःप्रतिकष्टे
ननिर्वाह्यंते तत्रहेतुः उन्मीलंतियानिमधूनिगंधाश्चतेषुलुब्धैर्मधुपैः कंपितेष्वाम्रमुकुलेषुक्रीडतांकोकिलानांसूक्ष्मकले

Dr. Urmila Sharma Collection, Varanasi

स्वस्यसर्वानुरंजकदाक्षिण्यस्वभावेनतेषांस्वस्ववांछातिरिक्तरसदानात्प्रीणनेनानंदंजनयन्।दाक्षिण्यमेवविवृणोति।पुनःकिंकुर्वन्मुग्धं
गौरनंगोत्सवंप्रापितैर्नप्रापयन्।कीदृशैःनीलकमलश्रेणीतोपिश्यामलकोमलैः इंदीवरशब्देनशीतलत्वंश्रेणीशब्देननवत्वमपमान
त्वंश्यामलशब्देनसुंदरत्वंकोमलशब्देनसुकुमारत्वंचसूचितं।ननुदक्षिणोरिस्योयेरसभनेयिकोनुरागेसत्यपिनायिकानुरागमंतरेणाक
र्षितदुदयः तत्राह।व्रजसुंदरीभिरालिंगित।।स्वस्वप्रेमानुरूपेणआलिंगनाद्यनुरंजनेनानुरंजितः।अनुरागंप्रापितइत्यर्थः।एतेनात्योन्यानु
रंजनमात्रताप्यर्थकथयाप्रेमपरिपाकोद्भूतपूर्णरसाविर्भावेनप्राकृतरसस्तिरस्कृतइतिसूचितं।तर्हिसंकोचापत्तिःस्यात्नैवंवाच्य
स्वच्छंदयथास्यात्तथाकालदेशक्रियाणामशंकोचमित्यर्थः तथापिप्रगाढोद्दिङ्मात्रतास्यात्नप्रत्यंगं।एकैकांगस्यपयोचित
क्रियेत्यर्थः नन्वेकेनानेकासांसमाधानंकथंस्यात्तत्राह।शृंगाररसोमूर्तिमानित्यहमुत्प्रेक्षे।यतःसोप्येकएवविश्वमनुरंजयन्ना
नंदयति।।१२।।अथकविरपिवसंतरासमनुवर्णयन्शारदीयरासकृतसराधश्रीकृष्णविलासमनुस्मरन्तद्दर्शनरूपमाशिषंप्र

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्यनिर्भरमुरः प्रेमांधयाराधया।।साधुत्वद्व
दनंसुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः।।१३।।इतिश्रीगीतगो
विंदेमहाकाव्येसामोदामोदरोनामप्रथमःसर्गः।।१।।०।। विहरतिवनेराधासाधारणप्रणयेहरौविगलि
तनिजोत्कर्षादीर्ष्यावसेनगतान्यतः।।क्वचिदपिलताकुंजेगुंजन्मधुव्रतमंडलीमुखरशिखरेलीनादीनाप्यु

पुंजेरासेति हरिर्वोयुष्मान्रक्षतु।कीदृशः आभीरवामभ्रुवांगोपसुंदरीणांसमीपेश्रीराधयाउद्भटंयथास्यात्तथाउरःपरिरभ्यचुंबि
तः।लज्जाशीलायास्तत्रतत्सिद्धिःकथं।प्रेमांधयाप्रेमावेशविगलितलज्जया।किंकृत्वा।तत्रापिवैदग्धीव्यनक्तिः।त्वद्वदनंसाधुरम
णीयंसुधामयमितिनिगद्यगीतस्तुतिव्याजंविधाय।अतस्तैर्दुरप्यवलोकात्।स्मितेनतस्यामनोहरणशीलः।कीदृशीनांरासो
ल्लासभरेणविभ्रमभृतां।।१३।।अतएवसर्गोयं श्रीराधाविलासानुभवेनआसम्यकमोदेनसहवर्त्तमानोदामोदरोयत्रसइतिबालवो
धन्यांश्रीगीतगोविंदटीकायांप्रथमसर्गः।।१।।अथासखीवचनंनिशम्यस्वयमनुभूयश्रीकृष्णस्यस्वाभाविकप्रेमतारतम्येनचासा
धारणविहरणविलोकनहर्षोद्गमात्तद्दर्शनमप्यसहमानायाअवस्थांतरमपितदुपयोगित्वमाह।विहरतीति क्वचिदपिलताकुंजे
पराधविवेकशून्यान्यत्रगतेत्यर्थः ईर्ष्यापिकृतः।।सास्वपिसर्वासमानःप्रणयोयस्यतथाभूतेहरौविहरतिसति।विगलितोगतोनिजोत्क
र्षःअहमेवासाधारणीप्रियेत्येवंरूपोयस्यास्तस्मात्प्रणयतारतम्यात्विरम्यसामाप्यवलङ्गाते श्रीकृष्णस्यस्वभावान्यथात्वदर्शनासम

CC0. In Public Domain, Digitizagtion by eGangotri

कापि मुग्धवधूस्तस्य हृदकचेष्टाः न भिन्ना मधुसूदनवदनसरोजमधिकं यथा स्यात्तथा ध्यायति भ्रमरवद्रसविशेषान्वेषणपर इति श्लि
ष्टमधुसूदनपदोपन्यासः। कीदृशं। विलासेन चंचलयोः विलोचनयोः खेलनेन जनितस्तासां मनोजो येन तत् तद्विलासस्फुरत्तोल्लसितमि
त्यर्थः ३ कापि नितंबवती किंचित्कथनव्याजेन श्रुतिमूले मिलिता सती कपोलतले दयितं चारु यथा स्यात्तथा चुचुंब कीदृशं पुलकैरनुकू
लेगतं ४ रासरसे सहनृत्यपरा युवतिः हरिं प्रशशंस। त्वदीयं किंचित्सादृश्यमाभासमालोक्य स्तुतेत्यर्थः। कीदृशी। करतलतालैस्तरलवल

कापि विलासविलोलविलोचनखेलनजनितमनोजं॥ ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं॥३॥ का
पि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले॥ चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले॥४॥ केलिकला
कुतुकेन च काचिदमुं यमुनाजलकूले॥ मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले॥५॥ करतलताललतरल
वलयावलिकलितकलस्वनवंशे॥ रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे॥६॥ श्लिष्यति कामपि चुंबति का
मपि कामपि रमयति रामां॥ पश्यति सस्मितचारुपरामपरामनुगच्छति वामां॥७॥ श्रीजयदेवभणितमिदमद्भुतके
शवकेलिरहस्यं॥ विपिनविनोदकलावलितं वितनोतु शुभानि यशस्यं॥८॥ विश्वेषामनुरंजनेन जनयन्नानंदमि
दीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं॥ स्वच्छंदं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारः स
खि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति॥१२॥

यावलीभिस्तत्स्वनैर्मिलितः कलस्वनवंशेऽथवा तत् सिन् करतलतालवयध्वनिमुरलीनादसं
कुलइत्यर्थः ६ श्लिष्यत्यादिभिः क्रीडायां नानात्वाश्चत्तिर्ध्वनिएकस्यां सर्वांगारंभाभावात् श्रीकृष्णः स्मितचारु यथा स्यात्तथा परां
पश्यति अपरां वामां त्वत्तो मम ग्रहणं मा लाप कोपचलितामनुनयेन प्रसादयति ७ श्रीजयदेवकवेरिदं गीतं शुभानि विस्तारयतु की
दृशं प्रद्भुतकेशवस्य केलीरहस्यं वेदाधी विशेषेण श्रीराधाविलासपरीक्षणरूपं यत्तत् तथा वनविहारसौष्ठवयुक्तं यशः प्रद
च ८ पुनरुद्दीपनाय तन्निमित्तं तद्विलासव्यापारेषु पित्वद्विलासा विर एवायमित्याह हे सखि मधौ मुग्धस्तदवधाने
कर्त्तव्याकर्त्तव्ये विचारशून्यो हरिः क्रीडति। कथंवत् नायकारमणस्पृहक् त्वं किं कुर्वन्। विश्वेषां सर्वगोपांगनाजनानामनु

Dr. Urmila Sharma Collection, Varanasi

गी०
॥७॥

ःप्रत्युक्तं त्वयामद्विषयबहुमानप्रणयावर्पितदीर्घोदर्विरदृष्टधयानालोचिन्नावित्याह। विशदकदंवतले मिलितं पुष्पितत्वाद्विशदत्वं ततः प्रेमकल
होद्भुतक्लेशाद्युतं चाटुभिरपनयंतं। तथापि किमप्यनवचनीयं यथास्यात्तथामामपिमामेवरमयंतं कथांतरंगरदवाचरन्नंगोपवृतयादृशाम
नसोचतारमयन्नपिमेमना सहरति ध्यायतमित्यर्थः पूर्ववृत्तस्फूर्तिरियं।७।श्रीजयदेवभणितं भगवद्भक्तिविशेषवृताहरिचरणस्म
रणं प्रतिसंप्रति इदानीमपियोग्यं। तादृशभाविनास्वादनीयमितिभावः। कीदृशं अतिप्रतिशये नसुंदरं मोहनं चमधुरिपुरूपं यत्रतत्। ननु
श्रीकृष्णस्त्वां विहायान्याभिः सह विहरतितर्हि त्वं किमितितं स्मरसीति सखीभिप्रायं परीक्ष्य मा राधा सखीं प्रत्याह गणातीति ममवामं सुंदरविदग्ध
मितियावत्। वैदग्ध्यं च वक्ष्यमाणं मधुसूदनशब्दार्थे दर्शयितव्यं तादृशं ममानः कृष्णे अभिलाषं पुनरपि करोति अहं किं करोमि नि
जोत्कर्षानुभावानैदोन्मदं मनायत्तं न भवतीत्यर्थः। कीदृशे श्रीकृष्णे पूर्वरीत्यामपि वलंतीत सायस्मतस्मिन्। तदर्थमेव युवतिषु मा वि

विशदकदंबतले मिलितं कलिकलुषभयं शमयंतं। मामपि किमपि तरंगदनंगदृशा मनसा रमयंतं।७।श्रीजय
देवभणितमतिसुंदरमोहनमधुरिपुरूपं। हरिचरणस्मरणं प्रतिसंप्रति पुण्यवतामनुरूपं। गणयतिगु
णग्राममेभामं भ्रमादपि नेहते वहति च परितोषं दोषं विमुंचति दूरतः। युवतिषु वलत्तस्ने कृष्णे विहारिणि मां
विनापुनरपि मनो वामं कामं करोति करोमि किं।२। मालवरागेण गीयते यतितालेन च॥ निभृतनिकुंज
गृहं गतया निशि रहः निलीय वसंतं। चकितविलोकितसकलदिशा रतिरभसरसेन हसंतं।१। सखि हे केशि
नाविहारिणि अत्र सूचवतस्य गुणग्रामं लक्षणं मथनमुदारं रमय मया सह मदनमनोरथभावितया सविकारं।ध्रु॥

हं गणयति। कोऽर्थः भ्रमादपि नेहते। अपि साधारणमाचरणं दूरतो विमुंचति परितोषं च वहति प्राप्नोति। ग्रामो वृंदे शब्दादिपूर्वगइ
तिविश्वः।२। अथोत्कंठया स्मरणमपिस्यात् तमशक्नुवती सखीं प्रार्थयते। अस्यापि मालवरागे कतालीताली द्रुतमेवं भवेद्यत्र से कतालीति संगी
तेति तल्लक्षणं। हे सखि मया सह केशिमथनं श्रीकृष्णं रमय केशिमथनमिति प्रथममेव निजभावालंबनभुजस्फूर्त्याभिज्ञवीर्योद्बो
धकनाम निर्देशः। तत्र हेतुमाह मदनेन प्रेम्णा यो मनोरथस्तेन युक्त्या एतावतापि कथं तत्सिद्धिः अत आह। सविकारं मयि मानसभावेन
सहितं अतो मनोरथदातारं।ध्रु। कीदृश्या मया निशि निभृतनिकुंजगृहं गतया। निर्जनतार्थः। निभृतमिमि कुंजस्यरम्यतार्थं गृहमिति च की
दृशं तदलाभात्मर्मवैकल्याद्दिहृक्षयारहसि निलीय वसंतं। संकुचितमात्मानं कृत्वा तिष्ठंतं च कितं यथास्यात्तथा कृष्णः कुत्र निलीयास्ते इ २
तिविलोकिताः सकलाः दिशो यया तया रतिरभसादुच्छलितरसेन मदैकत्व्य समीक्ष्य हसंतं।१॥

CC0. In Public Domain, Digitizagtion by eGangotri

गीतस्यास्य गुर्जरी रागः यतिताल: हे सखि मम मनः इह विहितविलासं पश्यदपि हरिं तत्तद्योचितक्रियाभिः विहरणशीलं स्मरति पू
र्वानुभूतमेव प्रमाणयति। कीदृशं रासे शारदीये कृतः स्कंधमारुह्यतामिति परिहासो येन तं। धूर्त्तासक्तजकविशेषणान्याह संचरतीऽ
धरसुधा यत्र तेन मधुरध्वनिना वादितो मोहनवंशो येन तं। तादृशी मनोहरवंशीध्वनिरन्यत्र नास्तीत्यर्थः सर्वत्रैव योज्यं तद्वदनमाधुर्य
माहात्दृशोदृष्टेरंचलं चक्षुः प्रांतदेशः कटाक्ष इति यावत् चलितेइतस्ततः प्रचरिते दृगंचले यत्र तेन चंचलेय वतेन चंचलमौलिनाशि
रसा कपोले विलोलो ऽवतंसो कर्णभूषणो यस्य तं। १। तात्कालिककेशमाह चंद्रकेण कुचंद्राकारेण चारुणा मयूरपुच्छानां मंडले
न वेष्टिताः बद्धकेशा यस्य तं तद्देवोत्प्रेक्षते इंद्रधनुर्भिरनुरंजितः चित्रितो यः स्निग्धमेघस्तादृक शोभनो वेशो यस्य तं। २। अधरसो

॥ गुर्जरी रागेण यतितालेन गीयते ॥ संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं चलितदृगंचलचंचलमौलि
कमंड३ कपोलविलोलवतंसं। १। रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासं ध्रु० चंद्रकचारुमयूरशि
खंडलवलयितकेशं प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं २। गोपकदंबनितंबवतीमुखचुंबनलंभितलो
भं बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं ३। विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रं ४। जलदपटलचलदिंदुविनिंदकचंदनतिलकलला
टं पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं ५। मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं पीतवस
भाग्यमाह। गोपस्त्रीणां मुखचुंबनेन लं नमनुगतमुनिमनुजसुरासुरवरपरिवारं ६॥
बंधूकपुष्पवदरुणो मधुरश्चाधरपल्लवो यस्य तं। ३। सर्वातिशायि निजसौभाग्यं वक्तुमत्र सातदनुकरणमात्रमाह भितः प्रापितो लोभो यस्य तं तदेव ध्वनति
पोत्ताभ्यां पल्लववत् कोमलाभ्यां भुजाभ्यां वलयितं वेष्टितं वल्लवयुवतीनां सहस्रं येन तं एकदानेकालिंगनान्नेकनिष्ठः प्रेमेत्यर्थः विस्तीर्णः पुलकोय
चरणोरसि स्थितानि मणिगणोपलक्षितानि भूषणानि तेषां किरणैर्नाशितमंधकारो येन तं ४। पुनस्तत्क्रीडाकालीनान्यन्याशक्तिव्यन
क्ति। मेघसमूहेन वेष्टितस्येंदोः शोभापि चंदनतिलकोललाटे यस्य तं तथा पीनपयोधरयोः पर्यंतभागस्य मर्दने निर्दयहृदयकवाटं यस्य तं
दृढत्वविस्तीर्णत्वाभ्यां मत्तहृदयस्य कवाटत्वेन निरूपणं ५। सहजाभिरूप्यमाह मणिप्रचुराभ्यां कुंडलाभ्यां मंडितो गंडो यस्य तं अत्युद
वोदारं तथा पीतं वसनं यस्य तं किंच अनुगतः सौंदर्येनाकृष्टः मुन्यादीनां वरपरिग्रहो येन तं ।६।।१०।।
रिं

Dr. Urmila Sharma Collection, Varanasi

अथ पूर्वदृष्टगोपीमंडलस्य श्रीकृष्णस्फुर्त्यास्वमनसोनुभूतं श्रीकृष्णाभिप्रायतत्त्वं साक्षात्प्रदर्शयंती साटोपमाह हस्तेति हे सखि अहं कानने गोविंदं पश्यामि हृष्यामि च कीदृशं व्रजसुंदरीगणावृतं ननु मुग्धासित्वं यतस्त्वां विहायान्याभिः सह विहरंतं हरिं पश्यसि हृष्यसि च हृष्यसीत्यर्थं व्याह कुटिलभ्रूलतावतीनां वल्लवीनां वृंदस्योत्सारिणा निजभावोद्बोधकेन मार्गेण वीक्षितमपि मामुद्दीक्ष्य उद्रीविकाकृत्वा विशेषेण निकटवर्तिनीं मां दृष्ट्वा विलक्षितो विस्मयान्वितोयः स्मितसुधया मुग्धमानने यस्य स च स च तं तद्विशेषानुभावात् विस्मयहर्षान्वित इत्यर्थः अत एव मद्दर्शनावेशेन हस्तात्स्खलितौ विलासवंशौ यस्य तं अत एवातिखेदेनार्द्रं गंडस्थलं यस्य तं ३ एवमुक्त्वा स्फुर्त्यगमे पुनराह दुरेति हे सखि अन्योगुच्छो यासां अशोकलतिकानां विकाशो दुःखेनालोक्यते किंच सरोवरस्योपवनसंव

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं मामुद्वीक्ष्य विलक्षितस्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीगणावृतं पश्यामि हृष्यामि च ३ दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकाशः कासारोपवनपवनोपि व्यथयति अपि भ्राम्यद्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ४ साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धदृष्टस्तनं गोपीनां निभृतं निरीक्ष्य गमिताकांक्षश्चिरं चिंतयन्नंतर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः ५ इति श्रीगीतगोविंदे महाकाव्ये क्लेशाकेशवो नाम द्वितीयः सर्गः २

धिपवनोपि व्यथयति तथा भ्राम्यंतीनां भृंगीनां रणितैः रमणीया अपि प्रसरता म्रभागयुक्तापि चूतानां मुकुलप्रसूतिर्न सुखयति अशोकाशोकदा पीयवनोपि पीडकः रमणीयाप्युद्वेगकारीत्यहो विरहवैपरीत्यमित्यर्थः ४ अथ कविरपि श्रीराधयोक्तीं श्रीकृष्णाभिप्रायं व्यंजयन्नाशास्ते साकूतेति श्रीराधिकोत्कर्षनिश्चयेन नवद्रवोत्कुष्टः केशवः वो युष्माकं क्लेशं हरतु कीदृशः गोपीनां निभृतं रहस्यं ततद्भावप्रकाशनं निरीक्ष्यातो ह्यश्रीराधायाः सर्वोत्तमतां चिरमंतर्विचारयन्निगतानिरस्ताऽन्यनारीष्वाकांक्षा यस्य सः अथ परोऽप्यस्या नास्ति इति गमिता तस्यां प्रापिता कांक्षा येन इति वा भावप्रकाशकुरूपाणि निभृतं तस्य विशेषणान्याह साकूते न सह स्मितं यत्र तत्तथा अतिशिथिलो अत एव गगलन् केशवंधो यत्र तत्तत् किंच उत्क्षिप्ता भ्रूवल्ली यत्र तत्तत् तथैव छलेन दर्शितभुजामूलादर्द्धदृष्टः स्तनो यत्र तत्तत् अत एव मुग्धमनोहरं ५ अतः सर्गोयं क्लेशागतः श्रीराधिका सवधिमनः साधारण्याभासरूपः १०
क्लेशो यस्मान् स केशवो यत्र स इति इति बालबोधन्यां द्वितीयसर्गः २

प्रथममिलनेनलज्जितया नित्यनवनवानुभावात् प्रोक्तं ममप्रसादनसमर्थानां विनयोक्तीनां शतैर्मामनुनयंतं मृदुमधुरस्मितेन युक्तं भाषितं य
स्यास्तयास्वचाटुभिरपगतसलज्जवामतां मां स्मितादिभिर्त्तात्वाशिथिलीकृतजघनदुकूलं येन स तं ॥२॥ पल्लवशय्यायां शयितया चिरकालं व्या
प्यममैव उरसि शय्यानं। कृते परिरंभणे चुंबनेयया परिरभ्य कृतमधरपानं येन तं ॥३॥ अलसेन निमिलितेलोचनेयया पुलकावलिभिर्ललितं कपो
लं यस्य तं ॥ श्रमजलसकलकलेवरे यस्यास्तया वरमदनमदादतिलोलं सत्वसं ॥४॥ कोकिलस्य कलरव इव कूजितं यस्यास्तया नखैरं
कितो घनस्तनभारो येन तं ॥५॥ चरणयोरणितो मणियुक्तमंजिरो यस्यास्तया अनेन लीलाविशेषसूचितः सपूर्णतां नीतः सुरतस्य

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं। मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं ॥२॥ किशल
यशयननिवेशितया चिरमुरसि ममैव शयानं। कृतपरिरंभणचुंबनया परिरभ्य कृताधरपानं ॥३॥ अलसनिमीलि
तलोचनया पुलकावलिललितकपोलं। श्रमजलसकलकलेवरया वरमदनमदादतिलोलं ॥४॥ कोकिलकल
रवकूजितया जितमनसिजतंत्रविचारं। श्लथकुसुमाकुलकुंतलया नखलिखितघनस्तनभारं ॥५॥ चरणरणि
तमणिनूपुरया परिपूरितसुरतवितानं। मुखरविशृंखलमेखलया सकचग्रहचुंबनदानं ॥६॥ रतिसुखसमयरसा
लसया दरमुकुलितनयनसरोजं। निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजं ॥७॥ श्रीजयदेवभणित
मिदमतिशयमधुरिपुनिधुवनशीलं। सुखमुत्कंठितगोपवधूकथितं वितनोतु शुभानि सलीलं ॥८॥

विस्तारो येन तं। पूर्वंमुखरा पश्चाद्विश्लिष्टं खलात्रुटितं। गुणाकांची यस्यास्तया केशग्रहणेन सह चुंबनदानं यस्य तं ॥६॥ रतिशृंगाररूपतया
यत्सुखं तस्य यः समयः कालस्तत्र यो रसस्तेनालसया ईषन्मुकुलितेन नयनसरोजे यस्य तं निःसहोऽसहनमतिबलवत्वमिति यावत्। निः
सहेन निपतिता तनुलता यस्यास्तस्या मधुसूदनमिति श्लिष्टं। अनेन भंग्या यथान्यकुसुमावलीनां मधुक्रमेण स्वादयन् कमलिन्युत्क
र्षमनुभवतस्यामत्यासक्तो भवति तद्वदयमपीति स्वमनसो वैदग्ध्यमेव बोधितं। अतएवाविर्भूतो मनोजः कामो मय्यभिलासो यस्य तं
॥७॥ इदं श्रीजयदेवभणितं कर्तृसुखं वितनोतु। कीदृशं। उत्कंठितायाः गोपवध्वाः श्रीराधायाः कथितं यत्र तत् तथा अतिशयेन म
धुरिपोः सुरतक्रीडांशीलयति स्मारयतीति तत्। यतः मिथः कामितत्सीलया सह वर्त्तमानं ॥८॥ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

गी०
११

अथ तत्स्फूर्त्याह अहं तां हृदि संगतामपि पुरः प्राप्तां निरंतरमत्यर्थं रमयामि वने किमर्थं वा अनुसरामि तामुद्दिश्य किं वा वृथा विलपा
मि न करकलितरत्नं मृग्यते नीरमध्य इत्यभिप्रायः ५ स्फूर्त्यपगमे पुनराह हे तन्वि तव हृदयं त्वदुक्तचेष्टानायोग्यमसूयेगुणे दो
षारोपणेन खेदयुक्तमहं वमि तत्कथं न अनुनयसि कुतो गतासि तन्न वेद्मि तेन हेतुना ते तव पादग्रहणादिना अपराधं क्षमापयामि
५ पुनः स्फूर्त्याहा हे प्रिये मम अनंतरं त्वं यातायातं विदधासीति दृश्यसे तत् पुरेव ससंभ्रमपरिरंभणं न ददासि पुरः स्थितायाः
प्रियाया अनेकुरतौ तादृशीन युक्तेत्यभिप्रायः ६ पुनः स्फूर्त्यपगमे हे सुंदरि क्षम्यतामपराधं मम परमीदृशमपराधं कदाचिद
पि न करोमि अतो मम दर्शनं देहि यतः तव प्रियोहं मन्मथेन मनो मथ्नातीति मन्मथो विरहस्तेन दुनोति ७ श्रीजयदेवकेन
हरेरिदं विलापं वर्णितं स्वार्थे कः कीदृशेन प्रवणेन नम्रेण पुनः कीदृशेन केंदुविल्वेना मा जयदेवस्य ग्रामः केंदुविल्वग्रामर

तामहं हृदि संगतामनिशं भृशं रमयामि किं वनेनुसरामि तामिह किं वृथा विलपामि ५ तन्वि खिन्नमसूयया हृ
दयं तवाकलयामि तन्न वेद्मि कुतो गतासि न तेन तेनुनयामि ५ दृश्यसे पुरतो गतागतमेव मे विदधासि किं पुरेव स
संभ्रमं परिरंभणं न ददासि ६ क्षम्यतामपरं कदापि तवेदृशं न करोमि देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि
७ वर्णितं जयदेवकेन हरेरिदं प्रवणेन किंदुविल्वसमुद्रसंभवरोहिणीरमणेन ८ हृदि बिसलताहारो नायं
भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हर
भ्रांत्यानंग क्रुधा किमु धावसि ३ पाणौ मा कुरु चूतशायकममुं मा चापमारोपय क्रीडानिर्जितविश्व मूर्छितज
नाघातेन किं पौरुषं तस्या एव मृगीदृशो मनसिजप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितं मनागपि मनो नाद्यापि सं धुक्षते ४

तिकुलं च तयोर्महत्वात्समुद्रत्वेन निरूपणं तदुद्भवचंद्रेण यथा समुद्रभवश्चंद्रः समुद्रवृद्धिकरः तथाहमपि तद्वृद्धिकर इत्यर्थः ८ उक्तमन्मथसं
तापमेव तत्स्फूर्त्या साक्षादिव विवृणोति हृदीति हे अनंग क्रुधा किमु धावसि मदर्थं चेन्नहि हरस्य भ्रांत्या मामपि प्रहारं मा कुरु अहं हरो न भवामीति हरभ्रां
तिं वारयन्नाह प्रियारहिते सतु प्रियाङ्गयुक्तेः तल्लक्षणानि दृश्यंते इति चेन्न हृदि मृणाललता या हारोयं वासुकिर्न कंठे कुवलयदलश्रेणी सा ग
रलद्युतिर्न सर्वांगे चंदनरज इदं भस्म न अतो मयि हरभ्रांतिर्न कार्येति भावः ३ न केवलं मदंगदाहात् शिवो मम वैरी भवानप्युल्लंघितशासन
त्वात् अतस्त्वमपि प्रहरिष्यामीत्यत आह हे मनसिज अमुं चूतमुकुलबाणं पाणौ मा कुरु यदि पाणौ कृतवान् असि तदा बाणं वै अस्तां चापं मा ११
रोपय चापारोपितबाणः प्राणान् हरिष्यतीत्यभिप्रायः कथमेवं विधेयमित्यत आह क्रीडया निर्जितं विश्वं येन हे तथा विधमूर्छितजनस्य प्रहा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं सर्गद्वयेन श्रीराधामाधवोत्कंठे निरूप्येदानीं श्रीराधिकोत्कंठावर्णनानंतरं श्रीकृष्णोत्कंठामाह कंसारिरिति यथा सातस्मि
न्नुत्कंठिता तथा कंसारिरपि राधां सम्यक्प्रकारेण हृदये धृत्वा व्रजसुंदरीस्तत्याज बहुवचनेनास्य तस्यामनुरागातिशयो
ध्वनितः हृदयेत्त्वारणपूर्वकं शारदीयरासांतर्द्धिस्फूर्त्या चलित इत्यर्थः कीदृशीं पूर्वानुभूतस्मृत्युपस्थापितविषयस्पृहावास
नासम्यक्निक्षिप्ता यावत् वासना यावद्बंधनाय स्यात् तानि खननन्यायेन दृढीकरणाय शृंखलां निगडरूपां परमाश्रयमित्यर्थः यथा
कश्चिद्विवेकी पुरुषस्तारतम्येन सारवस्तुनिश्चयात् तदेकनिष्ठस्तदन्यत्सर्वं त्यजयति तथायमपि तास्तत्याज इत्यभिप्रायः १
तदनंतरकृत्यमाह इतस्तत इति निकेवलं सैव माधवोपि यमुनायास्तटप्रांतकुंजे विषादं चकार किं कृत्वा तत्र तत्स्थाने तां श्रीराधिका
मन्विष्य कीदृशः अहो तस्याः सर्वोन्नमत्तां जानतापि मया कथमेवं कृतम् इति कृत्वा पश्चात्तापो येन सः तत्र हेतुः अनंगबाणव्रणेन

कंसारिरपि संसारवासनाबद्धशृंखलां राधामाधाय हृदये तत्याज व्रजसुंदरीः १ इतस्ततस्तामनुसृत्य राधि
कामनंगबाणव्रणखिन्नमानसः कृतानुतापः स कलिंदनंदिनीतटांतकुंजे विषसाद माधवः २ गुर्जरीरा
गेणायतितालेन च मामियं चलिता विलोक्य वृतं वधूनिचयेन सापराधतया मया न निवारितातिभयेन
१ हरि हरि हतादरतया गता सा कुपितेव ध्रु० किं करिष्यति किं वदिष्यति सा चिरं विरहेण किं धनेन ज
नेन किं मम किं सुखेन गृहेण २ चिंतयामि तदाननं कुटिलभ्रु कोपभरेण शोणपद्ममिवोपरिभ्रमताकुलं भ्र

खिन्नं मानसं यस्य सः अनेन तत्सदृशी दशास्याप्युक्ता २ पश्चात्तापमेवाह मामियमित्यादिना अस्यापि गुर्जरीरागयतितालौ हरि
हरि इति खेदे हा कष्टं सा पूर्वानुभूतगुणा श्रीराधा अस्मिन् मया हतादरत्वं मत्वा कुपितेव गतेत्याह मुत्प्रेक्षे ध्रु० कुतो हतादरत्वमिति इयं श्री
राधा वधूसमूहेन वृतं मां दूरतो विलोक्य चलिता वृतमिति स्वाभिप्रायेण ताभिर्वेष्टितोहं न ममाभिप्रायज्ञानेन इत्यर्थः अनेनान्योन्यावलो
कनं जातमिति गम्यते कथं तदैव नानुनीता मया दृष्ट्वापि सापराधतया तया तां विहायान्याभिर्विहाररूपात् अतिभयेन न निवारिता १ ततः स
भ्रमं निर्वेदमाह सा चिरं विरहेण तत्तापशांत्यर्थं कमुपायं विधास्यति सखीप्रति किं वा वदिष्यति इत्यहं न जाने अतो मम गवां समूहेन
किं जनेन वा किं गृहेण वा किं सुखेन वा कि तां विनैव तत्सर्वम् अकिंचित्करमित्यर्थः २ पुनः स विमर्शमाह अहं तदाननमेव ध्यानेन पश्यामि ।
कीदृशं रोषभरेण कुटिलभ्रु यत्र तादृशं तेनैव लोहितं वाकचोपमामाह उपरि भ्रमता भ्रमरेण व्याप्तं रुणपद्ममिव ३ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ कविर्मामुद्दिश्य इति श्रीराधावचनप्रमाणीकृतगोपीमंडलस्य श्रीकृष्णस्य पूर्वोक्तश्रीराधिकादर्शनप्रकारमाह तिर्यगिति मधुसूदनस्य
कटाक्षस्यतरंगा वो युष्माकं क्षेमं दधतु पूर्वोक्तमधुसूदनपदनपदतात्पर्यं व्यनक्ति कीदृशः राधामुखेंदौ दुग्धचंचलं संमुग्धमलक्षितं च यथा
स्यात्तथा पल्लविताः अन्यगोपांगनावृंदसंकुलगणमपहाय तत्रैवोल्लसिता इत्यर्थः कथमनेकांगनानिकरे तत्सिद्धिर्वंशोच्चरद्गीतिश्रुतिस्वरग्रा
ममूर्छनादिषु समर्पितचित्तवृत्तिमिलिललनालक्षैर्न संलक्षिताः यद्वा गीतस्यानंतसुखं अनेन तादृशोवष्यलक्षितत्वेन चातुर्यं सूचितं कीदृ
शस्य तिर्यक्कंठो यस्य विलोलशिरोभूषणं यस्य स च स च ८ अत एव मुग्धमधुसूदनो रसविशेषास्वादचतुरस्ततो मुग्धो मधुसूद
नो यत्र स इत्ययं सर्गः इति बालबोधन्यां तृतीयसर्गः ३ ॐ अथ राधिकाविरहोत्कंठितं श्रीकृष्णं स्वसखी मा स्वास्या गता सखी

तिर्यक्कंठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिताः संमुग्धंम
धुसूदनस्य मधुरे राधामुखेंदौ मृदुस्पंदं कंदलिताश्चिरं दधतु वः क्षेमं कटाक्षोर्मयः ८ इति श्रीगीतगोविंदे मु
ग्धमधुसूदनो नाम तृतीयः सर्गः ३ ॐ यमुनातीरवानीरनिकुंजे मंदमास्थितं प्राह प्रेमभरोद्भ्रांतं माधवं रा
धिकासखी १ कर्णाटरागेणैकतालीतालाभ्यां निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरं व्यालनिल
यमिलनेन गरलमिव कलयति मलयसमीरं सा विरहे तव दीना माधव मनसिजविशिखभयादिव भावनया

प्राह इत्याह यमुनेति श्रीराधिकासखी माधवं प्राह कीदृशं श्रीराधिकाविषयकप्रेमाधिक्येनोद्भ्रांतमन्मत्तं अत एव तत्स्व
रूपं विहाय विलप्य यमुनातीरस्य वेतसीकुंजे मंदं निरुपमं यथा स्यात्तथासीनं १ गीतस्यास्य कर्णाटरागः यथा कृपाणपा
णिर्गजदंतपत्रमेकं वहन् दक्षिणकर्णपूरे संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिकंठनीलः इति एकतालीतालः हे मा
धव सा श्रीराधा तव विरहनिमित्तं दीना दुःखिता अत्रोत्प्रेक्षते कामबाणस्य भयात् त्वयि ध्यानेन लीनेवास्ते कामरूपे त्वयि प्रसन्ने त
द्भयं न भविष्यतीत्यभिप्रायः ध्रु० न केवलमेवं चंदनमिंदुकिरणं च निंदति स्वभावशीतलो यन्मां दहति तस्मात् ममैव दुर्दैवमित्यनुपश्चा
दधीरं यथा स्यात्तथा खेदं विंदति तथा चंदनतरोः संपर्केण मलयसमीरं गरलमिव मन्यते तत्रस्थसर्पैर्भुक्तोच्छितो वायुर्विष
मिश्रितत्वात् विषमिवोत्प्रेक्षते १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रेण किंयो रूपंन किमपि कथंभवान् मूर्छितः तस्याराधायाएवो छलेत्याकटाक्षवाणाश्रेणया जर्जरितं मम मनोल्पमपि ग्रथनापिनसंधत्ते
तेनदीप्यतेनस्वस्थंभवतीत्यर्थः ४ कामंवर्णयन् श्रीराधिकायाः कटाक्षाप्रसंगस्मरस्तेन तत्स्फूर्त्यातं विस्मृत्यतामेव वर्णयन्नाह भ्रूपल्लव
मिति इत्यनेन प्रकारेण स्थापितस्यां श्रीराधायां किंस्मरेणार्पितानीतिमन्ये कुतोऽर्पितानीत्याह यतोनिर्जितानिजगंतियैस्तानि तत्प्रसादल
ब्धास्त्रैर्जगज्जित्वा पुनस्तत्रैवार्पितानीतिभावः कुतस्तस्यामेवार्पितानि यतोऽनंगस्यजयजंगमदेवतारूपायां कान्यस्त्राणीत्याह भ्रूपल्लवंधनुः
रपांगतरंगितानि कटाक्षा इत्यर्थः तएववाणाः श्रवणप्रांतभागः सएवगुणइति ५ एवंपरोपकारिण्यास्तवमपिनिर्दयतानयुक्तेत्या
ह भ्रूचापेति भ्रूचापारोपितः कटाक्षवाणः ममममर्मव्यथांकरोतु नात्रानौचित्यं चापारोपितवाणास्यदुःखजनकस्वभावत्वात् वक्रश्या

भ्रूपल्लवंधनुरपांगतरंगितानि वाणागुणः श्रवणपालिरितिस्मरेण तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जित
जगंतिकिमर्पितानि ५ भ्रूचापेनिहितः कटाक्षविशिखोनिर्मातुमर्मव्यथांश्यामात्माकुटिलः करोतुकबरीभारोपि
मारोद्यमं मोहंतावदयंचतन्वितनुतांविंवाधरोरागवान् सद्वृत्तस्तनमंडलस्तवकथंप्राणैर्ममक्रीडति ६ तानिस्प
र्शसुखानिते चतरलाः स्निग्धादृशोर्विभ्रमास्तद्वक्त्रांवुजसौरभंसचसुधास्यंदीगिरांवक्रिमा साविंवाधर
माधुरीति विषयासंगेपिचेन्मानसंतस्यांलग्नसमाधिहंतविरहव्याधिः कथंवर्द्धते ७ ॥

मस्वरूपेकेशवेष्टोपिमारस्यापराक्रमंकरोतु मलिनस्यकुटिलात्मनोमारकस्वभावत्वात् हेतन्विविंवफलतुल्योयमधरमूर्छां
तनुतांनात्राप्यनौचित्यं यतोयंरागवान् रागीइदंतनुचितः सद्वृत्तः सुवर्तुलः स्तनमंडलैर्ममप्राणरूपैःक्रीडांकिमितिकरोतिसच्चरित
स्यतयाचरणमनुचितमिभावः ६ ततस्तद्विलासानुभवस्फूर्त्याह तानीति तस्यांपद्मिमनोलग्नसमाधिस्तर्हि विरहव्याधिःकथंवर्द्ध
ते हंतेति खेदे वियुक्तयोरेवविरहः स्यादत्रमनःसंयोगोवर्त्ततेइत्यभिप्रायः सत्यपिमनःसंयोगेचक्षुरादीनांपंचेंद्रियाणांसंयोगाभावा
त् विरहव्याधिर्युक्तइत्याह इत्युक्तप्रकारेणविषयासंगेपंचेंद्रियसुखानुभूयमानेपिइत्यर्थः कोसौप्रकारइत्याह तानिस्पर्शसु
खानिपूर्वानुभूतानिइत्यर्थः अनेनत्वगिंद्रियसुखं तथातेचतरलास्निग्धाश्चदृशोर्विलासाः अनेनचक्षुरिंद्रियस्यतद्वक्त्रांवुजसौ
रभंइतिघ्राणस्य तथासचसुधास्यंदिगिरांवक्रिमा इतिश्रोत्रस्य तथैवचसाविंवाधरमाधुरीइतिरसनस्य ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० यद्धिमनसानटनीयंनर्त्तयितव्यं तदाश्रीजयदेवभणितमिदमधिकंयथास्यात्तथावधानेनपठनीयं कुतःयतःहरिविरहाकुलायाःस
१३ ख्याववचनंयत्रतत् ८ सात्वांविनाकुत्रापिननिर्वृतिंलभतइत्याह आवासइति हेश्रीकृष्णसाश्रीराधात्वद्विरहेहंतखेदेहरिणीरूपायते
मृगीवाचरति श्लेषोत्तया पांडुवर्णापिइत्यर्थः कथंहरिणीरूपायतइत्याह वसतिस्थानमरण्यमिवाचरति प्रियसंगमतरेणदुः
खजनकत्वात् प्रियसखीमालापिजालमिवाचरति कुत्रचिद्गमनशंकयाजालवत्परितोवेष्टितात्वक्षमशक्यत्वात् गात्रसंतापो
पि निश्वासेनतथासंतापयति यथादातिनानेनोल्कानिर्गच्छतिइत्यर्थः हाइतिविषादे कंदर्पोपिसार्दूलविक्रीडितंविरचयन्कथंय
मइवाचरति यथामृगीवनेदावज्वालोद्विग्नाव्याघ्रत्रासिताजालपतिताक्वापिनिर्वृतिंनलभतेतथेयमपिइत्यर्थः प्रत्येकेनानेनह

श्रीजयदेवभणितमिदमधिकंयद्धिमनसानटनीयं हरिविरहाकुलवल्लवयुवतिसखीवचनंपठनीयं ८
आवासोविपिनायतेप्रियसखीमालापिजालायतेतापोपिश्वसितेनदावदहनज्वालाकलापायते सापि
त्वद्विरहेणहंतहरिणीरूपायतेहाकथंकंदर्पोपियमायतेविरचयन्शार्दूलविक्रीडितं २ देशागरागेणैक
तालीतालाभ्यां स्तनविनिहितमपिहारमुदारं सामनुतेकृशतनुरिवभारं १ राधिकाविरहेतवकेशव ध्रु
सरसमसृणमपिमलयजपंकं पश्यतिविषमिववपुषिसशंकं २ श्वसितवनमनुपमपरिणाहं मद
नदहनमिववहतिसदाहं ३ दिशिदिशिकिरतिसजलकणजालं नयननलिनमिवविदलितनालं ४

रिण्याइव श्रीराधायाः प्रियदृढानुरागोदर्शितः श्रीकृष्णस्यचकाठिन्यं स्निग्धायामस्नेहव्यवसायत्वात् २ पुनस्तच्चेष्टामेवविशेष
तआह स्तनेत्यादिना गीतस्यास्यदेशागरागः यथा आस्फोटेनाविस्फुरतरोमहर्षोनियुद्धसन्नद्धविपुलबाहुः प्रांशुप्रचंडद्युतिविद्यु
गौरोदेशागरागःकिलमल्लमूर्तिरिति तालश्चैकतालीहेकेशवसाकृशतनुराधातवविरहेस्तनविनिहितंहारमपिभारमिवमनुते तथे
यंकृशभूयथाहारवहनसमर्थमपिनास्तीत्यर्थः कीदृशंहारं उत्कृष्टमपि १ नकेवलंहारवहनासामर्थ्यमपितुसरसमसृणंचितृप्ता
मपिचंदनपंकंयथास्यात्तथाविषमिवपश्यति २ किंचदाहसहितंनिश्वासपवनंकामाग्निमिववहतीत्युत्प्रेक्षाः संततपातिश्वा
सोपिसंततइत्यर्थः कीदृशं उपमारहितंदैर्घ्यंयस्यतं ३ तथासानयननलिनंदिशिदिशिविक्षिपति कीदृशं जलकणिका
भिःसहितं किमिवविच्छिन्नंनालंयस्यतदिवच्छिन्ननालंहिकमलंसस्रवंविक्षिप्तंचभवतीत्यर्थः ४ ० ० १३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वयि अतिस्निग्धासा त्वं कथं निष्ठुरोसीत्याह स्वहृदयमर्मस्थाने सजलनलिनीदलजालं पृथुलं वर्म कवचं करोतितत्रोत्प्रेक्षते निरंतरनिपतितमदनशरभयात्त्रवरक्षणार्थमिव तस्या हृदये भवान् तिष्ठति हृदयं कामो विध्यति मर्मस्थानत्वात् हृदयविधनाच्च भवतोपि वेधः स्यादिति भवद्रक्षणार्थं संनह्यते इत्यर्थः निपतित इति भावे क्तः अविरतं निपतितं यस्मिन्निति विग्रहः पतितबाणादवनासंभवात् २ तदेव व्यनक्ति सा कुसुमशय्यां करोति कीदृशं अनल्पं विलासकलाया कांतरगी विरहेतदपि कुसुमशरशय्यायत इत्युत्प्रेक्षते कामशरशय्याव्रतमिव ननु अतिदुष्करं जीवनसंदेहापादकं किमितिकरोति तव परिरंभसुखाय दुःप्रापं तव परिरंभसुखमित्यर्थः ३ न केवलं कुसुमशयनीयं करोत्यपि च उदारमानन कमलं धारयति कीदृशं वलितान्यविरतं गलिता नि नयनयोर्जलानि धारयतीति तत्क्रमि

अविरतनिपतितमदनशरादिव भवदवनाय विशालं स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालं १ कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं व्रतमिव तव परिरंभसुखाय करोति कुसुमशयनीयं २ वहति च वलितविलोचनजलधरमाननकमलमुदारं विधुमिव विकटविधुंतुददंतदलनगलितामृतधारं ३ विलिखति रहसि कुरंगमदेन भवंतमशमशरभूतं प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं ५ प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं ६ ध्यानलयेन पुरः परिकल्प्य भवंतमतीव दुरापं विलपति हसति विषीदति रोदिति चंचति मुंचति तापं ७ ०

वं विधुमिव कीदृशं विधुं करालस्वराहोर्दंतस्य चर्वणेन गलिताऽमृतधारा यस्य तं ४ किंच रूपेण त्वामेवाराधयतीत्याह सा भवंतमेकांते कस्तूर्या विलिखति कीदृशं कामतुल्यं कामसादृश्यमाह मकरमधो विनिधाय करे च नवाम्रमुकुलबाणं विनिधाय लिखित्वा किं करोति प्रणमति त्वदन्यः कामो नास्तीति कृत्वेति भावः स्वचित्तोन्मादकत्वात् ५ सा न केवलं प्रणमति हे माधव मधोः सखे तव चरणे ऽहं पतिता इदमपि प्रतिक्षणं जल्पति कथं मच्चरणे पतसि त्वयि विमुखे सति तत्क्षणादेवामृतनिधिश्चंद्रोपि मयि तनुदाहं तनुते ६ पुनश्चातिव्यग्रतया ध्यानलयेन भवंतं साक्षादिव कृत्वा प्रलपति कथं ध्यानलये पुरः परिकल्पयति साक्षात्कथं न क्रियत इत्याह दुरापं त्वत्प्राप्त्यानंदोच्छलिता हसति पुनरंतर्ध्याने विषीदति रोदिति च पुनः पुरस्स्फुरंतमनुधावति पुनः प्राप्तमित्यालिंगनादिना तापं मुंचति ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णेतस्याः प्रत्युत्तरागोद्रेकं कथयंतीजीवनरक्षणप्रकारमाह कंदर्पज्वरेणायः संतापस्तेनातुरस्तनोरस्याः श्रीराधायाश्चेतश्चंदनादी
नां स्मरणोपि चिरं कथं संताम्यतीत्याश्चर्यं स्पर्शादिकं तु दूरे परिहृतमित्यर्थः यद्येवं तर्हि कथं जीवतीत्याह त्वदागमनप्रतिज्ञाया
तिस्तत्र योरसौ अनुरागस्तेन त्वामेकमेव प्रियं रहसि स्थिता ध्यायंती क्षीणापि कथमपि क्षणं जीवति एकमेवेत्यनन्यगतिकत्वं सूचितं अत
स्त्वया शीघ्रं गंतव्यमित्यर्थः कीदृशं शीतलतरं चंदनादयः शीतलास्त्वं शीतलतरस्तु ध्याने ताम्यति त्वद्ध्याने जीवतीत्याश्चर्यांतरमित्यभि
प्रायः ४ अतिव्याकुलतया सदैन्यमाह क्षणमिति हे माधव नयनयोर्निमेषमात्रेण हा कथं नयने निमिषो निर्मितो येन क्षणं कांतदर्शनवि
रम्यत इति खिन्नया पापया श्रीराधया पुरा ते तव विरहः क्षणमपि न सेहे नासोढुः असौ चिरविरहेण मुकुलिताग्रामागयुक्तां रसालशा

कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमःकमलिनीचिंतासुसंताम्यति किंतुक्लांतिवसेनशी
तलतरं त्वामेकमेवप्रियं ध्यायंतीरहसिस्थिता कथमपिक्षीणाक्षणंप्राणिति ४ क्षणमपिविरहःपुरानसेहेन
यननिमीलनखिन्नयाययाते श्वसितिकथमसौरसालशाखां चिरविरहेणविलोक्यपुष्पिताग्रां ५ वृष्टिव्या
कुलगोकुलावनरसादुद्धृत्यगोवर्द्धनं बिभ्रद्वल्लववल्लभाभिरधिकानंदाच्चिरंचुंबितः दर्पेणैवतदर्पिता
धरतटीसिंदूरमुद्रांकितोबाहुर्गोपतनोस्तनोतुभवतांश्रेयांसिकंसद्विषः ६ इतिश्रीगीतगोविंदेमंद
मधुसूदनोनामचतुर्थसर्गः ४ ॐ ०

खां विलोक्य कथं जीवतीदमप्याश्चर्यं निमिषविरहासहनशीलयाश्चिरविरहसहनमत्याश्चर्यमेवेत्यर्थः ५ अवश्यमेवास
द्गोकुलजनरक्षणाव्रती श्रीगोपेशकुमारोयं ममसख्या विरहतापापदमपि निवारिष्यतीति निश्चित्य श्रीराधासखी श्रीगोवर्द्धनो
द्धरणलीलास्मरंती स्वसखीसांत्वनाय चलितेति स्मरन् तल्लीलेकाव्यं श्रीकृष्णबाहुं वर्णयन् कविराशिषमाशास्ते वृष्टीति श्री
गोपेशसूनोर्बाहुर्भवतां श्रेयांसि तनोतु कीदृशः दर्पेणाहंकारेणैवार्थादिंद्रस्य विजिगीषया गोवर्द्धनाचलमुद्धृत्य बिभ्रत् तदहे
तुः वृष्ट्या व्याकुलस्य पालनेयोरसो वीररसस्तस्मात् पुनः कीदृशः गोपांगनाभिः श्रीकृष्णस्य वैदग्ध्यसौंदर्यादिकमद्भुतमाधि
कानंदाच्चिरं चुंबितः तत्रोत्प्रेक्ष्यते तच्चुंबनात्तल्ललाटस्य सिंदूरेणांकितमस्तु चकमुद्रांकितइव ६ अतएव श्रीराधावैकल्प
श्रवणेन मंदस्मेरमुखारविंदो मधुसूदनोयत्र स इत्ययं सर्गः इतिबालबोधन्यां चतुर्थः सर्गः ४ ॐ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपरं च चक्रोरीचराममपि पल्लवशय्यां वह्नेर्विकल्पो भ्रमो यत्र तद्यथा पश्यति ५ सा सायं कपोराग्निं गमनाशीति चिंतया पाणितलेन कपो
लं त्यजति तत्रोपमामाह सायमुच्चलं बालशशिनमिव कपोलस्यार्द्धभागदर्शनाद्बालचंद्रेणोपमा आताम्रत्वात् पाणितलस्य संध्या
याः विरहेण पांडुत्वात्कपोलस्य चंद्रेण साम्यं ६ अपि च साभिलाषं यथा भवति च यथा स्यात्तथा हरीति केवलं मरणे या मतिः सा गतिरिति
जन्मांतरेपि स वल्लभो भूयादिति सकामत्वं विरहेण मरणं यस्याः सेव ७ इत्यनेनोक्तप्रकारेण श्रीजयदेवभणितं गीतं केशव
पदमुपनीतं तत्पदयोः समर्पितं चित्तं जनं सुखयतु अर्थात् श्रोतॄन् ८ यदीदृगवस्था जातैव तदा किं मदुमनेनेत्यत आह सारोमांच
तिइति हे अश्विनीकुमारवत् चिकित्सक त्वं यदि न प्रसीदसि तदैतावत्यतनुज्वरे न त्यज्वरे सा वरतनुस्ते रसप्रयोगात् किं न जीवे

नयनविषयमपि किसलयतल्पं कलयति विहितहुताशविकल्पं ५ त्यजति न पाणितलेन कपोलं बालशशि
नमिव सायमलोलं ६ हरिरिति हरिरिति जपति सकामं विरहविहितमरणेव निकामं ७ श्रीजयदेवभणि
तमिति गीतं सुखयतु केशवपदमुपनीतं ८ सा रोमांचति शीत्करोति विलपत्युत्कंपते ताम्यति ध्यायत्युद्भ्रमति
प्रमिलति पतत्युद्याति मूर्छत्यपि एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्स्वर्वैद्यप्रतिम प्रसीदसि न चेत्त्य
क्तोन्यथा हस्तकः २ स्मरातुरां दैवतवैद्यहृद्य त्वदंगसंगामृतमात्रसाध्यां विमुक्तबाधां कुरुषे न राधामुपेंद्र
वज्रादपि दारुणोसि ३

दपि तु जीवेदेव इति छलोक्तिः वास्तवकाम
ज्वरः वरतनुरिति तत्समानान्या नास्तीति तस्याः लक्षणायुक्तो
मितिभावः ज्वरलक्षणान्याह सारोमांचति रोमांचमाप्नयति उद्भावयतीत्यर्थः सीत्करोति शीदिति शब्दं करोति विलपति
उच्चैः कंपते ग्लानिमाप्नोति कथं लभ्यते इति त्वां चिंतयति उच्चैः भ्रांतिमाप्नोति अक्षिणी संकोचयति भूमौ पतति तत्र लुठति
मूर्छामाप्नोति महाज्वरे सहसा रसदानं निषिद्धमिति तत्राह अन्यथान्यप्रकारेण हस्तकः हस्तक्रियया चनाद्यौषधांतरदा
नैर्वैद्यैस्त्यक्तः दाने पौषधस्य विशेषाप्राप्तेरित्यभिप्रायः कामज्वरपक्षे हस्तक्रिया शीतलाद्युपचारः सखीभिस्त्यक्त इत्यर्थः कृ
तेष्वपचारे तद्वृद्धेरिति भावः २ तद्वश्लेषोक्तेः सख्योक्तिं वर्णनव्यग्रा साक्षात्कथयति स्मरेति हे दैवतवैद्याभ्यामपि हृद्य निपुण इ
इव वज्रादप्यधिकमुपेंद्रवज्रं तदपि चेद्भवेत् तस्मादपि त्वं दारुणोसि मन्यो यतः इंद्रस्य वज्रो हि स्वप्रयमारयति त्वं तु विश्लेषेतत्रा
पि दूरतोऽतः उपाधिकेऽप्यधिकदारुणोसीत्यर्थः कुत एवं मन्यसे यतस्त्वदंगसंगामृतमात्रसाध्यां स्मरातुरां राधां विमुक्तबाधां कुरुषे
ऽगमात्रसाध्यसर्वांकरणेन कातिन्यमेव पर्यवसितमित्यर्थः ३

Dr. Urmila Sharma Collection, Varanasi

गी० कविजयदेवे भणति सति हरिविरहविलसितेन सुकृतेन मनसि हरिरुदयतु हरिविरहविलसितेन हेतुना यदुत्पन्नं सुकृतं तेन गाय
१५ तां भणतां च हृदि हरिरुदितो भवत्वित्यर्थः कीदृशे मनसि रभसस्य प्रेमोत्साहस्य विभवो यत्र तस्मिन्नेवं प्राणपरार्द्धनिर्मंछ
नीयचरणस्य निजप्राणनाथस्य विरहवैकल्यश्रवणेन मूर्छितायां स्वसख्यां तस्यां अपि वाक्स्तंभो जात इति पंचपदैः समा
प्तिः ५ अथ तन्मूर्छाविघटनोपायांतरमपश्यन्सखी श्रीकृष्णचरितमेव पुनर्वर्णयितुमारभ्यते श्रीराधिकायाः अभिसारिकावस्थां
सखीवचनेन वर्णयिष्यन् तदाह पूर्वमिति हे सखि पूर्वं यत्र कुंजे कामस्य सिद्धयः अशेषाः कास्त्वया सह प्राप्तास्तस्मिन्ने
व निकुंजरणवमन्मथकेलिसिद्धस्थेवं तस्मिन् पुनर्माधवस्त्वत्कुचकुंभनिर्भरपरिरंभामृतं भूयः प्रचुरं वांछति सांद्रानंद
संदोहजनकत्वेन कुचकुंभपरिरंभस्यामृतत्वं नन्वेतदतिदुर्लभं तीर्थगमनमात्रेणाऽभीष्टदेवताराधनं विना कथं सेत्स्यतीत्यत्राह निरंत

भणति कविजयदेवे विरहविलसितेन मनसि रभसविभवे हरिरुदयतु सुकृतेन ५ पूर्वं यत्र समं त्वया रतिपतेरासा
दिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमंत्राक्षरं
भूयस्त्वत्कुचकुंभनिर्भरपरिरंभामृतं वांछति २ गुर्जरीरागे एकतालीतालो रतिसुखसारे गतमभिसारे मदन
मनोहरवेशं न कुरु नितंबिनि गमनविलंबनमनुसर तं हृदयेशं १ धीरसमीरे यमुनातीरे वसति वने वनमा
ली ध्रु गोपीपीनपयोधरमर्दनचंचलकरयुगशाली

रं त्वामेव ध्यायन् त्वमेवेष्टदेव तेत्यभिप्रायः मंत्रजपमंतरेणेष्टदेव
तेत्यभिप्रायः मंत्रजपमंतरेणेष्टदेवता पिना चिरात् प्रत्यक्षी भवतीति निरंतरं तवैवालापमंत्राक्षरं जपन् तवैवालापमंत्राक्षरमिति सिद्धमे
वतं महातीर्थं इति झटिति सिद्धिप्रदं च ध्वनितं २ एवं तच्चरितश्रवणेन किंचिदुच्छ्वसितायां तस्यां अत्युत्सुकतमात्वद्वृत्तं निरीक्ष्य कः संप्राप्ते
नेतस्तदभिसरणं युक्तमित्यभिसाराय प्रार्थयते रतिसुखेत्यादिना अभिसारलक्षणं यथा याभिसारयते कांतं स्वयं वाभिसरत्यपि
सा ज्योत्स्नी तामसी यानयोग्यवेशाभिसारिकेति अस्यापि गुर्जरीराग एकतालीतालो यमुनातीरे वने वनमाली वसति कीदृशे धी
रः समीरो यस्मिंस्तस्मिन् अनेन सुखदत्वं निविडत्वान्निर्जनत्वं चोक्तं वने तज्जमनसहजमेव स्यादत आह अभिसारे गतं प्राप्तमभिसृत
मित्यर्थः कीदृशे रतिसुखस्य फलरूपे कदाचित्कार्यांतरार्थं गतस्यात् मदनेन त्वन्मिलनाभिलासेन मनोहरो वेशो यस्य तं अ
तो हे नितंबिनि गमनविलंबनं न कुरु तर्हि किं करोमि तमनुसर कीदृशं हृदयेशं त्वत्प्राणनाथं अत एव विरहदुःखितस्यानुसरणे १५
प्रसक्तनितंबायाः सहजविलंबनगमनायास्तव विलंबेन युक्तमित्यर्थः १ ध्रु

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तदार्तिश्रवणव्याकुलोपि स्वापराधं चिंतयातिभीतः स्वयमगच्छन्नात्मदुःखनिवेदनपूर्वकानुनयेन तत्कोपशिथिलीकरणाय सखीमेवं शिक्षितवानित्याह अहमिति मधुरिपुणा नियुक्ता सखी स्वयमेत्य श्रीराधां पुनरिदमुवाच किमस्का नियुक्ता अहमिहैव निवसामि त्वं राधां याहि गत्वा किं करोमि मद्वचनेन तामनुनय यदि त्वय्येव तन्मानमपनेतुं शक्तो तेतदानयेथाः इत्युक्त्वा सहसा मद्गमनेन मानोतिगाढो भवेदित्यभिप्रायः १ गीतस्यास्य वराडीरागः रूपकतालः यथा विनोदयंती दयितं सुकेशी सुकंकणा चामरचालनेन करोद्धृताना सुरपुष्पगुच्छं वरांगनेयं कथिता वराडी तिरागलक्षणं हे सखि तव विरहे वनमाली सीदति त्वत्करकल्पितवनमालावलं वनेनैव जीवतीति वनमाली

अहमिह निवसामि याहि राधामनुनय मद्वचनेन चानयेथाः इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधां १ वराडीरागेण रूपकतालेन च वहति मलयसमीरे मदनमुपनिधाय स्फुटति कुसुमनिकरे विरहिहृदयदलनाय १ सखि सीदति तव विरहे वनमाली ध्रु दहति शिशिरमयूखे मरणमनुकरोति पतति मदनविशिखे विलपति विकलतरोति २ ध्वनति मधुपसमूहे श्रवणमपिदधाति मनसि वलित विरहे निशि ५०
निशि रुजमुपयाति ३ वसति विपिनविताने त्यजति ललितधाम लुठति धरणिशयने बहु विलपति तव नाम

शब्दोपन्यासः ध्रु कदा कदा सीदतीत्याह मदनं सन्निहितं कृत्वा मलयसमीरे वहति सति विरहिणां मर्मपीडनाय कुसुमसमूहे च स्फुटति सति समीरस्य शैत्यात्कामस्फूर्त्या तत्कुसुमवाणोद्दीपनाद्वा शीर्यत इव सीदतीत्यर्थः १ चंद्रे दहति मरणविधानुकरोति निश्चेष्टो भवति मूर्छतीति यावत् कामबाणे च पतति प्रतिविकलतरः सन्विलपति कुसुमपतनेहृदि विध्यत् कामबाणभ्रमेण क्रोश ति इत्यर्थः २ भ्रमरचये शब्दायमाने कर्णौ कराभ्यां प्राच्छादयति अत्युद्रिक्ते विरहे मनसि सति निशायाः क्षणे क्षणेऽधिकपीडामाप्नोति निशायास्त्वत्प्राप्तिकालत्वात्तदप्राप्तालि ध्वनिश्रवणात् पीडामनुभवतीत्यर्थः ३ रुचिरं सौधं त्यक्त्वा वनमध्ये वसतीत्यर्थः विरहवैकल्यादेकत्र स्थितुमभावाद्धित्तान शब्दोपादानं तथा भूमौ लुठति बहुप्रयासात्तथा तव नाम विलपति तव नामध्येया दन्यत्तस्य मुखेन निःसरतीत्यर्थः ४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०
१६

कृतहरिसेवे श्रीजयदेवे परमरमणीयं भणति सति भोः साधवः प्रमुदितहृदयं यथा स्यात्तथा हरिं नमत कीदृशं अतिसदयं प्र
ताः सुकृतेन शोभनचरितेन कमनीयं सर्वैर्वांछनीयं ८ अथ पातिशीघ्रमभिसारयितुमत्युत्कंठितप्रियः स्वमेव वर्णयति विकिर
तीति हे कांते तव प्रियः मदनकदनक्लांतः सन् वर्त्तते क्लांतत्वमेवाह नागतैव सा प्रियेति कृत्वा मुहुः वारंवारं श्वासान् विशेषेण लो-
च्चैः विकिरति त्यजतीत्यर्थः अधुनागमिष्यतीति कृत्वाग्रे दिशो मुहुरीक्षते कदाचिदन्येन पथागत्य तिष्ठतीति मुहुः कुंजे प्रविश्य
त्वामपश्यन् कथं नागतेति मुहुरव्यक्तशब्दं कुर्वन् ग्लापयति मयि दृढानुरागेव सा सांप्रतमेवागमिष्यतीति मुहुः शय्यां र
चयति मच्चित्तजिज्ञासार्थं कदाचिदितो निर्गत्य तिष्ठतीति पर्यंकुलं यथा स्यात्तथा मुहुर्वीक्षते ३ अतः सत्वरगमनं सां
प्रतमिति गमनसमयानुकूल्यमाह त्वदिति तव वक्रतया सहाधुनाऽस्तसूर्यः समग्रमस्तंगतः गोविंदस्य मनोरथेन च सह तमोऽ

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयं प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयं ८ विकिर
ति मुहुः श्वासानाशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुंजं गुंजन्मुहुर्बहु ताम्यति रचयति मुहुः शय्यां पर्याकु
लं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्त्तते ३ त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तंगतो
गोविंदस्य मनोरथेन च समं प्राप्तं तमः सांद्रतां कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना तन्मुग्धे वि
फलं विलंबनमसौ रम्योऽभिसारक्षणः ४ आश्लेषादनु चुंबनादनु नखोल्लेखादनु स्वांतजप्रोद्बोधादनु संभ्रमा
दनु रतारंभादनु प्रीतयोः अन्यार्थं गतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दंपत्योरिह को न को न तमसि व्रीडा

धकारो न विडंबितः प्राप्तं न केवलं तमो नैविडं प्राप्तं गोविंदस्य मनोरथोऽपीत्येवं पूर्वापरवाक्यार्थः चक्रवाकानां करुणस्वनेन तुल्याम
दभ्यर्थना चटुवाचो जाताः तत्तस्मात् हे मुग्धे विलंबनं विफलं यतो सौ क्षणोऽभिसारे रम्यः प्रियतम उत्कंठितः भ्रमभ्यर्थनपरा सखी
तथापि वेषादिव्याजेन गमनविलंबनमिच्छसि मोगध्यं ५ अथोत्कंठावर्द्धनार्थं गोविंदस्य मनोरथमेव विवृत्याह आश्लेषादिति यथा तः
तस्मिंस्तमसि दंपत्योरावयोर्व्रीडया कथं सहसेवे कर्तुमारब्धुमित्येवंभूतया लज्जयाभिभूतो रसः शृंगाररूपः को न को नाभूदपि
सर्व एवाभूदत आह तस्मिंस्तमस्यपि किं भवेत् एतेनाभिसर्तुं श्रीराधिकाप्रोत्साहनमुक्तं कीदृशोः अन्यार्थं सरभसं प्रान्योन्या
गमनसमयं प्रतीक्ष्य तदनंतरं क्षिप्यततरोचितं करणीयं तयोर्नवस्थितचित्तं व्यथितयोः पुनः कीदृशोः भ्रमाद्भ्रमणं विधाय वर्त्म
नि मिलितयोस्तर्हि कथं व्रीड विभिन्नतारसस्य संभाषणैर्जानतोः ततः प्रथममाश्लेषात्तदनु चुंबनात्तदनु नखोल्लेखात्तदनु काम
स्य प्रकाशनात्तदनु संभ्रमात्तदनु रतारंभात्तदनु प्रीतयोः तस्मात् दिदृशोत्कंठितेनास्मिन् तव गमनविलंबो न युक्त इत्यभिप्रायः सर्वानुभूतस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कदाचिदन्यांगनांकामुकोभिःस्ततःस्यादत आह कृतसंकेतो यत्र तं वेणुं वनामसमेतं मृदु च यथा स्यात्तथा वादयते धूर्तःकदा
चित्वत्तारणायैवं करोति तत्राह तवतनुसंगतपवनेन युक्तं रेणुं बहु मनुते धन्योऽयं रेणुर्यस्तस्याः शरीरस्पर्शवायोः स्पर्शसुखमनु
भूत्वमेदृशमविभाग्यं नास्तीति बहुमानार्थः २ तदेकपरत्वसदृत्याह पक्षिणि पतति सति वृक्षाद्भूमावित्यर्थात्तज्ज्ञेयं पत्रे च विचः
लति संकितं भवत्या उपगमनं यत्र तद्यथा स्यात्तथा शय्यां निर्मिमीते तथा सचकितनयनं यथा स्यात्तथा तव पथानं पश्यति अ
वागत्यकेन यथागतेति पथो वलोकनमित्यर्थः ३ अतो हे सखि मंजीरं त्यज कुंजं चल कथं मंजीरं त्याज्यं यतोऽधीरं ततो मुखरं
सशब्दं तथा केलौ सुचंचलं अतोऽभीष्टं विरोधित्वाद्रिपुमिव कीदृशं कुंजं तिमिरपुंजेन सह वर्तमानं गौरांग्या नमकथं गम

नामसमेतं कृतसंकेतं वादयते मृदु वेणुं बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुं २ पतति पतत्रे विचलि
तपत्रे शंकितभवदुपयानं रचयति शयनं सचकितनयनं पश्यति तव पंथानं ३ मुखरमधीरं त्यज मंजीरं रिपु
मिव केलिसुलोलं चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलं ४ उरसि मुरारेरुपहितहारे घन इव त
रलबलाके तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ५ विगलितवसनं परिहृतरसनं घटय जघनम
पिधानं किशलयशयने पंकजनयने निधिमिव हर्षनिधानं ६ हरिरभिमानी रजनिरिदानीमियमपि याति वि
रामं कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामं ७

मनस्यादिति नामस्याभिसारको चितवेशमाह नीलप्रछदपटं
पिधेहि ४ तत्र गमने किं स्यादत आह हे गौरांगि विपरीतरतौ मुरारेरुरसि राजिष्यसि वर्त्तमानसामिप्ये लट् कीदृशे उपहितोऽर्पि
तो हारो यत्र तस्मिन् तथा सुकृतस्य फलरूपे कस्मिन्निव चंचला बकपंक्तिर्यत्र तस्मिन् घने विद्युदिव उरसो घनेन हारस्य बलाकया
गौर्य्यास्तडिता साम्यं ५ तत्प्रकारमाह हे पंकजनयने किशलयशयने जघनं घटय कीदृशं श्रीकृष्णेन हेतुना विगलितं वसनं यस्मा
त् ततस्तेनैव दूरीकृता रसना यस्मात्तत् अत एवापिधानमावरणरहितं तत एव तस्यैव हर्षनिधानं किमिव निधिमिव गतावरण
स्य निधेर्दर्शनेन निःस्वस्य हर्षो जायत एवेत्यर्थः ६ किं च हरिरिति प्रायेण त्वां मानयितुं शीलं यस्य स तदेकपर इत्यर्थः अभिमानी
तत्रान्याभिसारशंकामप्यापादयति इयं प्रत्यक्षतो दृश्यमाना रजनीदानीमेवावसानं यातीति भयं दर्शयति अपयाति तस्मान्मम वच
नं सत्वररचनापरिपाटी यत्र तद्यथा स्यात्तथा कुरु किं तदित्याह मधुरिपोर्मनोरथं पूरय ७

Dr. Urmila Sharma Collection, Varanasi

गी०
२७

गीतस्यास्य गौंडकिरीरागः यथा रतोत्सुकाकांतवरप्रतीक्षया संपादयंतीम् दुःखमतुल्यं इतस्ततप्रेरितदृष्टिः राधां श्यामा तनुगौं
डकिरी प्रदिष्टा रूपकतालः हे नाथ हे हरे वासगृहे राधा सीदति त्वय्यनुरक्तत्वात्संतापएवानुभूतस्तेनेति नाथशब्दः त्वया
नंसमात्राल्लज्जायै एतादिक हरणाद्धरिशब्दोपि निर्दिष्टः सखी संतापस्मरणे यानां धहरेइत्येकपदसंबोधनमपि धृतस्य
कारमाह दिशि दिशि सा सर्वासु दिक्षु यावंति रहः स्याना नानितु भवंतमेव पश्यति त्वन्मयं जगत भूत्तस्याः त्वं मनसापितां
न स्मरसीति संतापकत्वमेवेत्यर्थः कीदृशं तस्याः अधरस्य मधुरमधूनि पिबंतं त्वदधरेति पाठे त्वच्छब्दोः स्वार्थः अन्या
धरमधूनि पिबंतमित्यर्थः अनेनापि लोभेष्योत्पादकतया तथैवार्थः १ यद्येनादृशी तत्कथं नागच्छतीत्याह त्वदभिसारे सा
हेन वलंती प्रियमाणा किं यति पदानि चलंति पतति आगंतुससमर्थेत्यर्थः २ यद्येवं तर्हि कथं जीवतीत्याह साकेवलं

पश्यति दिशि दिशि रहसि भवंतं तदधरमधुरमधूनि पिबंतं १ नाथ हरे सीदति राधा वासगृहे ध्रु० त्वदभि
सारणरभसेन वलंती पतति पदानि कियंति चलंती २ विहित विशदबिसकिसलयवलया जीवति पर
मिह तव रतिकलया ३ मुहुरवलोकितमंडनलीला मधुरिपुरहमिति भावनशीला ४ त्वरितमुपैति न क
थमभिसारं हरिरिति वदति सखीमनुवारं ५ श्लिष्यति चुंबति जलधरकल्पं हरिरुपगत इति तिमिरमन
ल्पं ६ भवति विलंबिनि विगलितलज्जा विलपति रोदिति वासकसज्जा ७ श्रीजयदेवकवेरिदमुदितं रसि
कजनं तनुतामतिमुदितं ८

वरतिकलया त्वत्करस्मरणावेशेन जीवति अत एव त्वत्संतापभीत्या कृता मृणालानां
पल्लवानां च कंकणाय यास्सा ३ अत एवाहं मधुरिपुरिति भावनपरा त्वन्मयात्मकस्फूर्त्येत्यर्थः प्रियस्यानुकृतिलीले
तिनाट्यलोचनं ४ पुनः स्फूर्त्यपगमे त्वत्त आत्मानं पृथक् मत्वा द्रुतमभिसारं हरिः कथं नोपैत्यनुवारं वारं सखीं प्रति व
दति ५ पुनश्चात्म्यावेशे नत्वयि स्फुरति सति श्रीकृष्ण आगत इति कृत्वा मेघतुल्यं प्रचुरमंधकारं श्लिष्यति चुंबति च ६
पुनस्तदपगमे त्वयि विलंबिनि सति विगलितलज्जा सति विलपति रोदिति च कीदृशी वासकसज्जावस्थां प्राप्ता ७ ।
श्रीजयदेवकवेरिदमुदितं शृंगाररसभावितांतः करणमतिप्रायेण मुदितं करोतु अनेन शृंगाररविशिष्टभक्तैर्यमिदमा ९७
स्वादनीयमित्यर्थः ८

CC0. In Public Domain, Digitizagtion by eGangotri

अथैतद्वर्णनव्यग्रतया गमनायोद्यतामालक्ष्य गमनप्रकारमाह हे सुमुखि भाग्यवान् स श्रीकृष्णस्त्वां पश्यन् कृतार्थो भवतु ।
कीदृशीं सभयचकितं यथा स्यात्तथा पथि तिमिरे नेत्रे विन्यस्यन्तीं केनचित्कुत्रचित्तिष्ठता दृश्ये हमिति नेत्रस्य सभयचकितत्वं ते
या प्रतितरु तरौ तरौ इत्यर्थः स्थित्वा मन्दपदानि तन्वतीं दीर्घत्वाच्छीघ्रगमनाशक्त्या पदयोर्मन्दविन्यासत्वं अतः कथमपि
रहःप्राप्तां पतः अनङ्गतरङ्गिभिरङ्गैरुपलक्षितां उत्कण्ठयानङ्गतरङ्गित्वमङ्गानां ६ अथ रहवर्णनव्याकुलः कविस्तयोर्मिथो
मिलनकालस्मरणजातहर्ष आशिषमातनोति राधेति देवकीश्रीयशोदा तस्या नन्दनस्त्वां चिरं भवतु केनाम्नी नन्दभार्याया य

सभयचकितं विन्यस्यन्तीं दृशौ तिमिरे पथि प्रतितरु मुहुः स्थित्वा मन्दपदानि वितन्वतीं कथमपि रहः प्राप्तामङ्गै
रनङ्गतरङ्गिभिः सुमुखि सुभगः सत्वां पश्यन्नुपैतु कृतार्थतां ६ राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौली
स्थलीनेपथ्योचितनीलरत्नमवनीभारावतारान्तकः स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं कंसध्वं
सनधूमकेतुरवतु त्वां देवकीनन्दनः ७ इति श्रीगीतगोविन्दे महाकाव्ये अभिसारिकावर्णने साकाङ्क्षपुण्
डरीकाक्षो नाम पञ्चमः सर्गः ५ अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा तच्चरितं गोविन्दे मनसिज
मन्दे सखी प्राह १ गोंडकिरीरागः

शोदा देवकीति तन्त्रे पुराणे प्रसिद्धं तद्देव दृढयति श्रीराधाया मनोहरमुखकमलस्य मधुपः यतस्त्रैलोक्यमौलिस्थल्याः श्री
वृन्दावनस्यालङ्कारप्रयोग्यं नीलरत्नं यत एवं व्रजसुन्दरीजनस्य मनसस्तोषाय रजनी मुखं किञ्च कंसस्य ध्वंसनाय धूमकेतुः यतो
ऽवनेर्भारावतारान्तकः ७ रावणाधिकागमनाकांक्षया सहितः पुण्डरीकाक्षो यत्र स इति सर्गोयं इति बालबोधन्यां पञ्चमः सर्गः
५ एवं प्रियतमे विकल्प अवरोनदशामीदृशीन्मुखीमिवतामालक्ष्यातिव्यग्रा सखी पुनरागत्य कृष्णं प्राहेति तस्या वासकसज्जा
वस्थां वर्णयिष्यन्नाह अथेति अथानन्तरं तां लतागृहे दृष्ट्वा तच्चरितं गोविन्दे सखी प्राह कीदृशीं चिरमनुरक्तां यद्येवं तर्हि
कथं नागच्छति गन्तुमशक्तां तर्हि कृष्ण सकथमागतः मनसिजेन प्रियार्त्ति अवरामनमनोदुःखेन मन्दे निरुत्साही कृते स्ववास १
कवसातकान्ते समेष्यति निजं वपुः सज्जीकरोति गेहं च या सा वास
कसज्जिकेति वासकसज्जालक्षणं १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत एव धृष्टः प्रगल्भो वैकुंठोऽपवसरति सर्गः इति बालबोधन्यां षष्ठः सर्गः ६ पुनरुत्कंठिताचरितं वर्णयिष्यन् श्रीकृष्णस्यानाग
मनकारणमाह अत्रेति अत्रांतरे अस्मिन्नवसरे श्रीकृष्णातिथिसेवावसरे इंदुः किरणसमूहैर्वृंदावनांतरमदीपयत् कीदृशः दि
कपूर्वदिशैव सुंदरी तस्या वदने चंदनबिंदुः पुनः कीदृशः प्रकटीभूता कलंकस्य श्रीः शोभा यस्मिन्सः अनेन चंद्रस्य पूर्णप्रापतो ज्ञात
त्रौ त्प्रेक्ष्यते कुलटानां कुलस्य वर्त्म विरोधेन संजातं यस्पातकं पातकाज्जातो रोगविशेषो यस्य स इव यः खलु पातकी भवति स रोगवि
शेषचिह्नितो भवतीत्यर्थः १ तामेवावस्थामाह प्रसरतीत्यादिना साउच्चैः कृतो नानाप्रकारो विलापो विविधशंकारूपो यत्र तद्य
थास्यात्तथा परितापं चकारेत्यर्थः कीदृक् कदेत्यत आह शशधरबिंबे प्रशरति सति माधवे च विहितविलंबे सति विधुरा व्या

इति श्रीगीतगोविंदे महाकाव्ये वासकसज्जावर्णने धृष्टवैकुंठो नाम षष्ठः सर्गः ६ ॥ अत्रांतरे च कु
लटाकुलवर्त्मपातसंजातपातक इव स्फुटलांछनश्रीः वृंदावनांतरमदीपयदंशुजालैर्दिक्सुंदरीव
दनचंदनबिंदुरिंदुः १ प्रशरति शशधरबिंबे विहितविलंबे च माधवे विधुरा विरचितविविधविला
पं सा परितापं चकारोच्चैः २ मालवरागयतितालाभ्यां कथितसमयेपि हरिरहह न ययौ वनं म
म विफलमिदममलरूपमपि यौवनं १ यामि हे कमिह शरणं सखीजनवचनवंचिता ध्रु. यदनु
गमनाय निशि गहनमपि शीलितं तेन मम हृदयमिदमसमशरकीलितं २

कुला २ परितापमेवाह कथितेत्यादिना अस्यापि मालवरागयतितालौ हे इति स्वगतसंकथनं इह समये कं शरणं यामि स
खीशरणं यहि सखीजनस्याश्वासवचनेन कृष्णोऽस्माभिरानीत एवेत्यनेन वंचिता स्वामिषु कृतोऽप्रतारिता ध्रु. तर्हि समयं प्रती
क्षतां यावत्स्वयमायाति हरिः सखीप्रतारणावचनं व्यनक्ति कथितसमये सखिद्वारा कथितगमनसमये चंद्रानुदये काले
यस्माद्वहहखेदे हरिर्मम मनोहरो मन्मथो हत्वेत्यर्थः वनमपि न ययौ कुतोऽन्यागमिष्यतीत्यर्थः तस्मान्ममेदं यौवनं रूपमपि
विफलं व्यर्थं प्रियेषु सौभाग्यफलं हि यौवनमित्यभिप्रायः १ न केवलमद्य एव प्रथमतोऽपि ताभिरेवापादितो यमनर्थ इ
त्याह किंचेतस्ततो भ्रमणोऽस्मीत्याह यस्यानुनिरंतरसंगमाय रात्रौ वनमपि सेवितं तेन श्रीकृष्णेन हेतुना ममेदं हृदयं कामबाणेन
विद्धमहो कष्टमित्यर्थः २ १८

Dr. Urmila Sharma Collection, Varanasi

स्वसख्यार्त्तिस्मरणेनातिव्याकुलासेर्ष्यमिव पुनराह विपुलेति हे धूर्त्त राधावंचनचातुरीसुभगंमन्य कंठागत प्राणां तां च न मानाय्य निष्क्रि
तोसि इति धूर्त्त तया संबोधनं अनल्पं कंदर्पचिंतां हृदि कृत्वा मृगाक्षी शरलचित्ता श्रीराधा तव रससमुद्रे मग्ना बभूव चेत्समुद्रमग्नालंबनं ।
विना कथं जीवति ध्यानलग्ना त्वेत्यर्थात् ज्ञेयं समुद्रमग्नो यथा काष्ठाद्यवलंबने तथेयमप्युपायांतराभावात् ध्यानलग्नेत्यर्थः ध्या
न प्राप्तांगमविकारमाह विपुलारोमांचपंक्तिर्यस्याः सा तथा स्फीतसीत्कारं यथा स्यात्तथा व्याहरंती अभ्यंतरे जनितो योऽसौ
जडिमा जाड्यं तेन जाता या काकुस्तया व्याकुलमित्यपि क्रियाविशेषणं जलधिमग्नस्याप्यंतर्जाड्यात्पुलकः शीत्कारैर्व्याकुलो
क्तिर्भवतीत्यर्थः २ पुनरतिशीघ्रागमनाय तस्या वासकसज्जाचेष्टितमाह अंगेष्वेति श्रीकृष्णो मामेवं पश्यन्नंदमनाभविष्यतीत्यं
गेष्वाभरणं बहुशः करोति नागत इति त्यजति पुनः करोतीत्यनेनाकल्पः पत्रेपि पक्ष्मादिना संचारिणि सति प्राप्तमागतं त्वां परि

विपुलपुलकपालिः स्फीतशीत्कारमंतर्जनितजडिमकाकुव्याकुलं व्याहरंती तव कितव विधायामंदकंदर्प
चिंतां रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी २ अंगेष्वाभरणं करोति बहुशः पत्रेपि संचारिणि प्राप्तं त्वां परि
शंकते वितनुते शय्यां चिरं ध्यायति इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशतैर्व्याशक्तापि विना त्वया ३०
वरतनुर्नैषा निशां नेष्यति ३ किं विश्राम्यसि कृष्णभोगिभवने भांडीरभूमिरुहि भ्रातर्यासि न दृष्टिगोचरमितः
सानंदनंदास्पदं राधाया वचनं तदध्वगमुखान्नंदांतिके गोपतो गोविंदस्य जयंति सायमतिथिप्राशस्त्यगर्भा

शंकते अनेन विकल्पः आगत्य श्रीकृष्णोऽत्र शयिष्यति इति शय्यां वितनुते अनेन तल्परचना चिरं ध्यायति तवसंगमरसस्मरति अने
न संकल्पलीलाशतं इत्यनेन प्रकारेण कल्पविकल्पतल्परचनाशंकल्पलीलाशतव्याशक्तापि वरतनुर्वेषा त्वया विना निशां न
नेष्यति ३ अपकविः पुनरेतद्वर्णनव्याकुलस्तस्या अभिसारात् पूर्वचरितं कथयन्नाह किमिति गोविंदस्य गिरो जयंति श्रीराधि
कायामनोरथं पूरयिष्यतीत्यर्थः कीदृशस्य श्रीनंदस्य समीपे पथिकस्य मुखात् श्रीराधायास्तद्वचनं गोपतो गोपयतः ।
किंतद्वचनं हे भ्रातः पथिक भांडीरनामतरुतले किं विश्राम्यसि विश्रामं मा कुरु इत्यर्थः कथं कृष्णभोगिन कालसर्पशयन
स्थाने पक्षे संभोगशीलस्य कृष्णस्य तर्हि इदानीं क्वापि नंदस्यास्पदं गृहं किं न यासि कीदृशं आनंदेन सहवर्त्तमानं क
तिदूरे इतः स्थानात् दृष्टिगोचरं इतो दृश्यते इत्यर्थः कीदृशो गिरः सायंकाले अतिथयस्तस्मै
वप्राशस्त्यं प्रशंसादिरूपं तदेव गर्भोऽभिप्रायो यासां ताः ५

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वोक्तं विकल्पं विवृणोति तत्किमिति संकेतीकृतमनोहरे वानीरलताकुंजे प्रियप्रस्थानकांतोपि नागतस्तस्मात्कामपि अभिन
वप्रेमानुबंधबंधुरां कामिनीमभिसृत्य तत्संदर्भिसारंगतः मय्येव दृढानुरागो सौ कथमन्यामभिसरिष्यतीति विचिंत्य वितर्कांतर
माह किं वा मित्रैः क्रीडाकौशलैर्बद्धः कृताभिसारसमये स्मिन्नदपि न संभवतीति विचिंत्य वितर्कांतरमाह मामभिसरन्नंधका
रिणिवनसमीपे किमुद्भ्राम्यति पंथानमविदित्वेत्यर्थः चतुरशिरोमणेः सहस्रशोनुभूतस्थलभ्रमः कथं स्यात् इति विचिं
त्य वितर्कांतरमाह क्लांतं मद्विश्लेषदुःखेनोपतप्तं मनो यस्य सः पथिमपि प्रस्थातुमसमर्थ एव नागतः ३ चंद्रोदयेन श्री
कृष्णागमनप्रतिबंधे सति तं विनागतसखीं दृष्ट्वा नोदितां तस्या विप्रलब्धावस्थां वर्णयितुं वितर्कांतरमाह अथेति अ
थानंतरं माधवं विनागतां सखीं वीक्ष्य श्रीराधा यत्तदूचे तमाह कीदृशी दुःखातिशयेन वक्तुमसमर्था अकृतकार्या

तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभिर्बद्धो बंधुभिरंधकारिणि वनाभ्यर्णे किमुद्भ्राम्यति
कांतः क्लांतमना मनागपि पथि प्रस्थातुमेवाक्षमः संकेतीकृतमंजुवंजुललताकुंजेपि यन्नागतः ३ अथा
गतां माधवमंतरेण सखीं प्रियं वीक्ष्य विषादमूकां विशंकमाना रमितं कयापि जनार्दनं दृष्टवदे
तदाह ४ वसंतरागे यतितालाभ्यां स्मरसमरोचितविरचितवेशा गलितकुसुमदरविलुलितके
शा १ कापि मधुरिपुणा विलसति युवतिरधिकगुणा ध्रु हरिपरिरंभणवलितविकारा कुचक
लशोपरितरलितहारा २ विचलदलकललिताननचंद्रा तदधरपानरभस

त्वादित्यर्थः कीदृशी जनार्दनं कया
परिमितं दृष्टवद्विशंकमाना विप्रलब्धालक्षणं यथा अहरहरतरागाद्दूतिकां प्रेष्य पूर्वं सरभसमुपयाति क्वापि संकेतकं पा
नमिलति खलु यस्या वल्लभो दैवयोगाद् इति हि भरतस्तां नायिकां विप्रलब्धामिति ५ अस्य वसंतरागयतितालौ हे सखि का
पि युवतिः मधुरिपुणा सह विलसति तत्र हेतुः मत्तोप्यधिका गुणा यस्याः सा मत्संकेतमागतं गुणैराकृष्य विलसतीति ध्रु १
णाधिका ततः कर्तृकरमणोचं ध्वनितं ध्रु गुणानाह स्मरेत्यादिना कामसंग्रामस्य बाहुयुद्धस्योचितो विरचितो वेशो यया सा
विलासानुभावानाह रणवेशेन गलितानि कुसुमानि येभ्यस्ते दर विलुलिता केशा यस्याः सा अनेन लीलाविशेषः सूचि
तः १ तद्विलासविशेषमेवमनन्तिहरिस्यादिभिः हरेः परिरंभणेन वलितो रोमांचादिविकारो यस्याः सा ततश्च कुचक
लशयोरुपरि तरलितो हारो यस्याः सा २ तथा च तत्संभ्रमशिरोधूननेन विचलद्भिरलकैः ललितः सुंदर आननचंद्रो यस्याः सा
ततश्च श्रीकृष्णस्याधरपानारंभसेन कृता तंद्रानंदनिमीलनं यस्याः सा ३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतो मम मरणमेव वरं श्रेष्ठं तत्र हेतुः अतिवितथं व्यर्थं केतनं देहं यस्याः सा अचेतना अज्ञाहं विरहानलमिह वने किमर्थं वि
षहामि धैर्येणात्मानं कदर्थयामि अरण्ये रुदितवत् कश्चित् ज्ञातापि नास्तीत्यर्थः ३ न केवलमत्रनागत इति चंचलचित्तो
यं कामप्यन्यामभिरत इत्याह कापि कृतसुकृतकामिनी हरिमनुभवति तेन सह केलिसुखमित्यर्थः मां तु परमसुखरूपाव
संतनिशा अहह खेदे विकलयति यानिशा दूस्यमपि विप्रियं संगमयति सुकृताभावात् सैव मां विधूरयतीत्यर्थः कथं सा
नुभवति कृतसुकृतं यया सा ममतादृक्सुकृतं नास्तीत्यर्थः विधुरो विकलो चेति विश्वः ४ अतो यद्यप्य अहह खेदे तत्कर

मम मरणमेव वरमतिवितथकेतना किमिह विषहामि विरहानलमचेतना ३ मामहह विधुरयति
मधुरमधुयामिनी कापि हरिमनुभवति कृतसुकृतकामिनी ४ अहह कलयामि वलयादिमणि
भूषणं हरिविरहदहनवहनेन बहुदूषणं ५ कुसुमसुकुमारतनुमतनुशरलीलया स्रगपि हृदि
हंति मामतिविषमशीलया ६ अहमिह निवसामि न विगणितवनवेतसा स्मरति मधुसूदनो मा
मपि न चेतसा ७ हरिचरणशरणजयदेवकविभारती वसतु हृदि युवतिरिव कोमलकलावती ८

कल्पितवलयादिमणिभूषणमद्यापि निर्लज्जा धारयामि तत्र कर्थं निर्लज्जता हरिविरह एव वह्निस्तस्य धारणेन बहूनि
दूषणानि यस्य तद्देहोभरणात दोस्यात् स्त्रीरत्नं प्रियावलोकफलो हि वेष इत्यर्थः ५ किं वक्तव्यमन्यभूषणानां तत्स्त्रीत्वे
हृदि धृतापि पुष्पमालापि कामबाणविलासेन मां हंति तर्हि तत्त्यागः सहस्व कुसुमतः सुकुमारा तनुर्यस्यास्तां तत्सहन
सामर्थ्यमपि नास्तीत्यर्थः कीदृश्या अतिविषमः स्वभावो यस्यास्तया अन्योपि बाणः [illegible] त्वामपथपतितकामबाण
स्त्वविघ्नं तं भिनत्तीति विषमशीलत्वं ६ मम मूर्खतैवात्र अपि चेत्याह भीतिम विगणय्यात्र भयंकरद्वने तत्समागम
माकांक्षयाहं तिष्ठामि मधुसूदनो ऽस्थिरसौहृदो मां चेतसापि न स्मरति कीदृशं न विगणितं वनं वेतसश्रयं यासा
७ हरिचरणौ शरणं यस्य जयदेवकवेर्भारती हृदि वसतु भक्तानामित्यर्थात् कस्मिन्निव यूनां हृदि युवतिरिव की
दृशी कोमला माधुर्यगुणयुक्ता पदेषु गीकलावती कवित्वशालिनी पक्षे रतिकलायुक्ता ८

Dr. Urmila Sharma Collection, Varanasi

रत्नकिंशिपुष्पं २

गी० किंचचिकुरेःरुणोऽस्तानस्तबकंरचयतितत्पुष्पैःकबरीकरोतीत्यर्थः कीदृशं चपलायांविस्फुरत्इवपरमाशोभायस्यतत् कीदृशे मे
२० घपुंजवत्सुंदरे अतएवस्वगुणवर्णनेनमुखरीकृतंतरुणास्य श्रीकृष्णस्याननयेनतत् यतोरतिपतिरेवमृगस्तेनतत्रसततप्रि
गीत्वात्तस्यकानने २ तथाकुचयुगगगनेऽमलेमणिसरमेवतारकपटलंयोजयति मणिसरोमुक्ताहारः अत्रसमस्तरूपकमिदंकुचयु
गमेवगगनंबृहत्वात् कीदृशे सुनिविडेतथामृगमदरुचिभिर्मेदुरितेलिप्ते किंच नखांकएवशशीतेनभूषिते ३ अपरंचमृदुभु
जयुगले मरकतवलयमेवमधुकरनिचयमर्पयति कीदृशे जितानिमृणालखंडानियेनतस्मिन् यतः करतलमेवनलिनी
दलंयत्रतस्मिन् अतएवहिमवच्छीतलेमृणालेमृणालेधर्मस्यार्पणेनाद्भुतकंजत्वं ४ अथचरतेर्गृहे आश्रयेजघनेमणि
सररसनंनिक्षिपति अत्रतत्स्पर्शकंपिततयाकरंक्षिपतिनतुवंधातीत्यर्थः कीदृशे तोरणस्यमांगल्यस्रजोहसनमुपहासोय

घनचयरुचिरे रचयतिचिकुरे तरलिततरुणानने कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने २ घट
यतिसुघने कुचयुगगगने मृगमदरुचिरुषिते मणिसरममलं तारकपटलं नखपदशशिभूषिते ३ जितवि
सखकले मृदुभुजयुगले करतलनलिनीदले मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ४ रति
गृहजघने विपुलापघने मनसिजकनकासने मणिसररसनं तोरणहसनं विकिरति कृतवासने ५ चरण
किशलये कमलानिलये नखमणिगणपूजिते बहिरावरणं यावकभरणं जनयति हृदियोजिते ६ रमय
ति सुभृशं कामपि सुदृशं खलहलधरसोदरे किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे ७
इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके कलियुगचरितं नवसतु दुरितं कविनृपजयदेवके ८

स्यात्तत् कीदृशे विस्तीर्णमपघनमंगंयस्यतस्मिन् तथाकामस्यस्वर्णपीठे अतःकृताश्रीकृष्णस्यलीलाविशेषवासनायेनतस्मि
न् ५ तथाचपर्यंकस्थितयाचरणेसिध्यतेचरणपल्लवेयावकभरणंबहिरावरणंकरोति यतः श्रियोनिवासेऽतोनखाएवमण
यस्तैः पूजिते श्रीनिवासमणियुतगृहोहृत्प्रियुक्तेवेत्यर्थः ६ किंचपरंचकेहलधरस्याविदग्धस्यसोदरेसदृशेकृष्णेकामपिसुभृश
यथास्यात्तथारमयतिसतीहवनमध्येविरसंविफलंयथास्यात्तथाकिमिहविफलमवसमित्येतत्सखिवद मामपिसामृग्यन्वया
सहरमणाद्दुरेःखलत्वं ७ इहेत्काव्यकर्तरिकवीनांनृपेजयदेवकेकलियुगचरितंदुरितंनवसतु कुतःयतोमधुरिपोःपद
सेवके अतएवकृतंहरेर्गुणानांचिंतनंयेनतस्मिन् तत्रापिरसस्यशृंगारस्यभरणंकथनंयस्यतस्मिन् इहद्रोगमाऽस्यपहिनोती २०

CC0. In Public Domain, Digitizagtion by eGangotri

तथा चंचलाभ्यां कुंडलाभ्यां ललितौ कपोलौ यस्याः सा किंच मुखरिता रसना यत्र तस्य जघनस्य गत्या लोला चंचला ४ त
तश्च दयितस्य विलोकितेन चातुर्येण लज्जिता हसिता च अथ च बहुविधं यत् पूह पारावतादि कूजितवत् रतिरसे रसिता श
श्चितेयथा सा ५ अत एव विपुलाः पुलकाः पृथुर्वेपथुश्च तेषां तरंगो यस्याः सा तथा श्वसितनिमीलिताभ्यां पुनर्विकसन्ना विभवन्ननंगो
यस्याः सा ६ ततः श्रमजलकणभरेण सुंदरं कलेवरं यस्याः सा तथा प्रियस्य वक्षसि परिपतिता यतः सुरतसंग्रामे पंडिता ७ श्रीजय
देवभणितं हरिरमितं कलिकलुषं कामादि क्लेशमितं जनयतु इत्यर्थः एतत्सर्वं स्वस्मिन् तत्पूर्वं चरितस्फूर्तिरेवेति ज्ञेयं एवम
न्यत्रापि पद्यापद्यमूह्यं ८ अथ चंद्रं श्री कृष्णमुखत्वेनो त्प्रेक्षतत्र स्वविरहेण पांडुत्वस्फूर्त्या स्वस्मिन् तस्यार्ति प्रणयितां

चंचलकुंडलललितकपोला मुखरितरसनजघनगतिलोला ४ दयितविलोकितलज्जितहसिता बहु
विधकूजितरतिरससरसिता ५ विपुलपुलकपृथुभंगा श्वसितनिमीलितविकसदनंगा ६ श्रमजल
कणभरसुभगशरीरा परिपतितोरसि रतिरणधीरा ७ श्रीजयदेवभणितहरिरमितं कलिकलुषं
जनयतु परिशमितं ८ विरहपांडुमुरारिमुखांबुजद्युतिरयं तिरयन्नपि वेदनां विधुरतीव तनोति
मनोभुवः सुहृदये हृदये मदनव्यथां ९ गूर्जरीरागेकतालीतालो समुदितमदने रमणीवदने चुंबन
वलिताधरे मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे १ रमते यमुनापुलिनवने वि
जयी मुरारिरधुना ध्रु

स्फुरंती चंद्रमाक्षिपति विरहेति अयं विधुर्वेद नांतिरयन्नपि मम हृदये प्रियेखेदे मदनव्यथामतीव
तनोति तत्र हेतुः अन्यायां सह रममाणस्यापि मद्विरहेण पांडुवन्मुरारिमुखांबुजं तद्वद्द्युतिर्यस्य सः कुतः स्वांत्यपयति
मनोभुवः सुहृत् मदनस्तत्र तं व्यथयति मदनसुहृत्त्वेन तन्मुखस्मारकतया त्रचंद्रो मां व्यथतीत्यभिप्रा ९ पुनस्तस्यैव त
स्याएवस्वाधीनभर्तृकात्वसूचनपूर्वकं तल्लीलाविशेषमाह समुदितेत्यादिना अस्यापि गूर्जरीरागेकतालीतालो यमुनायाः
पुलिनस्य वने मुरारिरधुना क्रीडति कीदृशः विजयी मंडनादिकौशलेन सर्वातिशायी ध्रु रमणप्रकारमाह रमणीव
दने सपुलकं यथा स्यात्तथा मृगमदतिलकं लिखति कस्मिन् कमिव चंद्रे मृगमिव अत्र मुखस्य चंद्रेण साम्यं तिलक
स्य मृगेण साम्यं कीदृशे सम्यक् उदिते अनुकूलनायकस्पर्शेनाविर्भूतः कामो यत्र अत एवात्युल्लाससंवलितचुंबनेन
प्रियेकोपविषादेचेति विस्वः ॥ युक्तोधरो यत्र तस्मिन् १

Dr. Urmila Sharma Collection, Varanasi

कनकस्य निकषपाषाणोयारुचिस्तद्वद्वसनं यस्य तेन यारमिता सा परितो जनानां हसनेन श्वसिति सौभाग्यगर्वेणाकांश्चिद्दपिनगण यतीत्यर्थः ६ सकलभुवनेषु ये जना युवानस्तेभ्यो वरः श्रेष्ठो यः किशोरस्तेन या रमिता सा अतिकरुणावसेन पीडां न प्राप्नोति जगद्दुर्लभ नरुणप्राप्त्याशोकानुपपन्नेरिति ७ अनेन श्रीजयदेवभणितेन श्रीराधायां माधवमुद्दिश्य वचनेन हरिरपि हृदयं प्रविशतु प्रविष्टक र्णरंध्रैर्लीस्वानां भावसरोरुहमित्युक्तेः ८ अर्थात्तु कण्ठावेगेनानिलमेवोपलंभते मनोभवेति दैन्येनाद्धे सामाह हे मनोभवस्यानंद दायक चंदनानिलयरोपकारि नित्यर्थः प्रसन्नो भव पुनरीर्ष्या दयाद्भुदमाह रे दक्षिण सर्वानुकूल वामतां प्रतिकूलतां मुंच दक्षिणपथ प्रवृत्तत्वम पथ्य प्रवर्त्तेरयुक्तत्वात् वामतां त्यक्त्वा किं विधेयं तत्राह हे जगत्प्राण जगद्धितोपि त्वं मनोभवानंदनाय चंदनतरुसं

कनकनिकषरुचिशुचिवसनेन श्वसिति न सा परिजनहसितेन ६ सकलभुवनजनवरतरुणेन वहति न सा रुजमतिकरुणेन ७ श्रीजयदेवभणितवचनेन प्रविशतु हरिरपि हृदयमनेन ८ मनोभवानंदन चंदनानिल प्रसीद रे दक्षिण मुंच वामतां क्षणं जगत्प्राण निधाय माधवं पुरो मम प्राणहरो भविष्य सि ६ रिपुरिव सखीसंवासोयं शिखीव हिमानिलो विषमिव सुधारश्मिर्यस्मिन् दुनोति मनोगते हृ दयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृशां वामः कामो निकामनिरंकुशः ७ बाधां विधेहि मलयानिल पंचबाण प्राणान् गृहाण न गृहं पुनराश्रयिष्ये किं ते कृतांतभगिनि क्षमया तरंगैरंगानि सिंच मम शाम्यतु देहदाहः ८

पर्कोद्विषमश्रेन्मां मारयसि तदा मम पुरः क्षण ... मपि माधवं कृत्वा पश्चान्मम प्राणहरो भविष्यसि ६ अथ नीरा गोदयिते सानुरागं चिंतेन निंदति ममैवायमपराधः नान्यस्येत्याह रिपुरिति यस्मिन् हरौ चिंता रूढेपि सखिभिः सहैकत्रवासोपि रिपु रिव दुनोति स्वच्छंदगमनप्रतिबाधकत्वात् शीतलवायुरप्यग्निरिव तापकत्वात् चंद्रोपि विषमिव दाहकत्वात् तस्मिन्निर्दये को रव हिताहितविचाराभवगमात् ७ संप्रति विरहे न तत्प्राणोत्सर्गे कृतमतिराह हे मलयानिल पीडां विधेहि सविषत्वेन बाधा विधा नसामर्थ्यात् हे पंचबाण प्राणान् गृहाण पंचबाणधारकत्वेन पंचप्राणग्रहणयोग्यत्वात् हे यमस्य भगिनि तिसमया किं त्वंक थं क्षमसे ममानुजायाः क्षमानुपयुक्ता तर्हि किं कर्त्तव्यं तरंगैरंगानि सिंचतेन किं स्यात् मम देहदाहः शाम्यतु दशमीदशां विधे

CC0. In Public Domain, Digitizagtion by eGangotri

अथ श्रीकृष्णं विना आत्मगमनेन विषण्णां सखीं प्रत्यतिनिर्वेदेनाह नायात इति हे सखि हे दुति सखीभूत्वापि मत्प्रीत्यै दौत्यकर्मणि प्र
वृत्ते दयारहितः शठो वंचको यदि नायातस्तर्हि त्वं किं दूयसे मा व्यथस्वेत्यर्थः तदानयनाशक्यादूये बहुवल्लभः स निःशंकं रमते तत्र
कार्ये तेन वक्ति दूषणं न किमपि मां ईदृग्वस्थां ज्ञात्वाप्यनागमनान्निर्दयत्वं माम् अभिसार्य अन्यरमणाच्छाठ्यं इत्थं सखीमनुनीय निर्वि
ण्णा भंग्यात्मनो दशमीदशामाह पश्याद्येदानीमेव दयितस्य मिलनाय इदं मम चेतः स्वयं यास्यति केन प्रकारेण तदाह उत्कंठया आ
धिक्येनोत्तप्तवत् स्फुटदिदं चेतो यानेहेतुः गुणैराकृष्यमाणं क्लिष्टगुणशब्दोक्तिरीर्ष्याविरोधिलक्षणैव दयितप्रकोपितया ५।
तद्गुणैरन्यस्याः सुखं वर्णयती स्वस्यास्तदलाभे निर्वेदेन श्लोकोक्तार्थमेव निश्चिनोति अनिलेत्यादिना अस्यापि देशवराडीरागो रूप

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छंदं बहुवल्लभः स रमते किं तत्र ते दूषणं पश्याद्य प्रिय
संगमाय दयितस्याकृष्यमाणं गुणैरुत्कंठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ५ देशवराडीरागरू
पकतालाभ्यां अनिलतरलकुवलयनयनेन तपति न सा किशलयशयनेन १ सखि या रमिता वनमा
लिना ध्रु० विकसितसरसिजललितमुखेन स्फुटति न सा मनसिजविशिखेन २ अमृतमधुरमृदु
तरवचनेन ज्वलति न सा मलयजपवनेन ३ स्थलजलरुहरुचिकरचरणेन लुठति न सा हिमक
रकिरणेन ४ सजलजलदसमुदयरुचिरेण दलति न सा हृदि विरहभरेण ५ ॥

कताल: हे सखि या वनमालिना रमिता सा किशलयशयनेन न तपति कृष्णांगसंगे तत्सुखप्रदमेव भवतीत्यर्थः तपतीति न अ
पितु तपत्येवेति काक्वोक्तिः एवं सर्वत्र योज्यं कीदृशेनानिलेन तरलेन तरले ये नीलोत्पले तद्वन्नयने यस्य तेन उत्पलवत् शैत्यगुणो
ननाप्रशमनादिति भावः या रमिता वनमालिना इति सर्वत्र योज्यं ध्रुपदं चैतत् १ विकसितसरसिजवत्सुखं यस्य तेन या रमिता
सा काममार्गेण विद्धा न भवति कमलवन्मुखेन लीलाविशेषेकवचवदावृत्वादिति भावः २ अमृतादपि मधुरतरमतिकोमलं
वचनं यस्य तेन या रमिता सा मलयजपवनेन न ज्वलति अमृतवत्सिक्तयाज्वालातिभावानुपपत्तेरिति ३ स्थलकमलवद्रुचिरौ
करचरणौ यस्य तेन या रमिता सा चंद्रस्य किरणैर्भूमौ न परिवर्तते तत्करचरणस्पर्शसुखोद्बोधकतयेंदुकिरणस्य ४ सजल
जलदानां समूहादपि रुचिरेण या रमिता सा विरहभरेण हृदि न विदीर्यते जलवदार्द्रतत्तयाविदारणासंभवादिति ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०
२२ त्वच्चिंताजागराक्रोऽवशोऽनरतिजागरादित्याह हे कृष्ण सहजारुणं तवदशनवसनमधरः संप्रति तनोरनुरूपं तनोति अनुं शारूप्यं अनुरूपं श्या
मतामित्यर्थः तां तनोति कुतोऽनुरूपं कज्जलेन मलिनयोर्विलोचनयोश्चुंबनेन विरचित नीलिमरूपं यत्र तत् मलिनशब्दे प्रयोगस्त्वीर्षयात
वाधर एव धूर्त्ततां प्रकटयतीत्यर्थः २ त्वच्चिंतया नस्यान्मलिनो यमधरो नागरीचुंबनादित्याह तवेदं वपुः रतिजयलेखमनुहरति सदृशी
करोति कीदृशं अनंगवरणे तीक्ष्णनखक्षतरूपा रेखा यत्र तत् कस्याइव मरकतमणिखंडेऽर्पिता या काँचनद्रवलिखिताक्षरपंक्तेरिव
वपुषः कृष्णत्वान्नखक्षतस्य रक्तत्वान्मरकतार्पितहेमलिपेः साम्यं ३ तवान्वेषणावनभ्रमणान्ममेदं वपुः कंटकैः क्षतं न नागरीनखैरि
त्याह तवेदं हृदयमुदारं मनोहरं दर्शनीयमित्यर्थः कीदृशं चरणकमलगलद्दलक्तकेन सिक्तं श्यामोरस्यरुणयावकेन शोभित।

कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं दशनवसनमरुणं तव कृष्ण तनोति तनोरनु
रूपं २ वपुरनुहरति तव स्मरसंगरखरनखरक्षतरेखं मरकतशकलकलितकलधौतलिपेरि
व रतिजयलेखं ३ चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारं दर्शयतीव बहिर्मदन
म ५ द्रुमनवकिशलयपरिवारं ४ दशनपदं भवदधरगतं मम जनयति चेतसि खेदं कथयति कथम
धुनापि मया सह तव वपुरेतदभेदं ५ बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्यति नूनं कथम
थ वंचयसे जनमनुगतमसमशरज्वरदूनं

मिति भावः तत्रोत्प्रेक्षा मदनद्रुमस्य हृदयांतर्गतं नव पल्लवसमूहं बहिर्दर्शयतीव सिक्त एव वसः पल्लवान् प्रकटयतीत्यर्थः ४ गौरि
कच्चित्क्षितमुरो नांगनाचरणालक्तकसिक्तमित्याह हे कृष्ण तवैतद्वपुः कर्त्तृ कथमधुनापि मया सहैक्यं कथयति नैरपेक्षताभिन्न
ता प्राप्तेः कथमभेदज्ञानं तवाधरगतं दशनक्षतं मम चेतसि खेदं जनयतीति भङ्ग्योक्तिः अन्यदेहक्षतस्यान्यत्र तथा जनकता
दभिन्नत्वज्ञानं न यतो रागादिकं छद्मनाच्छादितमिदं तूदितं चेद्कलारमणीयमिति भावः ५ तदर्शावलोकतो हि मालिन्ये
न स्फुटितोयमधरः नांगनाचुंबनत इत्यत आह हे कृष्ण मलिनात्मक तव मनोपि बहिरिव मलिततरं भविष्यति इति नूनमु
त्प्रेक्षे कथं वंचयेति प्रश्ने अन्यथामशरपीडितमनुकूलं जनं कथं वंचयसे अशुद्धांतःकरणस्यनेयं रीतिरित्यर्थः ६ २२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ एतद् दुःखवर्णनमसहिष्णुः कविः सिंहावलोकनन्यायेन साधारणकेलिरात्रेः प्रातश्चरितवर्णनं श्रीराधायाः खंडितावस्थां
वर्णयिष्यन् श्रीराधामाधवयोः प्राक्तनकेल्यनंतरावस्थितिमाह प्रातरिति नंदात्मजो जगदानंददायास्तु कीदृशः स्वच्छंदं यथा स्यात्
यथा सखीमंडले हसति सति व्रीडाचंचलेन नयनयोरंचलेन राधाननेऽधाय स्मेरस्मेरमुखः कृतः साक्षी हासः प्रभाते अच्युतनीलनिचोलवी
त्यश्रीराधायाः उरः संवितमुत्तरीकृतं पीतांशुकं यत्र तादृशा वीक्ष्य ८ अतः सर्गोयं नागरायेन रागरसमूहास्ते घामयनं मूलभूतं यः स
श्रीकृष्णो यत्र सः इति बालबोधन्यां सप्तमः सर्गः ७ ॥ तामवस्थामेव वर्णयति अथेत्यादिना खंडितालक्षणं यथा उल्लंघ्य
समयं यस्याः प्रेयानन्यत्रभोगवान् भोगलक्ष्मांकितः प्रातरागच्छेत् खंडिता हि सेति अथानंतरं हरिविदरणोपस्पर्शी कललितलवंगेत्या
दि सखीवचनश्रवणेन संचरदधरेत्यादि स्वमनोरथकथनेन चातिकष्टेन रात्रिं नीत्वा सा श्रीराधा प्रभाते प्रणतमपि प्रियं साभ्य
सूयं यथा स्यात्तथाह कीदृशी स्मरशरैर्जर्जरितापि कीदृशं अग्रे अनुभयस्वापराधजनितकोपशांतये विनयं वदंतं अनेन प्रणाः

प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमंडले व्रीडाचंच
लेमंचलं नयनयो राधाय राधानने स्मेरस्मेरमुखोयमस्तु जगदानंददायनंदात्मजः ८ इति श्रीगीतगोविंदेम
हाकाव्ये विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः ७ ० अथ कथमपि यामिनीं विनीय स्म
रशरजर्जरितापि सा प्रभाते अनुनयविनयं वदंतमग्रे प्रणतमपि प्रियमाह साभ्यसूयं १ भैरवीरागयति
तालाभ्यां रजनिजनितगुरुजागररागकषायितमलसनिमेषं वहति नयनमनुरागमिव स्फुटमुदितर
साभिनिवेशं १ हरिहरियाहि माधवयाहि केशवमावद कैतववादं तामनुसरसरसीरुहलोचनयातवहरति

पराकाष्ठादर्शिता ततोपि प्रसादमनालोक्य प्रणतं प्रियापाप्तात्र्यौ कंठगतप्राणापि प्रियदर्शनमात्रेणासूयोदयात् १ अस्य भैरवीरा
गयतितालौ यथा सरोवरस्थे स्फुटिकस्य मंडपे सरोरुहैः शंकरमर्चयंती तालप्रयोगप्रतिबंधगीता गौरी तनुर्नारदभैरवी प्रमितिः हरिहरिइति
खेदे हे माधव याहि हे केशव याहि इतोपगच्छ कामामि हे सरसीरुहलोचन यातव विषादं हरतितामनुगच्छ लोटप्रयोगस्तस्फूर्तिसंभावन
या माधवेति धवेन भवसीत्यनियत प्रियत्वं हे केशवेति प्रकृष्टकेशद्वारोन्मुक्तकेशत्वः सरसीरुहलोचनेत्यउन्मुदितनेत्रत्वं च ध्वनितं त्व
नेयुरुजागररागेण कषायितलेः हिताकृतं तव नयनमनुरागं वहतीत्युत्प्रेक्षा प्रस्यनरागः प्राचुर्यात्तव हृदि स्थितिमुद्वेदन् चक्षुषाति
गत इत्युत्प्रेक्षार्थः सहजारुणनयनेन जागरादित्याह अलसेनमीलितं यत्तत् अननुभूतत्व दूचनर्त्रितया निमीलितेनेत्रेन जागराद्दित
कषायितारसस्य भिनिवेशेन तत यदित्वं नान्यां गनासंगतस्तत्कथमेतादित्यभिप्रायः अग्रेप्येवमुन्नेयं २

Dr. Urmila Sharma Collection, Varanasi

गी०
२३

अथपुनस्तत्वापिमानानपगमात् उपेक्षयाह एवं तर्हि तेसत्यं तरलसुकामपि वहिर्मानावगुहितामाकर्ण्य सखी प्राहेत्याह तामि
ति श्रुत्वानंतरं तां श्रीराधां सखीरहउवाच कीदृशीं मन्मथेन खिन्नां यतः कलहांतरितां तदवस्थां प्राप्तां अतएव रतिरसात् खंडि
तां ततो विषादयुक्तां अतोऽनुवारंवारं चिंतितं हरिचरितं चाटूक्तिपादपतनादियया तां यासखीनां पुरः पादपतितं वल्लभं रुषानि
रस्य पश्चात्तपति कलहांतरिता हि सेति कलहांतरितालक्षणं १ अस्यापि रामकिरीरागयतितालो किमुवाचेत्याह अयेइतिसं
बोधने मानिनिमाधवे मानं माकुरु माधवे इति मधुर्वसंतो वसंतेअप्यो महासंपत्तेः पत्यौ चेति मानानर्हत्वमुक्तं ध्रु कथं मानो
नविधेयइत्याह मृदुपवने वहति सति हरिरभिसरति हे सखि भुवने अतःपरं किमधिकं सुखमस्ति माधवाभिसरणादन्यत्सु
खं नास्त्येव १ सुखमस्तु तेन मम किमिति चेत् आस्तां आभ्यां किमपराधं इति सोत्प्रासमाह कुचकलसं किमर्थं विफलीकु

ताम थमन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नां अनुचिंतितहरिचरितां कलहांतरितामुवाचरहःस
खी १ रामकिरीरागयतितालाभ्यां हरिरभिसरति वहति मृदुपवने किमपरमधिकसुखंसखिभुवने
१ माधवे माकुरु मानिनिमानमये ध्रु तालफलादपिगुरुमतिसरसं किमु विफलीकुरुषे कुचकलसं
२ कतिनकथितमिदमनुपदमचिरं मापरिहरहरिमतिशयरुचिरं ३ किमितिविषीदसिरोदिषि
विकला विहसति युवतिसभा तव सकला ४ सजलनलिनदलशीतलशयने हरिमवलोकयसफल
यनयने ५ जनयसि मनसि किमिति गुरुखेदं शृणु मम वचनमनीहितभेदं ६ ॥

रुषे यत्तस्तालादपिगुरुं अर्थं तथा सरसं रससास्त्रोत्कलहसहितं तदुपभोगं विनास्य विफलीकरणं नयुक्तमित्यर्थः २ तदुपदेशं
विनेत्थं क्रियत इत्यत्राह इदं न केवलमधुनैव पुनरनुक्षणं मया कियद्वा न कथितं इदं किं हरिमनोहरशीलं मात्यजयतोऽतिशयेन
सुंदरं ३ एतच्छ्रुत्वा श्रुमुखी प्रत्याह त्वमधुना किमिति विषीदसि विफला सती रोदिषी मा विषीद मा रोदीरित्यर्थः कथमेवं न विधेयं
तव सकला प्रतिपक्षयुवतिसभा विशेषेण हसति ४ यथेयं न विहसति तथोपदिशेत्यत आह सांबुपद्मपत्रैरचिताशय्या यस्यां हिता
दृशि सांद्रबुद्रलशय्यायां तापोनशाम्येत् कथं शाम्येत् हरिमवलोकयततः किंस्यात् नयनेसफलय त्रिभुवननयनमहोत्सवं
लोकादन्यत्तापप्रशमकं नास्तीत्यर्थः ५ एतच्छ्रुत्वापि दिविघन्नी प्रत्याह मनसि गुरुखेदं किमिति जनयसि नैवं विधेयं तर्हि किं क
तैव्यं मम वचनं शृणु कीदृशीं अनीहितमचेष्टितमनभिलषितमिति यावत् प्रकृते त्वनीहिते विरहदुःखमेव तस्य भेदोय २३

CC0. In Public Domain, Digitizagtion by eGangotri

नवंचयाम्यहं त्वमेवमुधाशंकसेइत्याह भवानवलाग्रासायखीवधायेत्यर्थः वनेषुयद्भ्रमति अत्रकिंविचित्रंनकिमपीत्यर्थः तत्रोदा
हरणमाह स्त्रीवधेतव निर्दयबालचरित्रं पूतनिकैवविस्तारयति सर्वसमबाल्येचेदेवंस्तनदायावधः तर्हि अधुनाकैशोरेऽस्मद्वधेकिं
चित्रमितिभावः ७ हे विबुधा श्रीकृष्णमधुरलीलास्वादनचतुराः श्रीजयदेवभणितंरतिवंचिताया खंडितायाः युवत्याः श्रीराधायाः
विलापंशृणुत कीदृशं सुधाया अपिमधुरं अतएव विबुधालयादपिदुर्लभं अत्रेदंनास्तीतिभावः ८ तथेवपुनराह तवेति हे
कितवत्वदालोकोऽधमममप्रसिद्धप्रेमातिशयभंगेनत्वद्वियोगदुःखादप्यनिर्वचनीयांलज्जांजनयति कुतोलज्जाजननं तवेदंप
त्यक्षमरुणद्योति हृदयंपश्यंत्याः ततोपिकुतः प्रियायास्तस्याःपादालक्तेनव्याप्तंतत्रोत्थेहतेप्रसरदनुरागंवहिरिवतांप्रतिकृ

भ्रमतिभवानवलाकवलायवनेषुकिमत्रविचित्रं कथयतिपूतनिकैवबधूबधनिर्दयबालचरित्रं ७ श्रीजयदे
वभणितरतिवंचितखंडितयुवतिविलापं शृणुतसुधामधुरंविबुधाविबुधालयतोपिदुरापं ८ तवेदं
पश्यंत्याः प्रसरदनुरागंवहिरिवप्रियापादालक्तच्छुरितमरुणद्योतिहृदयं ममाद्यप्रख्यातप्रणयभर
भंगेनकितवत्वदालोकःशोकादपिकिमपिलज्जांजनयति २ अंतर्मोहनमौलिघूर्णनचलन्मंदारविश्र
सनस्तंभाकर्षणदृष्टिहर्षणमहामंत्रःकुरंगीदृशां दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदांभ्रंशःकं
शारिपोर्व्यपोहयतुवःश्रेयांसिवंशीध्वनिः ३ इतिश्रीगीतगोविंदे खंडितावर्णनेविलक्षलक्ष्मीपति
र्नामाष्टमःसर्गः ८

ङ्गितच्छन्नानुरागः हृदयंभित्वावहिर्निर्गतः इत्यर्थः २ अथश्रीराधायाःप्रतिगाढमाननिर्बंधमभिप्रेत्या
त्मप्रयत्नेशिथिलेपिवंशीसहायेनावश्यंमानोपयास्यतिइति सखीतदनुनयेप्रवर्तिष्यतीतिस्मरन् कविः वंशीध्वनिंवर्णयन्ना
शिषमातनोति अंतरिति कंसरिपोर्वंशीध्वनिर्वोयुष्माकंश्रेयांसिव्यपोहयतु विगतापोहनातिकरोतुनित्यंददातु इत्यर्थः की
दृशः कुरंगीदृशांमनोमोहनेमौलिघूर्णनेचलन्मंदारकुसुमानांविश्रंसनेस्तंभनेआकर्षणेवशीकरणेमहामंत्रः कीदृशः दर्पयु
क्तैर्दानवैर्दूयमानानांदेवतानामतिवार्य्यदुःखविपत्तीनांभ्रंशोभ्रंशनरूपोनाशकइत्यर्थः मच्छरणमात्रेणदेवार्तेत्यभया
न्मुच्यंतेइत्यर्थः ३ अतएवविलक्षोगाढमानावलोकाक्षिप्ताच्चित्तोलक्ष्मीपति
र्यत्रस इतिसर्गः इतिबालबोधन्यामष्टमःसर्गः ८ ॐ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मितिसव्रीडं यथास्यात्तथाऽऽह स्मितं सविव दनं यथा तां १ किमुवाच तत्राह वदसीत्यादिना अस्यापि देशवराडीरागा ष्टताली तालौ लघद्रुतौ लघ इत्येत्यष्टताली प्रकीर्तिते तिताललक्षणं हे प्रिये चारुशीले मयि यो मानस्तं मुंच कीदृश मसिदानं अकारणं चारुशीलाया अकारणमानस्यायुक्तत्वादित्यर्थः कथं मानमपहाय ब्रुवीषि यतः सपदि ततृणं त्वन्मानसमकालमेव कामाग्निर्मममानसं दहति ततो मुखकमलमधुपानं देहि अंतर्दाहस्य पानेनैव शांतिरित्यर्थः ध्रु दुरापमिदं दूरेस्तु त्वं यदि किंचिदपि वदसि तदा दंतरुचिकौमुदिममाति घोरं भयतिमिरं हरति यथा तिमिरापगमे किं स्यात् तव वदनचंद्रमा स्वमम लोचनचकोरं स्फुरदधरसीधवे उच्छलिताधरसुधापानार्थं साभिलाषं करोति नयनयोश्चकोरत्वेन तदेकजीवनत्व

देशावराडीरागाष्टतालीतालौ वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दरतिमिरमतिघोरं स्फुरदधरसीधवे तव वदनचंद्रमा रोचयति लोचनचकोरं १ प्रिये चारुशीले मुंच मयि मानमनिदानं सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानं ध्रु सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातं घटय भुजबंधनं जनय रदखंडनं येन वा भवति सुखजातं २ त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नं भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नं ३

मुकं १ त्वं देकजीवनेमयि रोषो न संभवत्येवसं भवतीति चेत्तर्ह्येवं कुर्वित्याह हे सुदति प्र सन्नवदनेयदि सत्यमेव मयि कोपिन्यसि तदा खरा नखरा एव शरास्तैः प्रहारं कुरु तेन चेन्न तुष्यति तदा भुजाभ्यां बंधनं घटय तेनाप्य संतोषस्तदा रदैर्दशनैः खंडनं जनय किंबहुना केन येन वा सुखजातं भवति सुखमुत्पद्यते तदेव कुरु अत्र गूढोऽभिप्रायः स्वीयेऽपराधि निदंड एवोचितो येहेतिभावः २ ननु या तव प्रिया सेव दंडं करोत्विति चेत्तत्राह त्वमेव मम जीवनमसि त्वमेव मम भूषणमसि त्वद्व्यतिरे केणान्यजीवनो नादिकमपि चेन्नास्ति तर्ह्यन्यांगनानां का वार्ता इत्यर्थः यतो भवः संसारः स एव जलधिः रत्नाकरस्तत्र त्वं रत्नरू पा सर्वप्रेयसीश्रेष्ठेत्यर्थः यथा कश्चित् रत्नाकरे विचिंत्य चिंतारत्नं लब्ध्वात्मानं पूर्णं मनुते तथा अस्मिन् लोके स्त्रीरत्नं त्वां प्राप्य कृ ता र्थोस्मीति भावः अत एव भवती निरंतरं मय्यनुकूला भवत्वित्यर्थं मम हृदयं मत्यतिशयेन यत्नवत् ३ ३ ॥ २५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंतेवचनं श्रोतव्यमेवेत्याह हरेरसमिपंयातु वहुचाटुकरोतु हृदयमतिवंचितं किमितिकरोषि श्रीकृष्णमधुरवचनेनमोदय स्वचित्तं
माखेदयेत्यर्थः ७ श्रीजयदेवभणितं रसिजनं सुखयतु यतो हरेश्चरित्रं यत्ततत् अतएवातिललितं ८ अथतस्यामनुनयायांसेर्ष्या
मिवाह स्निग्धेति तिस्निग्धे स्निग्धेयत् यतः परुषासि निष्ठुरासि प्रणमति प्रणते स्तब्धासि दंडवत्स्थितासि यद्रागिण्यनु
रागयुक्ते द्वेषंयासि विरक्तासि यदुन्मुखेत्वन्मुखावलोकने सु के विमुखत्वंयाता सि विमुखीभूतासि हे विपरीतकारिणि तत्तरा
तत्तेयद्विपरीतं ज्ञातं तद्युक्तमेव तत्किमित्याह चंदनलेपो विषमिवोद्वेजकः चंद्रः सूर्यवत्तापकः हिमंवह्निवद्दाहकरति जनि
तहर्षास्त्रीवेदना २ अथ श्रीकृष्णस्यराधिकाप्रतिवक्ष्यमाणचाटुक्तिस्मरणेन श्रीराधामहिमस्फूर्त्यातत्सौभाग्यद्योतनायश्री
कृष्णस्यैश्वर्यमाह सांद्रेति श्रीगोविंदस्यपदारविंदमशुभानां रसोश्वादप्रतिबंधकानांविनाशायवंदामहे कीदृशं वलेर्निय

हरिरुपयातु वदतु बहुमधुरं किमितिकरोषि हृदयमतिविधुरं ७ श्रीजयदेवभणितमतिललितं सुखय
तु रसिकजनं हरिचरितं ८ स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि द्वेषं यासि यदुन्मुखे विमु
खतां याता सि तस्मिन्प्रिये तद्युक्तं विपरीतकारिणि तव श्रीखंडचर्चा विषं शीतांशुस्तपनो हिमं हुतवहः क्री
डामुदो यातना २ सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संदर्शितेंदिंदिरं
स्वच्छंदं मकरंदसुंदरगलन्मंदाकिनीमेदुरं श्रीगोविंदपदारविंदमशुभस्कंदायवंदामहे ३ इति श्रीगीत
गोविंदे कलहांतरितावर्णने मंदमुकुंदो नाम नवमः सर्गः ९ अत्रांतरे मसृणरोषवशामसीमनिःश्वा
सनिःसहमुखीं सुमुखीमुपेत्य सव्रीडमीक्षितसखीवदनां प्रदोषे सानंदगद्गदपदं हरिरित्युवाच १

मनाक्तिविडआनंदोयेषांतेषांइंद्रादिदेवानांवृंदैरधिकादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संदर्शितइंदिंदिराभ्रमरायत्रतत् कुतः
यतः स्वच्छंदंपथास्यात्तथामकरंदवत्सुंदरंयथास्यात्तथागलंत्याकाशगंगयास्निग्धंबस्येकौशस्येहङ्मस्नि माते न श्रीकृष्णे
नयच्चरणशिरोधारणंप्रार्थ्यतेतत्सौभाग्यंकेनवर्णनीयमित्यर्थः ३ अतएवश्रीराधिकामानोपसमनचिंतयामंदःकुंठित
क्रियोमुकुंदोयत्रसइतिसर्गः इतिवालवोधन्यांनवमःसर्गः ९ ततःप्रातरारभ्योक्तप्रकारेण दिवसहन्ने वृत्तेसत्युपक्रां
तानिशादिवृत्तमाह अत्रेत्यादिना अस्मिन्नवसरे प्रदोषसमये किंचित्कोपोपशमे तव श्रीराधांसमीपमागत्यप्रियायाप्रसन्नता
दर्शनानंदेनगलदक्षरपदेनसहितंयथास्यात्तथाहरिरितिवक्ष्यमाणमुवाच कीदृशी मसृणतिः श्वासेनतिःसहं विरहदुःखासह
हिस्तुतयाकौतिरचनादिरहितं मुखंयस्यास्तां यतः शिथिलमानेन सत्यापत्तां अतएवकिमपुनरा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२५ अथ तदर्थस्य पूर्वकृतं विज्ञापयितुमाह परीति अन्यस्त्रीसंभोगवितर्कः शंकाकृत अतं कोपया हेतादृशे शंकापरिहरकर्थं त्वया निरंतरं मापिम
नसि अंतरमभ्यंतरं वितनोस्तनुरहित्यात्कामादन्यो धन्यस्तादृक्सौभाग्यवान् जनः कोपि न विशति मनोकारे रेतरभ्यंतरं प्रविश्यते मन
श्चेत् त्वया व्याप्तं केन यथापूर्वे घव्यमित्यर्थः अतएवान्यावकाशाभूत्ये इतएव काशावकाशो चेत्मनसि नास्तां तत्कार्यं साधारणादृष्टिः स्या
दित्यर्थः शंकां त्यक्त्वा ततः किं कर्तव्यं हे प्रणयिनि विपरीतं भस्यारंभे इति कर्तव्यं तां कुरु २ यदिमहद्वचनान्न प्रत्येषि तर्हि स्वयमेव दंडमन्य
रहस्याह मुग्धे इति स्त्रीये अन्यदंडमर्षणात् मुग्धे इति संबोधनं कोपाचेशान्नेन तु ध्यसेइति चंडीति च त्वमेव मयि निर्दयदंतदंश
दोर्वल्लिबंधनिविडस्तनपीडनानि विधेहि एतानि विधाय प्रदमाप्नुहीत्यर्थः किमेतावता सेत्स्यति तेपंचवाणा एव चंडालाः दुष्
चेष्टत्वात् तस्य वाणप्रहारात् प्राणमाप्रयांतु ३ ममकोपनास्त्येव वचेदत आह शशीति हे शशिमुखि तव भंगुरभ्रूभातिकोपि
परिहरकृतातंके शंकां त्वया सततं घनस्तनजघनयाक्रांते स्वांते परानवकाशिनि विशति वितनोरन्यो धन्यो न कोपि
भमांतरं प्रणयिनि विपरीतं भारंभे विधेहि विधेयतां २ मुग्धे विधेहि मयि निर्दयदंतदंशदोर्वल्लिबंधनिबिडस्तनपी
डनानि चंडित्वमेव मुदमंचय पंचवाणचंडालकांडदलनादसवः प्रयांतु ३ शशिमुखि तव भाति भंगुरभ्रूर्यु
वजनमोहनकरालकालसर्पी तदुदितभयभंजनाय यूनां त्वदधरसीधुसुधैव सिद्धमंत्रः ४ व्यथयति व
थामौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः सुमुखि विमुखीभावं तावद्विमुंचन मुं
चमां स्वयमतिशयस्निग्धो मुग्धे प्रियोयमुपस्थितः ५ मितिभावः सहजैव भ्रूभंगुरा न कोपात्
नी चेन्नासितत्कुतो भ्रूर्वो भंगुरत्व
पात् युवजनस्य मनमोहनाय भयंकरी कालसर्पी भ्रूत्युत्पादनं कोपादेवेत्यर्थः तर्हि तया दष्टस्य तवौषधाभावादनर्थापत्तिरेवस्यादत आ
शाकासात२ ह तस्या उदितस्य भयस्य नाशाय यूनामस्माकं दुरुवचनं तस्याः प्रसन्नतामालक्ष्यात्मनो बहुमननात् त्वदधरसीधुसुधैव सिद्धमंत्रः ना
न्यत्किंचित् अस्तीत्येवार्थः मादकत्वान्मधितिमधुरत्वात्सुधेत्युक्तं कालसर्पीदष्टस्याम्रतादेव जीवनं नान्यथेत्यनन्यगतिकत्वं चवो
धितं ४ एवमुक्तेप्यनुत्तरामाह व्यथेति हे तन्वि मदलाभात्त्वमपि कृशासीत्यर्थः यस्मात् तूष्णीं मौनं मां व्यथयति तस्मात्पंचमस्वरं प्रपंच
य विस्तारय मधुरं वदेत्यर्थः हे तरुणि मधुरालापैस्तापमपसारय किंच हे सुमुखि कृपावलोकैस्तावदेदास्यं त्यजमानमुंच सुमु
ख्या विमुखीभावेन युक्तइत्यर्थः कथमेवकरोमि तत्राह हे मुग्धे विचारानभिज्ञे प्रियोयमतिशयस्निग्धः कथस्निग्धतां ज्ञानं स्वयमनाहूत २५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वगुणपरिक्षणोपकरणत्वेन चेन्मामंगीकरोषि तथापि चरितार्थः स्यामित्याह हे तन्वि तव लोचनं नीलनलिनाभमपि संप्रति रक्तोत्पलरूपं धा
रयति तदेतेन त्वय्यनुरंजनी विद्यास्ति इत्यवधारितं एषा तु रंजनविद्या मयि त्वं यदीदं कुसुमकुलरूपं मां तेन लोचनेन कुसुमशरबाणभावेन सानुरागगृ
ध्या रंजयसि तदेतदेतस्य योग्यं भवति शिक्षिता विद्या प्रयोगेनैव ज्ञायते इत्यर्थः ४ अतस्त्वदंगीकारेणैव मम तापोपशमनमिति सर्वं विजयितद्गु
णस्फूर्तिपरवशः सन् प्रार्थयते हे प्रिये मम शिरसि पदपल्लवमर्पय कीदृशं उदारं वांछितप्रदं किमर्थं स्मरगरलं खंडयतीति तत् न केवल
मिदं मंडनं भूषणं च कथमेवं प्रार्थयसे कामशरदारुणोऽरुणाः सूर्य्यो मयि ज्वलति अतस्तेनोपाहितविकारं हरतु तद्धारणमात्रे
णतापो यास्यतीत्यर्थः ५ एतत् श्रवणेन किंचित् प्रसन्नां वीक्ष्याह ततश्च मणिमाला कुचकुंभयोरुपरि चंचला भवतु तेन किं स्यात् त

नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपं कुसुमशरबाणभावेन यदि रंजयसि कृष्णमिदं
मेतदनुरूपं ४ स्मरगरलखंडनं मम शिरसि मंडनं देहि पदपल्लवमुदारं ज्वलति मयि दारुणो मदनकदनारुणो
हरतु तदुपाहितविकारं ५ स्फुरतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु तव हृदयदेशं रसतु रसनापि तव घनज
घनमंडले घोषयतु मन्मथनिदेशं ६ स्थलकमलगंजनं मम हृदयरंजनं जनितरतिरंगपरभागं भण मसृणवा
णि करवाणि चरणद्वयं सरसलसदलक्तकरागं ७ इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधि वचनजा
तं जयति पद्मावतीरमणजयदेवकविभारतीभणितमतिशातं ८

व हृदयदेशं शोभयतु न केवलं कांच्यपि घनजघनमंडले रसतु शब्दायतां कीदृक् शब्दं कुरुतां मन्मथस्याज्ञां घोषयतु वचनभंग्या प्रार्थ
नाविशेषोयं ६ तथाप्यनुत्तरामेवाह हे स्निग्धवचने भण आज्ञापय किमाज्ञापयामि तव चरणद्वयं सरसेन लसतालक्तकेन रागो यत्र
तादृशं करवाणि यतः स्थलकमलं गंजयति इति गंजनं तत्तिरस्कारकमित्यर्थः अतएव मम हृदयानुरंजकं यतश्च जनितो रतिरंगे पर
भागः परमा शोभा येन तत् ७ इत्युक्तप्रकारं मुरवैरिणो राधिकां लक्षीकृत्य वचनसमूहो जयति सर्वोत्कर्षेण वर्त्तते परमप्रेय
सीविषयत्वात् कीदृशं चटुलं चंचलं अनेकप्रकारमिति यावत् चटुलचाटुनापनयनसमर्थं चारु शोभनं पुनः कीदृशं अतिशा
तं परमसुखदमित्यर्थः पुनः कीदृशं पद्मा श्रीराधा अवतीपालिका उपास्याः सा पद्मावती राधैकपरतया तथा नाम्नी जयदेवस्य प
त्नी तद्गुणवर्णनादिना तस्या रमणस्य जयदेवकवेर्भारत्या भणितं ८ ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

२६ एवं प्रियां प्रसाद्य मेघैर्मेदुरमित्युपक्रांतवचनात् सखीसम्मतिं चालक्ष्य कुंजशय्यायां श्रीकृष्णे गते सति सखी श्रीराधामाहेत्याह सुचिरेत्या
दि दृष्टिं मुष्णातीति तमसा हरणेनेति दृष्टिमुष् तस्मिन्प्रदोषे स्फुरति केशवे च कुंजशय्यां गतवति सति कापि मेघैर्मेदुरमित्यादिविविक्तवचनाश्री
राधां जगाद किं कृत्वा बहुकालं व्याप्यानुनयेन मृगाक्षीं प्रीणयित्वा कीदृशीं विरचिता ता मस्य अभिसारवेशभुक्ता यं प्रियरुचिकरी भूषा यस्या
स्तां पुनः कीदृशीं अवसादात् प्रियाप्राप्तिजन्य दुःखान्निर्गतां कीदृशे कृतप्रियामनोहरो वेशो येन तस्मिन् १ यज्जगाद तदाह विरचितेत्यादि
ना अस्यापि वसंतरागयतितालौ हे मुग्धे अनुगतं मधुमथनमनुगच्छ अनुगतानुगमन पौ थिल्यात्तु मुग्धे इति संबोधनं ध्रु कुतोऽनुगतत्वाव
गतिः विरचिता नानाभंग्या प्रतिपादिता चाटुवचनानां रचना येन तं चाटुवचनमात्रेण कथं ज्ञेयानुमतिः चरणे रचिता प्रणिपातः प्रण
तिर्येन तं अनुगतेन प्रणतः स्यादित्यर्थः तत्समीपस्थितायामपि कथमेवं प्रार्थ्यते संप्रति तव प्रसाद मालक्ष्य मनोहरे वंजुलकुंजस्यसी

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेशे केशवे कुंजशय्यां रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति
निरवशादां कापि राधां जगाद १ वसंतरागयतितालाभ्यां विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं संप्रति
मंजुलवंजुलसीमनि केलिशयनमनुयातं १ मुग्धे मधुमथनमनुगतमनुसर राधिके ध्रु घनजघनस्तनभार
भरे दरमंथरचरणविहारं मुखरितमणिमंजीरमुपैहि विधेहि मरालनिकारं २ शृणु रमणीयतरं तरुणीजनमो
हनमधुरिपुरावं कुसुमशरासनशासनवंदिनि पिकनिकरे भज भावं ३ अनिलतरलकिशलयनिकरेण करे
णलतानिकुरंबं प्रेरणमिव करभोरु करोति गतिं प्रति मुंच विलंबं ४

मनिमध्यभागे यत्केलिशयनं तत्र गतं त्वदागमनप्रतीक्षया स्थितं १ एतन्निश्चयमौनेन सम्मतिं मूकमाना शीघ्रगमनप्रकारमाह
जघने च स्तनौ च जघनस्तनं घनं संहतं यज्जघनस्तनं तस्य भारस्य भरोऽतिशयो यस्यां हे तादृशि तत एव दरमंथरचरणविहारं यथा स्या
त्तथा प्रियसमीपं गच्छ तथा मुखरितो मणिमंजीरो यत्र तच्च यथा स्यात्तथा तेन च हंसपरिभवं कुरु नूपुरध्वनेर्हंसरवपरिभावित्वा
दित्यर्थः २ तत्र गत्वा किं करोमि मधुरिपोरावं शृणु कीदृशं अतिरमणीयं अत एव तरुणीजनानां मोहजनकं ततः कोकि
मरालो हंसस्य क्षितिर्निका रः स्यात्पराभ वे इति विश्वः ल समूहे कृतं हे वंत्य त्वा भावं प्रीतिं कुर्वित्यर्थः कीदृशे कुसुमशरासनस्य प्रशमनवंदिनि हे ययं वत्यः कांतसन्नाहमंतरेणाम
हाराणां द्वयोरक्षितानास्यत्तो मानं त्यज इति कामाज्ञातस्यास्तावके ३ मद्वचनमनुमोदमाना लतातति रपि त्वां प्रेरयतीत्या
ह हे करभोरु लतासमूहोऽप्यनिलतरलकिशलयनिकरेण तव प्रेरणं करोति तस्मात् गतिं प्रति विलंबं मुंच अचेतना २६
नुकूल्यो नापि तच्चेतो न द्रवतीत्यभिप्रायः वस्तुतस्तु उद्दीपनमेवेतत् सर्वं ४

CC0. In Public Domain, Digitizagtion by eGangotri

यतः पंचपुष्पांचितास्यं ते निसेव्यानंगः पुष्पायुधविलासेन मां दुनोतीत्यतस्त्वं प्रसीदेति भंग्यांतरेणानिस्तौति वंधूकेति हे चंडि हे प्रिये सप्रसि
ऽः पुष्पायुधः प्रायस्त्वन्मुखसेवया विश्वं विजयते इति तर्कयामि कानि पुष्पाणि तत्राय मधरः वंधूकपुष्पस्य द्युतेर्बांधवः लोहित्यात्तत्साम्यं
गंडे मधुकस्पर्द्धि विश्वकांतिः पांडुत्वादत्र साम्यं नीलनलिनश्री मोचने लोचने कांत्यादत्र साम्यं नासा तिलप्रसूनपदवीमभ्येति अत्राकृत्या
साम्यं हे कुंदाभदंति अत्र शौक्ल्यात् साम्यं त्वन्मुखसेवयैतानि पुष्पाणि लब्धानि रेवापुधे विश्वं जयतीत्यर्थः ६ किंच हे तन्वि क्षीणायितं प्र
थिव्यामागतापि देवयुवतिसमूहं विहसतीत्यहो आश्चर्यं तत्प्रकारमाह तव दृशौ मदेन हर्षेण अलसे स्वर्गे त्वेकेव महालसा मरांगना त्वं मद
लसे द्वे दृशौ धारयसीत्याश्चर्यमित्यर्थः एवमग्रेपि तत्वेति सवत्रान्वेति तथा वदनमिंदुं संदीपयतीति वत् तत्रेंदुसंदीपनी नाम्नी किंच ग

वंधूकद्युतिबांधवोयमधरः स्निग्धो मधूकच्छविर्गंडे चंडि चकास्ति नीलनलिनश्रीमोचने लोचने नासाभ्येति तिल
प्रसूनपदवीं कुंदाभदंति प्रिये प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ६ दृशौ तव मदालसे वदनमिंदु
संदीपनं गतिर्जनमनोरमा विजितरंभमूरुद्वयं रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवावहो विबुधयौवतं व
हसि तन्वि पृथ्वीगता ७ प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धं रणे राधापीनपयोधरस्मरणकृत्कुंभेन
संभेदवान् यत्र स्विद्यति मीलति क्षणमथ क्षिप्ते द्विपे तत्क्षणात् कंसस्यालमभूज्जितं जितमिति व्यामोहको
लाहलः ८ इति श्रीगीतगोविंदे मुग्धमाधवो नाम दशमः सर्गः ●

तिजनस्य मम मनोरमा तत्र मनोरमा नाम्नी अपरं च ऊरुद्वयं तिरस्कृता कदली येन तत् तत्र रंभा नाम्नी रतिः कौशलवती तत्र कलावती
नाम्नी भ्रुवौ रुचिरचित्रलेखे इव तत्रैका चित्रलेखा इति ७ एवं स्वप्रियागुणकीर्तनावेशान्माहासंकटस्थानानुभूततत्स्पर्शसुख
स्मरणपरवशं श्रीकृष्णं वर्णयन्नाशास्ते प्रीतिमिति हरिर्वो युष्माकं प्रीतिं तनुतां कीदृशः रणे कुवलयापीडेन संभेदवान् कीदृ संसक्तवान्२
शेन श्रीराधायाः पीनपयोधरयोः स्मरणकृतौ सादृश्येन संस्कारोद्बोधकतया स्मारकौ कुंभौ यस्य तेन यत्र संभेदे तत्स्पर्शसुखेन सात्वि
कोदयात् श्रीकृष्णे क्षणं स्विद्यति मीलति च सति कंसस्यास्माभिर्जितं जितमिति व्यामोहकोलाहलोऽभूत् तेनावहितेन श्रीकृष्णेन क्षिप्त
द्विपे शीतितत् क्षणादनेन जितं जितमिति व्यामोहकोलाहलोऽभूत् पूर्वत्र व्यामोह आनंदेनोत्तरत्र शोकेनेति ज्ञेयं ८ अत एव सर्गोयं
श्रीराधास्मरणविकारवशेन मुग्धो मनोहरो माधवो यत्र सः इति बालबोधन्यां दशमः सर्गः १०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२७ अथांधकारोप्यलंकाररचनाव्याजमसहमानस्तो अलंकाररचनां स्वयं संपाद्यं स्त्वां त्वरयतीत्याह अक्ष्णोरिति हे सखि सर्वतो व्याप्य ध्वांतं सुदृशां प्रत्यंगमालिंगति प्रियाभिसारानुकूल्येन सुखं ददातीत्यर्थः कीदृशं नीलनिचोलादपि चारु सर्वांगावरकत्वेनात्रालिंगनमुत्प्रेक्षितं कीदृशानां धूर्तानां परवंचकानां मतएवाभिसारे सत्वरं हृद्यासां तासां परवंचकतया कांचित् कदाचित् सत्वरमभिसरेदित्यतो विलंबो न कार्य इत्यर्थः किं कुर्वन् अक्ष्णो रंजनं श्रवणयोस्तमालस्तवकं अंबरीषी मूर्ध्नि श्यामसरोजानां दाम कुचयोः कस्तूरिकापत्रकं यत्र भंगं लेखां च निक्षिपत् दर्शयत् ३ किंच प्रेमपरीक्षणकारणमप्येतदेवेत्याह काश्मीरेति एतत्तमिस्रमभिसारिकाणां रुचिमंजरीभिरावद्धरेखं सततप्रेमहेम्नो निकषपाषाणतां तनोति कीदृशानां काश्मीरवद्गौरं वपुर्यासां यथा निकषपाषाणे सुवर्णसिद्धिर्निर्णीता सा तथा

अक्ष्णोर्निक्षिपदंजनं श्रवणयोस्तापिंछगुच्छावलीं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकं धूर्तानामभिसार ४
सत्वरहृदां विष्वङ्निकुंजे सखि ध्वांतं नीलनिचोलचारु सुदृशां प्रत्यंगमालिंगति ३ काश्मीरगौरवपुषामभिसारि
काणामावद्धरेखमभितो रुचिमंजरीभिः एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ४ हा
रावलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य द्वारे निकुंजनिलयस्य हरिं विलोक्य व्रीडा
वतीमथ सखीमियमित्युवाच ५ वराडीरागेरूपकतालाभ्यां मंजुतरकुंजतलकेलिसदने प्रविश राधे माधवसमी
पमिह विलसरतिरभसहसितवदने १ नवभवदशोकदलशयनसारे प्रविश राधे माधवसमीपमिह विलसकुच
कलशतरलहारे २

सां प्रेम्णोपि घनांधकारैः साध्वसतया गमने जिज्ञासेति भावः कीदृशं तमालदलवन्नीलतमं एते
५ नांधकारस्यैवविडंबप्रतिपादितं तमालवनविहरणं च ४ दूरानीतनिकटं गतात्तुत्सुकं श्रीकृष्णं वीक्ष्य गंतुमशक्तामपि लज्जया तत्या
र्थमभंजमानां सखीप्राह इत्याह हारेति निकुंजस्य द्वारे हरिं विलोक्य अथ मे धैर्यं दुर्विरचितेत्यादिवचनैर्निकुंजनिकटगमनानंतरमि
यं सखी लज्जावती सखीमिति वक्ष्यमाणमुवाच कीदृशस्य हारावलेर्मध्यगानां मणीनां कांचनकांचीदाम्नो मंजीरयोः कंकणयोश्च मणी
५६ नां द्युतिभिर्दीपितस्य ५ किमुवाच सखीत्याह मंजुतरेत्यादिना अस्यापि वराडीरागरूपकतालौ हे राधे माधवसमीपं प्रविश प्रविश्य च
इह मंजुतरकुंजतलमेव केलिसदनं विलसरतिरसेन हसितवदनं यस्याः हे तादृशि तवोच्छलितमनोत्युत्सुकतया हास्यमिवेण प्रियमि
लनायुवहिर्निर्गतमिति भावः १ ननु मन उच्छलितं अस्यतवनागरस्यैवकुल्यमाकलय्य मद्वदनं हसतीत्याह सर्वत्र पूर्वव
न्मुखवधयोजना प्रतिपदं शोभाढ्यं केलिसदनं कीदृशे नवभवदशोकदलैः तत्पल्लवैः रचितं शयनं श्रेष्ठं यत्र तस्मिन् कुचक २९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंभावमुद्दीप्यमद्धिकारान् दर्शयति यदिमद्वचनमनात्मीयमिति मन्यसे हेसखीतदात्मीयममुकुचकुंभं पश्य कीदृशं अनंगतरंगवशात्कंपितमिव पुनः
कीदृशं मनोहरहार एव विमलजलधारा यत्र तं कुचोऽयं कलसत्वेन रूपितः कंपितश्चानंगतरंगवशात् तस्माद्धारोपि जलधारत्वेन रूपितः वामस्तनकंपनेना
र्थाप्रियसंगमं सूचयति इति प्रसिद्धं वयमपि जिज्ञास्य इत्यर्थः ५ संप्रति माधवानुसरणे कांच्यादिभूषणमेव त्वद्वाम्यव्यनक्तीत्याह तवेदं वपुरपि
तिरणायसज्जमित्यखिलसखीभिरपि ज्ञातं कथमन्यथा कांच्यां प्रिग्रहणमिति भावः नकेवलं मन एव वपुरपीत्यपेरर्थः ततो हे चंडि रणप्रवेशो अल
ज्जो लज्जारहितं सरसंसोत्साहं रसितारसना सैव वदरडिंडिमो वाद्यभांडविशेषो यत्र तच्च यथास्यात्तथाभिसर प्रियाभिमुखमनंगरणाय हि रणसज्जि
तस्य विलंबो भयाशंकामासंजनयतीत्यर्थः ६ तत्रगमनप्रकारमाह हेसखि करेण सखीमवलंब्य सलीलेयथास्यात्तथा चल कीदृशेन स्मरशरस

स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभं पश्य मनोहरहारविमलजलधारममुं कुचकुंभं ५ अधिगतमखिलस
खीभिरिदं तव वपुरपि रतिरणसज्जं चंडि रसितरसनारवडिंडिममभिसर सरसमलज्जं ६ स्मरशरसुभगनखेन सखी
मवलंब्य करेण सलीलं चलवलयक्वणितैरवबोधय हरिमपि निजगतिशीलं ७ श्रीजयदेवभणितमधरीकृत
हारमुदासितवामं हरिविनिहितमनसामधितिष्ठतु कंठतटीमविरामं ८ सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यं
गमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति संचिंतयन् स त्वां पश्यति वेपते पुलकयत्यानंदति स्विद्य
ति प्रत्युद्गच्छति मूर्छति स्थिरतमःपुंजे निकुंजे प्रियः २

भगनखेन संग्रामार्थं पंचनखायु वमोहनादिकामास्त्राणि तानि गृहीत्वा गच्छेत्य
र्थः गत्वा किं विधेयं चलवलयक्वणितैः हरिमपि बोधय रणाय सावधानं कुरु कीदृशं निजगतौ त्वत्प्राप्तौ शीलं समधिर्यस्य तं शीलसमा
धौ समीचिनो योद्धा हि प्रतिभटमवहितं कृत्वैव बुध्यत इत्यर्थः श्रीजयदेवभणितं हरिविनिहितमनसो जनानां कंठतटीमविरामं यथास्यात्तथा गी०५
तिष्ठतु हारादेवभावे भवेद्यथैवं ततः सद्भावे कथमस्या विरामता सिद्धिस्तत्राह अधरीकृतो हारो येन ततः इदमेव परमभूषणमित्यर्थः भूषणेन सेपिवा
माशक्या विच्छित्तिः स्यात् दूरीकृता वामा प्रकृष्टारमणी येन तत् हृद्रोगमाध्यापहिनोत्यचिरेणाधीर इत्युक्तेः ८ अथ त्वरयितुं श्रीकृष्णस्योत्
कंठामाह सामामिति सा प्रिया समागत्य मां द्रक्ष्यति दृष्ट्वा च स्मरकथां वक्ष्यति प्रेमालापं कृत्वा च प्रत्यंगमालिंगनैः प्रीतिं प्राप्स्यति प्रीतियुक्ता
सती मया सह रंस्यते हे सखीति संचिंतयन् स्थिरतमःपुंजे तमालवनांधकारनिबिडे तरुच्छायांधकारस्यैव स्थिरत्वात् निकुंजे स प्रियः श्रीकृष्णः २
पुरः स्फुरतीं त्वां पश्यति दृष्ट्वा च वेपते पुलकयति आनंदयति स्विद्यति स्फूर्त्यपगमे पुनः सैषा प्रियागतेति प्रत्युद्गच्छति ततश्चानंदावेशेन मूर्छति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२८ इतिसखिवचनोच्छलितचित्ताकुंजंप्रविवेशेत्याह सेति सा सिंजानमंजुमंजीरं ससाध्वससानंदं च यथास्यात्तथा कुंजगृहं प्रविवेश प्रथम
समागतसाध्वसं विच्छित्त्यनंतरं प्राप्त्या सानंदमिति ज्ञेयं अत एव गोविंदे चचले सतृष्णे लोचने यस्याः सा ६ एवं कुंजप्रवेशमुक्त्वा श्रीकृष्ण
स्य तद्दर्शनानंदविकारान् वर्णयन् तस्यास्तद्दर्शनमाह राधेत्यादिना अस्यापि वराडीरागरूपकतालौ सा श्रीराधा हरिं ददर्श ।
कीदृशं एकस्मिन्नालंबने श्रीराधारूपे रसो यस्य तं तस्यां सर्वोत्तमत्व निश्चयेन तदेकपरमित्यर्थः ननु अन्यांगनाभी रममाणस्य कृत
स्तत्परत्वं चिरं पूर्वोक्तप्रकारेणाभिलषितस्तया सह विलासो येन तं अत एव तत्प्रसादावलोकनात् गुरुहर्षस्याधमानं यस्य तं
अत एवानंगस्य विकारो यस्य तं ध्रु तदेकनिष्ठत्वमेव दृष्टांतेन स्पष्टयति पुनः कीदृशं राधावदनविलोकनेनैव रससमुद्रस्य तस्य विकासि
ता हर्षसंभावस्य एव उर्मयो यस्य तं कमिव जलनिधिमिव कीदृशं जलनिधिं विधुमंडलदर्शनेन चंचलीकृतास्तुंगास्तरंगा यस्य तं अत्र श्रीकृ

सा ससाध्वससानंदं गोविंदे लोललोचना सिंजानमंजुमंजीरं प्रविवेश निवेशनं ६ वराडीरागेण रूपकतालेन च राधाव
दनविलोकनविकसितविविधविकारविभंगं जलनिधिमिव विधुमंडलदर्शनतरलिततुंगतरंगं १ हरिमेकरसं चि
रमभिलषितविलासं सा ददर्श गुरुहर्षवशंवदवदनमनंगविकासं ध्रु हारममलतरतारमुरसि दधतं परिलंब्य वि
दूरं स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं २ श्यामलमृदुलकलेवरमंडलमधिगतगौरदुकूलं नी
लनलिनमिव पीतपरागपटलभरवलयितमूलं ३ तरलदृगंचलचलनमनोहरवदनजनितरतिरागं स्फुटकमलो
दरखेलितखंजनयुगमिव शरदि तडागं ४ वदनकमलपरिशीलनमिलितमिहिरसमकुंडलशोभं स्मितरु
चिकुसुमसमुल्लसिताधरपल्लवकृतरतिलोभं ५

ससमुद्रयोर्विकारोर्म्योः साम्यः १ विकारा ... नेवाह पुनः कीदृशं उरसि विदुरं य
रिलब्य हारं दधानं कीदृशं निर्मलमुक्ताग्रथितं कमिव यमुनाजलपूरमिव कीदृशं पूरं स्फुटफेनखचितं अत्र श्रीकृष्णस्य यमुनाजल
पूरेण हारस्य फेनसमूहेन साम्यं मुक्ताश्च सुद्धौ तारः स्यादिति विश्वः २ पुनः कीदृशं श्यामलं मृदुलं च कलेवरमंडलं यस्य तं यथोचिताव
यवसन्निवेशप्रतिपादनार्थं मंडलत्वेनोक्तिः यथा प्राप्तं पीतदुकूलं येन तं कमिव नीलनलिनमिव कीदृशं पीतपरागाणां समूहातिश
येन वेष्टितं मूलं यस्य तत् अत्र नीलकमलेन श्रीकृष्णस्य परागेण पीतवस्त्रस्य साम्यं पराकृतमूलवर्णनेनाद्भुतोपमेयं ३ पुनः कीदृशं चं
चलस्य दृगंचलस्य वलनेन मनोहरं यद्वदनं तेन जनितस्तस्या रतिरागो येन तं किमिव शरदि तडागमिव कीदृशं विकसितं यत् पद्मं तस्योदरे क्री
डापरं खंजनयुग्मं यत्र तत् अत्र श्रीकृष्णस्य तडागेन वदनस्य कमलेन नयनयोः खंजनयुगेन साम्यं कैश्च खंजनदर्शनेन स्वाभिलाषसिद्धिसंभा
वोल्लसितमिति ध्वनितं ४ पुनः कीदृशं वदनमेव कमलं तस्य प्रकाशनाय मिलिताभ्यां सूर्यसदृशाभ्यां कुंडलाभ्यां शोभा यस्य तं तथा स्मितरुचि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऽस्याभिप्रायविशेषावकलनात् कंपोयमित्याह पुनः कीदृशी कुसुमचयेनरचितंशुचेःशृंगारस्यवासगेहंयत्रतस्मिन्निकुंजाभ्यंतःपुष्पग
हरचनाविशेषइति नयोनरुक्तैःकुसुमैरभ्योपिसुकुमारोदेहयस्माहेतो दृशिनिकुंजद्वारगतःप्रियस्त्वांप्रतीक्ष्यते कुंजरचने दृशी त्वंकुसुम
सुकुमारतनुरतोवाम्यमयुक्तमितिभावः ३ अथोद्दीपनायातिशयेनकेलिसद्मेवर्णयति चलेनमलयवनस्यपवनेनसुरभिशीतंच
यत्तस्मिन्रतोवलितंरतियोग्यंगीतंवलितंयस्माहेतो दृशि अतोऽस्मिन्प्रविश्यतदाचरेत्यर्थः ४ पुनःकीदृशे विततानांबहुवल्लीनां
नवपल्लवैर्घनेनिविडे अलसंपीनंचजघनंयस्माहेतो दृशि चिरमिति विलसक्रियाविशेषणं इदृग्जघनंचसफलंकुर्वित्यर्थः ५ पुनःकी
दृशे मधुनामुदितेन मधुपकुलेनविहितःशब्दोयत्रतस्मिन् मदनरसेनशृंगाररसेनसरसभावःसारस्ययस्माहेतो दृशि ईदृग्भावायास्त
वात्निकटप्रवेशएवयोग्यइतिभावः ६ पुनःकीदृशे मधुरतरैःपिकनिकरनिनदैर्मुखरे दशनाएवरुच्यारुचिरमाणिक्यविशेषाःसंति

कुसुमचयरचितशुचिवासगेहे प्रविशराधेमाधवसमीपमिह विलसकुसुमसुकुमारदेहे ३ चलमलयवनपवनसुर
भिशीते प्रविशराधेमाधवसमीपमिह विलसरसवलितललितगीते ४ विततबहुवल्लिनवपल्लवघने प्रविशराधेमाध
वसमीपमिह विलसचिरमलसपीनजघने ५ मधुमुदितमधुपकुलकलितरावे प्रविशराधेमाधवसमीपमिह विलसमद
नरससरसभावे ६ मधुरतरपिकनिकरनिनदमुखरे प्रविशराधेमाधवसमीपमिह विलसदशनरुचिरुचिरशिखरे ७
विहितपद्मावतीसुखसमाजे कुरुमुरारेमंगलशतानिभणतिजयदेवकविराजराजे ८ त्वांचित्तेनचिरंवहन्नयमतिश्रां
तोभृशंतापितःकंदर्पेणचपातुमिच्छतिसुधासंबाधबिंबाधरं अस्यांकतदलंकुरुक्षणमिहभ्रूक्षेपलक्ष्मीलवक्रीतेद

यस्माहेतो दृशि ईदृक्दशनायास्तत सइवोपसेवितपदांभोजेकुतःसंभ्रमः ५ क्रियाविशेषणंकृत्यमेवयोग्यमितिभावः पक्वदाडिमबी
जाभमाणिक्यशिखरंविदुः ७ हेमुरारेजयदेवकविराजराजे भणतिसति त्वप्रियाप्रार्थनमितिशेषः मंगलशतानिकुरु कथंविहितःपद्मा
वत्याःश्रीराधायाःसुखसमूहोयेनतस्मिन् निजेष्टदेवोपासनायानित्यत्वसर्वोत्तमत्वनिश्चयावेशेनात्मानंबहुमानस्यकविराजराजइति मन्म
प्रौढोक्तिरियं ८ अथसखीप्रसादमालक्ष्यकौतुकेनसनर्मोह त्वामिति अयंत्वांचित्तेनवहन्नतिश्रांतः पीनस्तनश्रोणिगुरुतयेत्यर्थः कं
दर्पेणचभृशंतापितःअतःश्रमेणतापेनचपिपासितःसुधयासंबाधंसंकटंव्याप्तमितियावत्विबाधरंपातुमिच्छतितस्मात् अस्यां
केक्षणशोभयअतःस्थितस्यान्यथानुपपत्तेरितिभावः अविदिताभिप्रायस्याकप्रवेशेमन्मनःसंकुचत्यतआह इहकक्षेकु
तःसंकोचः कीदृशे भ्रुवोःक्षेपप्रक्षालनेसएवलक्ष्मीऋद्धिस्तस्यालेसेनक्रीतेकस्मिन्निव अल्पमूल्यक्रीतेदासइव क्रयक्रीतेसंकोच
नयुक्तइतिभावः क्रीतत्वेहेतुः सेवितपादांभोजेयेनतस्मिन् क्रीतस्यैवसेवोपयोगादित्यर्थः ५
॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२९ अथ तथाभिलाषविशेषेण लोच्यमानं श्रीकृष्णस्य भुजदंडं स्मरन् तत्सौंदर्यं वर्णयति कविर्जयेति मुरजितो भुजदंडो जयति कीदृशः मु
जापीडस्य क्रीडया हतकुवलयापीडकरिणः प्रकीर्णबिंदिपालग्नादिति यावत् अस्रग्बिंदवो यत्र सः तत्रोत्प्रेक्ष्यते जयश्रिया पिनेर्मंदार
कुसुमैरर्चित इव जयश्रीपूजितत्वे न हेतुना त्रोक्ष्यं तरमाह द्विपेन सह संग्रामे हर्षेण स्वयं सिंदूरेण तज्जयख्यापनाय मुद्रित इव रणाभिमुखं
चेत् मल्लोभियातितदारुणरागेणांगमुद्रयतीति प्रसिद्धेः ८ अत एव विप्रलंभानंतरं प्राप्तानंदेन संहितो गोविंदो यत्र स इति सर्गोयं इति बाल
बोधन्यां एकादशः सर्गः ११ अथ तां प्रेमोल्लासाविष्टामालक्ष्यात्मानं कृतार्थं मन्यमानः श्रीकृष्णोऽतिदैन्यमाविष्कुर्वन् प्रियामुवा
चेत्याह गतवतीति सखीवृंदे गतवति सति हरिः प्रियामुवाच किं कृत्वा सरसमनसं तां दृष्ट्वा हृष्ट्वा यतां मंदोयस्त्रपाभरस्ते न निर्भरोयः स्मरस्त
द्वशीय आकूतोऽभिप्रायस्तेन स्फीतं यत् स्मितं तेन स्नपितो अधरो यस्यास्तां अत एव नवपल्लवरचितविस्तीर्णशय्यायां वारंवारमर्पिता

जयश्रीविन्यस्तैर्महित इव मंदारकुसुमैः स्वयं सिंदूरेण द्विपरणमुदा मुद्रित इव भुजापीडक्रीडाहतकुवलयापी
डकरिणः प्रकीर्णासृग्बिंदुर्जयति भुजदंडो मुरजितः ८ इति श्रीगीतगोविंदे सानंदगोविंदो नाम एकादशः सर्गः
११ ॥ गतवति सखीवृंदेमंदत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरां सरसमनसं दृष्ट्वा हृ
ष्टां मुहुर्नवपल्लवप्रसरशयने निक्षिप्ताक्षीमुवाच हरिः प्रियां १ विभासरागेकताली तालो किशलय
शयनतले कुरु कामिनि चरणकमलविनिवेशं तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशं १ क्षण ८
मधुना नारायणमनुगतमनुभज राधिके ध्रु
दृष्टिर्यातां १ अस्य विभासरागेकतालीता लो रागलक्षणं स्वछंदसन्मानित
पुष्पचापः प्रियाधरास्वादसुधाभितृप्तः पर्यंकमध्यास्य कृतोपवेशो भासो विभूर्वः किल हेमगौरः इति किमुवाचेत्यत्राह कि
शलयेत्यादिना हे राधे नारायणं नराणां दक्षिणा [illegible] कानाम यत्न मास्थाय यस्तं महानायकं मां अत एव नारीणां समूहो नारं तस्या
श्रयो यस्तं नारीसमूहाश्रयमपि त्वामनुगतं त्वदेकपरं मधुनाधुना अस्मिन्नपि क्षणे भज बहुवल्लभोप्यत्वत्समागमाय नारीणां त्वत्स
खीनां समूहमाश्रये इत्येतदर्थत्रयं तन्नेणोपात्तं भवतीति ध्रु अनुभजनमेवाह हे विविधाभिलाषशालिनि किशलयशयनस्यो
परि चरणकमलयोर्विन्यासं कुरु पूजायाः प्रथमं गमासनमंगीकुर्वित्यर्थः तेन किं स्यात् मत्पूजाकाम इदं किशलयशयनं प
राजयमनुभवतु कुतोऽस्य पराजयः साध्यस्तत्राह तव पादपल्लववैरि अरुणत्वाद्विभिर्गुणैः साम्यकांक्षया वैरित्वं कीदृशं शयनं २९
स्वस्थलीतिकामिनिशब्दप्रयुक्तः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशं शशिकिरणैर्व्याप्तमुदरं यस्य जलधरस्य तस्येव सुंदराः सुकुसुमाः केशा यस्य तं अत्र केशानां मेघेन पुष्पाणां मिंदुकिरणेन साम्यं तथा तिमिरे उदितं यद्विधुमंडलं तद्वत् निर्मलश्चंदनतिलकनिवेशो यस्य तं अत्र ललाटस्य तिमिरेण तिलकस्येंदुमंडलेन साम्यं इयमप्यद्भुतोपमा ६ पुनः कीदृशं विपुलानां पुलकानामतिशयेन विषमीकृतं क्वचिदुन्नतं क्वचिन्नतमिति यावत् अत एव तद्दर्शनात् हृदयंगततरतिकेलिकलाभिरधीरं तथा मणिगणकिरणानां [illegible] समुज्ज्वलभूषितयोः सुंदरशरीरं यस्य तं ७ भोः साधवो हृदि हरिं विनिधाय सुचिरं यथा स्यात्तथा प्रणमत कीदृशं पुण्यविशेषस्य उदयः फलं तस्य सारभूतं तथा श्रीजयदेवभणितमेव विभवस्तेन द्विगुणीकृतो भूषणभारो येन तं यैः स्वयमलंकृतस्तेलंकरा जयदेवस्योपमादिवत् ललितविलासैर्द्विगुणीकृता इत्यर्थः ८ एवं श्रीकृष्णस्य श्रीराधिकाद

शशिकिरणच्छुरितोदरजलधरसुंदरसकुसुमकेशं तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं ६ वि
पुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं ७ श्री
जयदेवभणितविभवद्विगुणीकृतभूषणभारं प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं ८ अतिक्र
म्यापांगं श्रवणपथपर्यंतगमनप्रयासेनैवाक्ष्णोस्तरलतरतारं पतितयोः तदानीं राधायाः प्रियतमसमालो
कसमये पपात स्वेदांभःप्रसर इव हर्षाश्रुनिकरः ७ भजंत्यास्तल्पांतं कृतकपटकंडूतिपिहितस्मितं याते गे
हाद्बहिरवहितालीपरिजने प्रियास्यं पश्यंत्याः स्मरशरसमाकूतसुभगं सलज्जापि व्यगमदतिदूरं मृगदृशः ८

दर्शनानंदविकारमुक्ता श्रीराधायास्तद्दर्शनानंदविकारमा अतिक्रम्येति तदानीं श्रीकृष्णावलोकसमये श्रीराधाया अक्ष्णोर्हर्षाश्रुनिकरः पपात तत्रोत्प्रेक्ष्यते स्वेदांभःप्रसर इव यतोऽतिचंचलातारा नेत्रकनीनिका यत्र तत् यथा स्यात्तथा पतितयोः यः कश्चित् पतितो पि स्विन्नः सरलतरतारं कृत्वा लज्जादिशो वलोकत इत्यभिप्रायः अत्राप्युत्प्रेक्षा नेत्रांतमतिक्रम्य श्रवणपथपर्यंतगमनप्रयासेनेव योऽत्यंतं गच्छति सोपि तत्स्वेदत्यर्थः ७ ततः शय्यांतिकं गतायास्तस्याः प्रियदर्शनावेशेन लज्जा विगतेत्याह भजंत्या इति तत्सुखानुकूल्ये सावधानोय आलीपरिजनस्तस्मिन् कृतया कपटकर्णादिकंडूत्या छादितस्मितं यथा स्यात्तथा गेहाद्बहिर्याते सति मृगदृशः श्रीराधिकाया लज्जा सत्यपि दूरं विशेषेण गमत् कीदृश्याः शय्यानिकटं गतायाः ततश्च स्मरशरेण समाकूतयद्वास्य कटाक्षादिकं तेन सुंदरं यथा स्यात्तथा प्रियास्यं पश्यंत्याः प्रियास विशेषणं वा ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० इदं श्रीजयदेवभणितं कर्त्तृ रसिकजनेषु भक्तिरसविशेषवत्तेषु श्रीकृष्णभक्तिरसविशेषु श्रीकृष्णस्य मनोरमरतिरसे यो भावस्तदास्वादरू
३० पस्तेन यो विनोदः सुखं तं जनयतु यतः प्रतिपदं निगदितो मधुरिपोर्मोदोपत्ततत् ८ एवं कौतुकपकरणसमाप्य गीर्भिरूप्योपक्रमोक्तर
हःकेल्यारंभमाह प्रत्यूह इत्यादिना यस्मिन् सुरतारंभे प्रत्यूहो विघ्नोपि अहोमिहमिकापरीतचेतसोस्तयोः प्रियंभावुकः प्रीतिजनकोऽभू
त् सविविधसंभ्रमावस्थापादकसुरतारंभः उद्भूतो बभूव अन्यत्रारंभमध्ये वा प्रत्यूहो दोषजनको दृष्टः इह तु तादृशमध्येपि प्रत्यूह उत्तरो
त्तरः क्रीडारंभकः एवेत्यारंभस्याद्भुतत्वं सूचितं कुत्र केन प्रत्यूह इत्याह निविडाश्लेषे कर्त्तव्ये पुलकांकुरेण क्रीडाकूतविलोकने नि
मिषेण अधरसुधापाने कथाभिर्नर्मभिः अतिमिन्ननिर्वचनीये मन्मथकलायुद्धे आनंदावेशावैयग्र्येण इति अनेन एतत्केली

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदं ८
प्रत्यूहः पुलकांकुरेण निविडाश्लेषे निमेषेण च क्रीडाकूतविलोकनेऽधरसुधापाने कथानर्मभिः आनंदाधि
गमेन मन्मथकलायुद्धेपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः २ दोर्भ्यां संयमितः पयोधरभ
रेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः हस्तेनानमितः ~~कचे~~ कचेऽधरसु
धापानेन संमोहितः कांतः काममतृप्तिमापत्तदहो कामस्य वामा गतिः ३ मारांके रतिकेलिसंकुलरणारंभे त
या साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमात् निस्पंदा जघनस्थली शिथिलता दोर्वल्लिरुत्कंपि
नांपरमप्रेमविलासत्वं स्फीतं २ न केवलं नवक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति ४ प्रत्यूह एवं बंधनादिक
मपि प्रीतिजनको बभूवेत्याह मध्यमावस्थामाह राधाविविधविलासपूर्णनिपुणः कांतः श्रीकृष्णः कांतया संयमनादि
भिः परिभूतोपि तृप्तिं प्रति क्षणविलक्षणाविलक्षणं सुखसंततिं प्राप तदहो कामस्य वामा लोकरीतिरिति रागतिरित्याश्चर्यं
एतदेवोपपादयति दोर्भ्यां बद्धः पयोधरभारेणापीडितः नखैराविद्धः दंतैः क्षताधरपुटो यस्य तादृशः कृतः श्रोणीतटेनाहतः हस्ते
न केशग्रहत्वानमितः अधरसुधापानेन विवशीकृत इति ३ अथोपांत्यावस्थां सूचयंस्तत्पावसास्यामाह रतिकेलिरेव संकुल
रणः परस्पराहतसंग्रामस्तस्यारंभे तया प्रकटिता शिपोठिजनितसंभ्रमातिशयया श्रीराधया कांतजयाय उपरि कांतस्योपरि साह
सप्रायं व्यस्तसमस्तौचित्यकृत्यं यत् किंचित्प्रारंभितं संभ्रमात् संभ्रमजनितायाः सात् संभ्रमजनितायाः समेवाह जघनस्थली जा
ड्यान्निस्पंदा जाता दोर्वल्ली शिथिलिता च वक्ष उच्चैः कंपितं अक्षि मीलितं जातमेकत्व एतदेवार्थांतरन्यासेन दृढयति स्त्रीबस्थायाः ३०
पि अतिभीरुतया प्रसिद्धानां स्त्रीणां पौरुषरसः कुतः सिध्यति कीदृशे रणारंभे मारांके केलिपक्षे मारः कामः रणपक्षे मारणं उभय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुगतत्वं प्रकटयन्नाह अहं त्वत्स्पर्शानुकूलेन निजकरकमलेन तव चरणयोरहं संवाहनादिरूपां पूजां करोति यतस्त्वं विदूरमागमितासि
आनितासि दूरगतपूजायुक्तैवेत्यर्थः तदर्थं क्षणं शयनोपरि नूपुरमिव मामंगीकुरु अभयं विशिनष्टि अनुगतो निपुणः अनुगतस्य पादस्त
नस्य उपकाराचरणयुक्तमेवेत्यर्थः २ पूज्यानुज्ञां विना पूजा न संभावहेत्यनुज्ञां प्रार्थयते वदनेति अमृतमिव वचनं वदनमधरं व
देत्यर्थः कुतोऽमृतत्वमाह यतो वदने गलितं अतोऽनुकूलं मत्साध्यसाधकं किमेतावता तवेप्सितं सेत्स्यति दुकूलमपसारयामि कुतः पयोधरो
धर्कं कमिव विरहमिव यथा विरहेण पयोधरदर्शनं विच्छिद्यते तथानेनापीत्यर्थः ३ ततो वक्रमवलोकयन्तीं प्रति हे मदुरसि कुचकलसं स्था
पय उरस्येवार्पणे हेतुमाह अतिदुर्लभं दुरापस्य हृद्येव धारणयोग्यत्वादित्यर्थः तर्हि कथं तत्प्राप्तिस्तवात आह प्रियस्य मम परिरं ७
भणाय योरभसउत्साहस्तेनोच्छलितमिवोत्प्रेक्षे उत्प्रेक्षापि कृतः पुलकितं यथा त्वं तवावलोकात्करुणास्तदार्तिशमनाय पुलकितो

करकमलेन करोमि चरणमहमागमितासि विदूरं क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं २ वद
नसुधानिधिगलितममृतमिव रचय वचनमनुकूलं विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं ३ प्रि
यपरिरंभणरभसवलितमिव पुलकितमतिदुरापं मदुरसि कुचकलसं विनिवेशय शोषय मनसिजतापं
४ अधरसुधारसमुपनय भाविनि जीवय मृतमिव दासं त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासं व
५ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादं श्रुतियुगले पिकरुतविकले शमय चिरादवसा
६ दं ममति विफलरुषा विकलीकृतमवलोकितुमधुनेदं मीलितिलज्जितमिव नयनं तव विरम विसृज रतिखेदं ७

ममर

भेषति तद्दृश्यमपीत्यर्थः किमर्थं तं विनिवेशयामि कामतापस्वेदं य रसायनकलसार्पणात्तापोपशांतिः स्यादेवेत्यर्थः ४ अन्यथा
मेदशामीदशोवस्यात् हे भामिनि वक्रदृष्ट्यावलोकनाद्भामिनीत्युक्तं अधररसुधारसं देहि किमर्थं मृतमिव दासं जीवय अमृतं दत्वामृतमि
वमां जीवयेत्यर्थः तत्रात्मनोऽनन्यगतित्वं आह त्वय्येवार्पितं मनो येन तं ननु तव कामपीडानलक्ष्यते तत्कथं तथाभूतमात्मानं कथयसी
त्यत आह विरहानलेन दग्धं वपुर्यस्य तं तदपि कुतः अविलासं विलासाभावादित्यर्थः ५ मौनेन तत्स्मृतिमालक्ष्य लोभादन्यपि प्रार्थ
यते हे शशिमुखि मणिरसनागुणं मुखरीकुरु कीदृशः अनुगुणः सदृशः कंठनिनादो मणितादिकं यस्य प्रार्थनविशेषोऽप्येतेन किं स्याद
त्राह मदम श्रुतियुगले चिरकालीनमवसादं दुःखं शमय तवावसाद एव कुतः पिकरुतैर्विकले वधिरीकृते ६ मयकारणकोपेन तव
नयनमेव प्रमाणमिति निगद्य प्रार्थयते इदं तव नयनमधुना मामवलोकितुं लज्जितमिव मीलति किमिति लज्जितं प्रत्युत कारणकोपेन
विकलीकृतं यः कश्चित् निरपराधं कुपित्वाकुलीकरोति सोऽपि तन्मुखावलोकने लज्जितो भवतीत्यर्थं तर्ह्यधुना किं कर्तव्यं तदुपदिशेत्य

वि

Dr. Urmila Sharma Collection, Varanasi

एवं प्रियदर्शनानंदोल्लसां प्रियं जगादेति तस्याः स्वाधीनभर्तृकावस्थां वर्णयिष्यन्नाह इतीति तल्लक्षणं यथा स्वायत्तासन्नदयिता भवेत् स्वाधीनभर्तृका इति स्ववसीकृतप्रियतमचित्ता श्रीराधा रतिश्रांतमपि गोविंदं तदीहावलोकनात् सादरं यथा स्यात्तथा इदं तत् स्पर्शलोभेन वक्ष्यमाणं जगाद कीदृशं इत्युक्तप्रकारं मनसा निगदितं कीदृशी सुरतांते नितांतखिन्नांगी ८ रामकिरीरागयति ताले यदुगादतदेवाह यदुनंदने क्रीडति सति सा श्रीराधा निजगाद तं प्रतीति प्रकटरणान्वयं क्रीडतीति सुरतांतेपि चित्क्री डिचोरस्याद्रखंडलीलात्वमुक्तं स्वेच्छामात्रेणाकर्षं क्रीडनं सेत्स्यति तस्या हृदयमानंदयति स्वचापल्येन पुनः क्रीडनायोन्मुखं करोति यस्तस्मिन् क्रीडति जगादेति क्रीडनसमयेपि प्रियप्रेरणात्तस्या निरंतरस्वाधीनभर्तृकात्वप्राधान्यं द्योतितं ध्रु किं निजगाद हे य

इति मनसा निगदंतं सुरतांते खिन्नांगी। राधा जगाद सादरमिदमानंदेन गोविंदं अथ कांतं रतिश्रांतम
पि मंडनकांक्षया जगाद माधवं राधा मुग्धा स्वाधीनभर्तृका ८ रामकिरीरागेण गीयते कुरु यदुनंद
न चंदनशिशिरतरेण करेण पयोधरे मृगमदपत्रकमत्र मनोभवमंगलकलशसहोदरे १ निजगाद
सा यदुनंदने क्रीडति हृदयानंदने ध्रु अलिकुलगंजनसंजनकं रतिनायकसायकमोचने त्वदध
रचुंबनलंबितकज्वलमुज्ज्वलय प्रियलोचने २ नयनकुरंगतरंगविकासनिवासकरश्रुतिमंडले म
नसिजपाशविलासधरे शुभवेशनिवेशय कुंडले ३

दुनंदनेत्युक्तरीत्या महाकुलोद्भवत्वेन सर्वातिशायिनायकगुणख्यापनाय संबोधनं यदि पुनर्मनोभवमखारंभः संभवति तथा मम पयोधरे कस्तूरिकापत्रभंगं करपल्लवेन कुरु कथं तत्र तत् करणीय मत आह कामस्य यो मंगलकलसस्तत्सदृशे मंगलमख कलसोपि चंदनचित्रितः पल्लवेनाच्छाद्यश्चापतेग्रतस्त्वमपि तथा कुर्वित्यर्थः कीदृशेन चंदनादपि शीतलेन शीतलत्वेनाव्यग्रतया कर स्य तत्करणयोग्यता सूचिता १ ततश्च तदुपकरणान्यापादयेत्याह हे प्रियतमलोचने त्वदधरचुंबनेन लंबितकज्वलं उज्वलय प्रक टय कीदृशं अलिकुलगंजनं संजनयतीति तादृशं कीदृशे रतिपतिशायकान् कटाक्षरूपान् मोचयतीति मोचने तस्मिन् कज्ज लादिकमपि तत्रापेक्षितमस्तीति भावः २ ततः हे शुभवेश मम श्रुतिमंडले कुंडले अर्पय कीदृशे नयनमेव कुरंगस्तस्य तरंगो गतिभंगी स्फु रणं तस्य यः प्रकाशस्तस्य निवासकरं यत् शुभवेश मम श्रुतिमंडलं तस्मिन् मनसिजस्य पाशो मृगबंधनरज्जुस्तस्य विलासधरे तस्या शुभयात् अग्रेणयातीत्यर्थः ३

२ सा

ततस्तस्याः रसावेशावसरे प्रियोऽधरं पीतवान् इत्याह मीलदिति धन्यमात्मानं मन्यमानः श्रीकृष्णः श्रीराधायाः आननं पिब
ति कीदृश्याः हर्षोत्कर्षस्य विमुक्त्या प्रसक्त्या निःसहा धर्तुमशक्या तनुर्यस्याः कीदृशः कस्तूरिकया श्यामयोरुच्चयोः पयोधर
योरुपरि परिष्वंगो विद्यते यस्य आननपाने हेतुगर्भ विशेषणानाह मीलन्मिलत्कपोले पुलकं तथा च शीत्कारस्य या धाराः नव
५ श्वसुरतांतचिन्हशोभितवपुर्दर्शनेन द्विगुणिताभिलाषः कलोमूदित्याह तस्याउरः पाटलपुष्पवदरुणेन नखेनांकितं।
दृशौ निद्रयालोहिते अधरशोणिमा चुंबनादिना क्षालितः केशा विलुलिताः स्रस्ताः स्रजश्च येभ्यस्ता दृशाः वंधश्रैथिल्यादि

मीलद्दृष्टि मिलत्कपोलपुलकं शीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं श्वासो
त्तुंगपयोधरोपरि परिष्वंगी कुरंगीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननं ५ तस्याः पाटलपा
णिजांकितमुरो निद्राकषाये दृशौ निर्धौताधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः कांचीदामदशांच
लं चेति प्रातर्निखातैर्दृशोरेभिः कामशरैस्तदद्भुतमभूत् पत्युर्मनः कीलितं ६ व्यालोलः केशपाश
स्तरलितमलकैः स्वेदलोलौ कपोलौ दृष्टा बिंबाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः कांची कांचि
द्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति ७

तस्रतः प्रस्रस्ता इत्यर्थः कांचीदामेव तत् अंचलप्रांतभाग एभिर्मनोवेधव्यापादकैः कामशरैः प्रातःसमये पत्युर्दृशोर्निखातैर्लग्नैर्मनो
विद्धमितितदद्भुतमभूत् अन्यतोर्पितशरैरन्यद्विद्धमित्याश्चर्यमित्यर्थः ततप्रत्यंगं पुनःपुनः पश्यन्नत्यंतं प्रिजगामेत्यर्थः ६ तन्म
नः कीलितं तस्या एव भावनया द्योतयति इयं श्रीराधा विमर्दितमालाधरापि मां प्रीणयति न केवलमीदृशी अपि तु स्तनजघन
पदं सद्यः पाणिनाच्छाद्य सत्रपं यथा स्यात्तथा मां पश्यती वसनादिव्यतिरिक्तसहजप्रत्यंगशोभादर्शनात् प्रीणनं तत्कालीनतत
शोभाव्यनक्ति केशपाशो व्यालोलः विक्षिप्त इति अलकैस्तरलितं धान्येन धर्ममिव तद्भेदः तृतीया कपोलौ स्वेदेन लोलौ व्या
प्ताविव्यर्थः बिंबाधरश्रीः दृष्टा कुचकलसयोः रुचा स्पर्द्धयैव हारयष्टिः हारिता हरितता गमिता कांची कांचिद्दिशं गता रसावेश
शैथिल्ये निजांगेक्षणात् आत्मनः क्रीडाविशेषावकलनात् सत्रपत्वमित्यर्थः ७

CC0. In Public Domain, Digitizagtion by eGangotri

गी० तथोपसंघारेपिस्वाधीनकृष्णोपसनया:सर्वोत्तमतानिश्चयावेशेनकारुण्यात्स्यात् तत्रतत्रसंदिहान्भ्रान्तिरसिकान् प्रत्याह भो:सुधिय:श्रीकृष्णभ
क्तिरसवासितचित्ता: पंडासदसद्विवेचिकाबुद्धिस्तयान्विता:कवि:सत्काव्यकर्त्ता तथाभूतस्यजयदेवस्यपंडितकवे:श्रीगीतगोविंदतस्तत्सर्वेदु
३२ ल्लभलाभानंदेनसहिता:संत:परिसर्वतोभावेनशोधयंतु शंकापंकामुद्धूयनिश्चिन्वंतु तत्किंयत्तगांधर्वकलासुसंगीतशास्त्रोक्तस्वररागता
लगीतादिषुयत्नेपुरायंतदेतन्निबंधानुसारेणतन्निश्चिन्वंतुइत्यर्थ: नकेवलमिदं अपितुयदेतत्सर्वसर्वव्यापनशीलस्यविष्णो:सर्वाव
तारिणोऽचिंत्यानंतशक्ते:स्वयंभगवत:श्रीकृष्णस्यभजनविषयंयदनुध्यानंस्वाभिष्टचिंत्यतल्लीलाविचारसमाधानादनुक्षणचिंत
नंतदप्येतत् दृष्ट्यैवनिश्चिन्वंतु नित्यत्वसर्वोत्तमत्वनिश्चयेनदृढीकुर्वंत्वित्यर्थ: तत्रापिदुरूहगते:शृंगारस्यमहाप्रेमरसविचारस्यय
त्तत्वंदुरूहगतिदुरूह व्रजसुंदरीलीलागतं तदप्येतदनुसारेणमहाभावपर्यंतंनिश्चिन्वंतु काव्यमधुराद्यर्थानुप्रासंगादिषुयल्लीला से॰
यितंयथाकाव्यानिलीलावदाचरति तथावर्णनप्रकारं तत्रहेतुकृष्णएकतानएकांतोऽनन्यवृत्तिरात्मामनोयस्य श्रीकृष्णैकांतभा

यद्गांधर्वकलासुकौशलमनुध्यानंचयद्वैष्णवंयच्छृंगारविवेकतत्त्वमपियत्काव्येषुलीलायितं तत्सर्वंजयदेवपंडितकवे:
कृष्णैकतानात्मन:सानंदा:परिशोधयंतुसुधिय:श्रीगीतगोविंदत: ११ पर्यंकीकृतनागनायकफणाश्रेणीमणीनां
गणेसंक्रांतप्रतिबिंबसंवलनयाविभ्रद्वपुर्विक्रियां पादांभोरुहधारिवारिधिसुतामक्ष्णांदिदृक्षु:शतै:कायव्यूहमिवा
चरन्नुपचितीभूतोहरि:पातुव: १२ त्वामप्राप्यमयिस्वयंवरपरांक्षीरोदतीरोदरे शंकेसुंदरिकालकूटमपिबन्मूढोमृडानी
पति: इत्थंपूर्वकथाभिरन्यमनसोविक्षिप्यवक्षोंचलंराधायास्तनकोरकोपरिमिलन्नेत्रोहरि:पातुव: १३ ॥

कविशेषस्यैवतद्भक्तेस्तावत्पर्यंतारोहणविज्ञानसामर्थ्यात् ११ अथश्रीराधिकाप्रत्यंगदर्शनात्युत्कंठावगुंठित: श्रीकृष्णोनेत्र
बाहुल्यमन्विच्छन् श्रीशेषशायिनोलक्ष्मीदर्शनोत्कंठामुत्प्रेक्षितवान् सकौतुकमाशिषंप्रयुंक्ते हेप्रियेहरि:शेषशायीवोयुष्मान्सस
खी:पातु: कीदृश: कायव्यूहमाचरन्निवोपचितीभूतोवृद्धिंप्राप्तइतिमुत्प्रेक्ष्यते कथमेवमुत्प्रेक्षे· पादांभोरुहधारिवारिधिसुतां श्री
लक्ष्मीमक्ष्णांपातैर्दिदृक्षुरिच्छु: तत्प्रकारमाह तल्पीकृतस्यफणाश्रेण्यांयेमणयस्तेषांगणेमिलितानांप्रतिबिंबानांप्रसरणेनविभ्र
द्वपुर्विक्रियांविभ्रत् १२ ततोऽत्युच्छलितोत्कलिकयातद्वक्षोऽवलोकायतत्स्यावैचित्र्यापत्त्यैपुनर्नारायणचरितवर्णनेनकौतुकमातनोदिति
स्मरन्कविराशि[illegible]ति हरि:श्रीकृष्ण:पातुव: कीदृश: राधायावक्षोंचलमपसार्यस्तनकोरकोपरिमिलन्नेत्र: कथंतन्नेत्रमीलनंसंभा
व्यते हेसुंदरि क्षीरसमुद्रस्यतीरमध्येमयिस्वयंवरां त्वामप्राप्यशिवोमूढ:सन्कालकूटविषमपिबत् इत्यहंशंके नारायणस्मरणेनतदा
वेशादित्यनेनप्रकारेणपूर्वकथाभि:पुराणप्रसिद्धाभि:तदकृतपूर्वाभिर्विस्मितचित्ताया: काचित्क्वचित्तल्लीलांकुरणेनकौतुककरणा ३२
र्पीत्यमुक्तं १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथानंतरं मम मुखे अलकं संस्कुरु तत्र हेतुः पूर्वाचरितसूचकतया सखीपरिहासजनकं यतः सन्मुखे सुचिरं कालं व्याप्य मुखकमलस्यो
परि इतस्ततः प्रसरणेन भ्रमरचयं रचयंतं अतएव रुचिरं कीदृशे त्वत्कृतपानन मधुधारतया जितकमले भावोल्लासप्रसन्नतया वि
मले मुखस्य क...लत्वेनालकस्यापि भ्रमरत्वं ५ ततश्च हे स्मितविकसितानन मुख ललाटचंद्रे मृगमदरसवलितं तिलकं ललितं यथा।
स्यात्तथा कुरु कीदृशे विहिताकलंकस्य कलांशो येन ललाटस्य बालचंद्रत्वेन मृगमदतिलकं कलंककलंत्वेन निरूपितं कीदृशे वि
श्रमिता अपनिता अंबुकणा यत्र तस्मिन् तानपनीय तिलकं कुर्वित्यर्थः ५ हे मत्प्रार्थनाकृतिकुशल मम केशे कुसुमानि कुरु कीदृशे सं।
भोगवेगलिते उत्कीर्णे तत्कालिनत्वं च ...मनोहरे तथा मनसिजस्य यो ध्वजस्तस्य चामरे किंच मयूरपुच्छस्येव डामर आटोपो यस्य ६ त

ललाटमलिकं गोधुरुदेहम्याति त्यमरः

भ्रमरचयं रचयंतमुपरि रुचिरं सुचिरं मम सन्मुखे जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ५ मृगम
दरसवलितं ललितं कुरु तिलकमलिकरजनीकरे विहितकलंककलंकमलानन विश्रमितश्रमशीकरे ५ मम
रुचिरे चिकुरे कुरु मानद मनसिजध्वजचामरे रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे ६ सरसघ
ने जघने मम शंबरदारणवारणकंदरे मणिरसनावसनाभरणानि शुभाशय वासय सुंदरे ७ श्रीजयदेववचसि
जयदे सदयं हृदयं कुरु मंडने हरिचरणस्मरणामृतकृतकलिकलुषज्वरखंडने ८ रचय कुचयोः पत्रं चित्रं कुरु
ष्व कपोलयोर्घटय जघने कांचीमंच स्रजा कवरीभरं कलय वलयश्रेणीं पाणौ पदे कुरु नूपुराविति निगदितः प्री

तच्च हे शुभाशय त्वत्करस्पर्शानोत्तुंगे मम तः पीतांबरोपि तथाकरोत् १० जघने मणिरसनां वसनानि परिधापय कीदृशे रसः
शृंगारस्तत्सहितं तद्योग्यं घनं निविडं च यत् तस्मिन् अपि संवरदारण एव वारणः कंदर्पहस्ती तस्य कंदरे यतः सुंदरे ७ श्रीजयदेववच
सि सदयं यथा स्यात्तथा कुरु हृदयं स्निग्धीतकरणस्येव एतत् श्रवणयोग्यत्वात् ततो जयं श्रीकृष्णं ददातीति जयदं तस्मिन् तत्र हेतुः
हरिचरणस्मरणमेवामृतं तेन कृतं कलिकलुषज्वरखंडनं येन अतएव मंडने भूषणरूपे ८ अस्यावेशेन न यापुनरुक्तप्रस्तद्वचन
श्रवणानंदितः श्रीकृष्णस्तथैवाकरोदित्याह हे श्रीकृष्ण कस्तूरिकापत्रं कुचयोः रचय कपोलयोश्चित्रं कुरुष्व जघने कांचीमर्पय
मालया कवरीभरं प्रापय वलयश्रेणीं पाणौ कलय पादे नूपुरौ कुरु इत्यनेन प्रकारेण तया याचितः पीतांबरो बहुवांछितलाभात्।
प्रीतस्तथा तथैवाकरोत् अपि शब्देन सुरतांतः वसनव्यत्ययाभावे पितरां ताननुवर्तनात् तस्यानिशां तदधी
नत्वं दृढीकृतं १० ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ हृद्रोगमाश्वहिनोत्यचिरेणाधीर इति शुको कृपामाणपादे तत् श्रवण कीर्त्तन स्मरणानुमोदन प्रभावमाह हे माध्वीक इहलोके यावत् जयदे
व वचांसि विविधवक्तर्वतः शृंगारसारस्वतभावं ददतीति तावद्भवतः चिंता साध्वी न भवति मधुरत्वेपि मादकत्वादीत्यर्थः हे शर्करे त्वं कर्कश
सि माधुर्यकलाभावेपि कठिनत्वात् हे द्राक्षे के त्वां द्रक्ष्यंति कोमलत्वेपि तिंदुदेशोद्भवत्वात् हे अमृत त्वं मृतमसि मरणानंतर प्राप्यत्वात् ।
हे क्षीर ते रसो नीरवत् आवर्त्तनाद्यपेक्षत्वात् हे आम्र त्वं क्रंद त्वग्ग्राद्यादि हेयांशत्वात् हे कांताधर त्वं पालम सुरालयं याहि अधोदात्तनाम
त्वात् तवात्र स्थितिर्न युक्तेत्यर्थः श्रीजयदेव भणितमधुररस्य भक्तिरसास्वादनिमग्नाजना स्तेषु मुद्दमेव करिष्यंतीत्यर्थः २५ अतः स ।
गोयं समृद्धिमदाख्यसंभोगरसानंदितः पीतांबरः प्रियाप्रेमाविष्टतया तद्दर्शनरसाश्रयः श्रीकृष्णो यत्र स इति ❀ ❀ अथ पितृमा
तृस्मरणपूर्वक पराशरादिमतज्ञातार एवास्याधिकारिणः इति तान् प्रत्याशिषयति भोजदेवनामास्य पितातस्मात् प्रभवो यस्य रमादे

साध्वी माध्वीक चिंता न भवति भवतः शर्करे कर्कशासि द्राक्षे द्रक्ष्यंति के त्वाममृत मृतमसि क्षीर नीरं रसस्ते माकंद क्रं
द कांताधर धरणितलं गच्छ यच्छंति यावद्भावं शृंगारसारस्वतमिह जयदेवस्य विष्वग्वचांसि २५ इति श्रीजय
देवकृतौ गीतगोविंदे महाकाव्ये सुप्रीतपीतांबरो नाम द्वादशः सर्गः १२ ❀ ❀ श्रीभोजदेवप्रभवस्य रामादे
वीसुत श्रीजयदेवकस्य पराशरादि प्रियवंधुकंठे श्रीगीतगोविंदकवित्वमस्तु समाप्तं श्चायं गीतगोविंद ❀

वी नाम्न्यस्य जननी तस्याः सुतस्य जयदेवस्य गीतगोविंदाख्य कवित्वं पराशरादीनां ये प्रियास्तेन ज्ञानेन प्रियत्वं प्राप्तास्तेषामपि वंधवस्तन्म
तसाराराधामधवरहः केलिज्ञानेन वंधुत्वं प्राप्तास्तेषामेव कंठे लग्नलग्नभूषणवत् सदास्तु अनेनास्य सर्वपुराणेतिहासादिलक्षणांस ।
मस्त्या सर्वसारत्वं नित्यत्वं दुरूहत्वं बोधितं अत्रोपक्रमः आदौ श्रीकृष्णस्य श्रेष्ठ्यापादानं प्रलयपयोधिजले तीत्यादिना वसंते वासंति
कुसुमेत्यनेन ततः श्रीराधिकायाः कंसारिरपीत्यनेन तत्रैव साधारणलीलातस्या उत्कंठा वर्णनंच ततः श्रीकृष्णस्याप्युत्कंठा यमुना
तीर इत्यनेन ततः श्रीकृष्णस्यैव राधिकोत्कंठा कथनं पूर्वयत्रेत्यनेन ततोऽस्या अभिसारिकावस्था वर्णनं अथ तामित्यनेन ततो वास
कसज्जा अत्रांतर इत्यनेन ततश्च द्रोदयेपुनरुत्कंठा अथागतामित्यनेन ततो विप्रलब्धा अथ कथमपीत्यनेन ततः खंडितामथेत्यने
न ततः कलहांतरिता अत्रांतरे मसृणरोषेत्यनेन ततो मानिनीवर्णनं सुचिरेत्यनेन ततः सखीप्रार्थना सा साध्वसेत्यनेन ततोऽन्यो
न्यावलोकनवर्णनं गतवतीत्यनेन ततः श्रीकृष्णप्रार्थनाप्रत्यूह इत्यनेन ततो रहः केलया इति मनसेत्यनेन ततः स्वाधीनभर्तृका
यकोंधर्वकलेत्यनेन इति यद्वत्स्ववालभग्यो जैः पित्रा प्रीतिरवाप्यते तद्वत् श्रीकृष्णचैतन्यः प्रीयतामत्र जल्पिते श्रीगोविंदपादसेवा
प्रभावादुदिता स्वयं चैतन्यदासेन वालबोधनी स्यात् सतां मुदे ॥ श्री

इति श्रीगीतगोविंदस्य बालबोधिनी टीका समाप्ताः लिखितमिदं पुस्तकं श्रीकृष्णदासेन ॥
मासा संवत १९ ३३ लिखितं लिखितं स्वपठनार्थं ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाण्डुलिपिः समाप्ता

MANUSCRIPT ENDS

ختم شد

Dr. Urmila Sharma Collection, Varanasi